नित्यकाम्यकर्ममीमांसा

रचयिता

साङ्गवेदार्थसम्राट्
शास्त्ररत्नाकरः
वेदमीमांसासार्वभौमः
भूतपूर्व - श्रीगौतमीविद्यापीठसंस्कृतकलाशालाध्यक्षः
रेमिळ्ळ सूर्यप्रकाशशास्त्री

१९८९

श्रीः

विज्ञप्तिः

"यो ब्रह्माणं विदधाति पूर्वम्
यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ।।"

अस्मत्भारते देशे धर्म-ब्रह्म-प्रतिपादनद्वारेण सर्वपुरुषार्थानां मूलभूतो वेदराशिः त्रयी विद्येति नाम्ना विराजत इति नातिपरोक्षं विदुषाम् ।

कोऽयं वेदो नाम, वेदस्य किं वा लक्षणम् ?

अपौरुषेयं वाक्यं वेदः । केवल-अपौरुषेयत्वमात्रोक्तौ आकाशादिष्वतिव्याप्तिः । केवलवाक्यत्वमात्रोक्तौ लौकिकनाटकालङ्कारादिष्वतिव्याप्तिः । वेदस्य अपौरुषेयत्वं मीमांसाशास्त्रस्य 1-अध्याये 1-पादे शब्दशब्दार्थसम्बन्धद्वारेण वा, पदसमुदायात्मकवाक्यरचनाद्वारेण वा, वाक्य-समुदायात्मक-ग्रन्थरचनाद्वारेण वा, त्रिभिरपि प्रकारैः वेदे पुरुषाानुप्रवेशो न सम्भवतीति मार्गेण साधितम् । अतः अपौरुषेयं वाक्यं वेदः इत्यनेन वेदस्य स्वरूपं सिद्धम् ।

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता ।।"

इति इष्टप्राप्ति-अनिष्टपरिहारयोः प्रत्यक्षानुमानादि-प्रमाणागोचरम् उपायं यः बोधयति स वेद इति वेदस्य लक्षणं सिद्धम् । सोऽयं वेदः :—

"आद्यो वेदश्चतुष्पादश्शतसाहस्रसंयतः ।" वि॰ पु.

वेदविभागात्पूर्वकालीनो वेदः एक इत्युक्तवचनेन सर्वेषु च महा-कल्पेषु द्वापरयुगावसानपर्यन्तं अविभक्तं एव एकग्रन्थभूतो वेदः। तावदेव अविभक्तवेदाध्ययनयोग्यपुरुषबुद्धिसद्भावात्। अतः वेदविभागात्प्राक्काले एक एव वेदः आसीत्। अपरत्र वेदस्त्रिविध इति

"अग्नेरृक्ग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः। ऐ. ब्रा. 5 32

"अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणम्॥ इति मनु 1-23,

वेदेष्वपि अयं सङ्केतः श्रूयते।

"अग्निमीळे पुरोहितं" इति ऋग्वेदः आरम्भे अग्निमेव प्रस्तौति।

"इषे त्वोर्जे त्वा वायवस्थ" इति वायुमेव प्रस्तुवन् आरभ्यते यजुर्वेदः।

"अग्न आयाहि वीतये" इति सूर्यमण्डलादायान्तं अग्निं सूर्यमेव आदौ प्रस्तौति सामवेदः।

यद्यप्यत्र अग्निशब्दः श्रूयते तथापि —
"दिवस्परि प्रथमं जज्ञे" तै. सं. 4-2-2

"मूर्धानं दिवो अरतिं" पृथिव्या वैश्वानरमृताय जातमग्निम्" तै. सं. 1-4-13 इत्यादिश्रुतिषु अग्निरेव दिवि आदित्यरूपेण पृथिव्यां वैश्वानराग्निरूपेण अप्सु समुद्रादिषु बडबाग्निरूपेण स्थित इत्युक्तत्वात्। अत्र अग्निशब्देन सूर्य एव उच्यत एति न विरोधः। तथा च अग्न्यादिभ्यः देवेभ्यः "त्रयो वेदा अजायन्तेति", "ऋग्भिः पूर्वाह्णे—दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः।" तै. ब्रा. 3-12-9 यज्ञं व्याख्यास्यामः... "सस्त्रिभिर्वेदैर्विधीयते।"

ऋग्वेद-यजुर्वेद-सामवेदैः इति आप. श्रौ. 24-1-16 एवं श्रुति-स्मृति-सूत्रादिभ्यः वेदत्रैविध्यमवगम्यते। "अस्य महतो भूतस्य निश्वसित-

मेवैतत् बृ. अ. 4.4-10 यदृग्वेदो यजुर्वेदस्सामवेदोऽथर्वाङ्गिरसः ।" इति । "तत्रापरा ऋग्वेदो यजुर्वेदस्सामवेदोऽथर्ववेदः इति मु. उ. 1-1 "छान्दोग्येऽपि "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थं"— 7.1.2 नृसिंहपूर्वतापनीयोपनिषदि ।

"ऋग्यजुस्सामाऽथर्वाणश्चत्वारो वेदाः"—1-2

भागवते 12-6-अ.

"तेनैवासौ चतुर्वेदान् चतुर्भिः वदनैर्विभुः ।
स व्याहृतिकान् सोंकारान् चातुर्होत्रविवक्षया ।।

पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान् ।
ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ।।

ते परम्परया प्राप्ताः तत्तच्छिष्यैर्धृतव्रतैः ।
चतुर्युगेष्वथ व्यस्ताः द्वापरादौ महर्षिभिः ।।

क्षीणायुषः क्षीणसत्त्वान् दुर्मेधान् वीक्ष्य कालतः ।
वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाऽच्युतचोदिताः ।।

अस्मिन्नप्यन्तरे ब्रह्मन् भगवान् लोकभावनः ।
ब्रह्मेशाद्यैः लोकपालैः याचितो धर्मगुप्तये ।।

पराशरात्सत्यवत्यां अंशांशकलया विभुः ।
अवतीर्णो महाभागः वेदं चक्रे चतुर्विधम् ।।

ऋगथर्वयजुस्साम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मालामणिगणा इव ।।

तासां स चतुरः शिष्यानुपाहूय महामतिः ।
एकैकां संहितां ब्रह्मन् एकैकस्मै ददौ विभुः ।।

पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणम् ।।

साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसं नाम स्वशिष्याय सुमन्तवे ।
कदाचिद्ध्यायतस्स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥

कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा ।
चातुर्होत्रं कर्मतन्त्रमुपवेदनयैस्सह ॥

धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ।
स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥

यद्यद्येनाऽसृजद्देवस्तन्मे ब्रूहि तपोधन ।
ऋग्यजुस्सामाथर्वाख्यान् वेदान्पूर्वादिभिर्मुखैः ॥"

भा. 3-12-34-35-36

"आध्वर्यवं यजुर्भिस्तु ऋग्भिर्हौत्रं तथा मुनिः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ॥"

अग्निपुराणे 150-25

स्कान्देऽपि—

"वेदमेकं चतुष्पादं चतुर्धा व्यभजत् प्रभुः ।

इत्यादिपुराणवचनैश्च वेदस्य चातुर्विध्यमवसीयते ।

ननु, यज्ञशरीरस्य वेदत्रयेणैव निष्पन्नत्वात् त्रय्या विद्यया अलम् । किमर्थं चतुर्धा विभाग इति चेत् उच्यते । चतुर्णामपि वेदानां यज्ञक्रतुषु विनियोगः दृश्यते । तथा हि-गोपथब्राह्मणे "अथाह प्रजापतिस्सोमेन यक्ष्यमाणो वेदानुवाच । कं वो होतारं वृणीयाम् । कमध्वर्युं, कमुद्गातारम् । कं ब्रह्माणमिति । ते ऊचुः- ऋग्वेदमेव होतारं वृणीष्व । यजुर्विदमध्वर्युम् । सामविदमुद्गातारं अथर्वाङ्गिरोविदं ब्रह्माणमिति । तत्तद्वेदविदं तत्तदृत्विक्त्वेन वृणुतेति श्रुत्यैव वरणविधानात् अथर्ववेदः ब्रह्मत्वेन विनियोगः आवश्यक इति अथर्ववेदभाष्यभूमिकायां सायणाचार्यैः अथर्ववेदः व्याख्येयो न वा इति विचारावसरे अथर्ववेदः ब्रह्मत्वेन वरणस्य मुख्यत्वात् अथर्ववेदः

व्याख्येय इति निरणायि । यद्यपि "यदृचैव होत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवति" अथ "केन ब्रह्मत्वं क्रियते त्रय्या विद्ययेति ब्रूयात्" 5-33 इत्यैतरेयब्राह्मणवचनाच्च । "स त्रिभिर्वेदैर्विधीयते ऋग्वेदयजुर्वेदसामवेदैरित्युपक्रम्य सर्वैरग्निष्टोम इत्युक्तत्वेऽपि अत्र सर्वशब्देन प्रकृतानुरोधेन "केन ब्रह्मत्वं क्रियते त्रय्या विद्ययेति ब्रूया"दिति एतरेय वचनबलाच्च त्रयी विद्यैव ग्रहीतव्येत्युच्यते । यज्ञक्रतुषु चतुर्णां होत्रादीनामृत्विजामपेक्षितस्य क्रियाकलापस्य त्रय्यैव सिद्धत्वात् न चतुर्थस्य आकांक्षाऽस्ति । कुतः तस्य व्याख्यानचिंतेत्याशंक्य हौत्रम्, आध्वर्यवं, औद्गात्रमिति समाख्यया त्रयाणामपि वेदानां प्रतिनियतहोत्रादिकर्तव्यप्रतिपादनपरत्वावगमात् न ब्रह्मकर्तव्यप्रतिपादने तात्पर्यं संभवति । यथा अन्यपरस्य यजुर्वेदस्य होतृकर्तव्यतायां यथा तथाविधस्य ऋग्वेदस्य अग्निहोत्रे एव त्रय्यां तत्र तत्र प्रतिपादितं यद्ब्रह्मत्वं तदथर्ववेदसिद्धमेव लेशेनोक्तमिति अतात्पर्यविषयत्वात् अकृत्स्नत्वाच्च नादरणीयम् । अकृत्स्नत्वमेवाभिप्रेत्य शाखान्तरोक्तं हौत्रं नानुष्ठेयमिति आश्वलायनेनोक्तम् । तद्यथे केचन छान्दोग्ये वा आध्वर्यवे वा हौत्रा मर्शास्समाम्नाताः न तान्कुर्यात् अकृत्स्नत्वाद्धौत्रस्य" आश्व..... 6-13 इति ।

"अथ ह प्रजापतिस्सामेन यक्ष्यमाणः इति "अथ चेन्नैवंविधं ब्रह्माणं वृणुते दक्षिणत एवैषां यज्ञो रिच्यते" इति च गोपथब्राह्मणोक्तवचनबलात् अथर्ववित एव ब्रह्मत्वमित्युक्तत्वात् अथर्ववेदो व्याख्येय इति सिद्धान्तितम् । "स त्रिभिर्वेदैर्विधीयते ।" इति स्मृतिस्तु उदाहृतश्रुत्यनुसारेण मुख्यस्य अथर्ववितः असंभवे तत्तच्छाखासु यावदुक्तब्रह्मत्वमात्रेणापि क्रतुशरीरनिष्पत्तिर्भवतीत्येवमभिप्राया "त्रय्या विद्ययेति ब्रूयात्" इति श्रुतिरपि प्रकृतव्याहृतित्रयापेक्षितत्वात् अविरुद्धा ।

"अस्य महतो भूतस्य.....अथर्वाङ्गिरसः" इति वाजसनेयकश्रुत्यनुसारेण "त्रयो वेदा अजायन्ते"ति श्रुतिरपि चतुर्थवेदस्य उपलक्षणतया व्याख्येया इत्याद्युक्तिविशेषैः वेदत्रयस्यैव क्रतुषु विनियोग इति वचनं अथर्व-

विदः असंभवे इति योजनीयम् । अथर्ववित्संभवे तस्यैव मुख्यत्वात् तद् ब्रह्मत्वमेव आवश्यकमिति । अतः अथर्ववेदः व्याख्येय इति सिद्धान्तितम् अनेन वेदत्रैविध्यचातुर्विध्ययोः। यज्ञक्रतुषु ब्रह्मत्ववरणे मुख्यगौणभेदेन विनि योगः व्यवस्थापनीयः । किञ्च यष्टा तावत् अथर्वविदेव यदि स्यात् तस्य क्रतौ अथर्ववित एव ब्रह्मत्वम् । गौणतयापि नान्यस्य इति वक्तुं शक्यते अनेन वेदत्रैविध्यचातुर्विध्ययोः परस्परविरोधः परिहृतः ।

क्वचित् "भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास । तꣳ ह जीर्णिꣳस्थ विरꣳ शयानम् इन्द्र उपव्रज्योवाच । भरद्वाज यत्ते चतुर्थ मायुर्दद्याम् । किमनेन कुर्या इति । ब्रह्मचर्यमेवैनेन चरेयमिति हो वाच तꣳ ह त्रीन्गिरिरूपानविज्ञातानिव दर्शयांचकार । तेषाꣳ हैकैकस्मान्मुष्टि नाददे । स हो वाच । भरद्वाजेत्यामन्त्रय वेदा वा एते अनन्ता वै वेदाः तै॰ ब्रा. 3-10-11 अनेन उपाख्यानेन वेदानां आनन्त्यं श्रूयते । शाखा संख्या तु अन्यत्र एवं श्रूयते ।

"आद्यो वेदचतुष्पादः शतसाहस्रसम्मितः ।" वि॰पु॰ वचनम् ।
"राम वेदाः कति विधाः? शाखाभेदांश्च तद्वद ।
अथ वेदविभागेन वेदाश्चत्वार ईरिताः ।।

तेषां शाखा ह्यनेकास्युः तासु उपनिषदस्तथा ।
ऋग्वेदस्य तु भेदास्युः एकविꣳशतिसंख्यकाः ।।

नवाधिकशतं शाखाः यजुषो मारुतात्मज ।
तथा सहस्रसंख्याकाः स्युरेवं साम्नः परन्तप ।
अथर्वणस्य शाखास्युः पञ्चाशत् भेदतो हरे ।।

—इति मुक्तिकोपनिषत्

स्कान्दे तु—

"नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितः ।
तं ज्ञानमन्यथा जातं त्रेतायां द्वापरे स्थितम् ।।

गौतमस्य ऋषेः शापात् ज्ञाने त्वज्ञानतां गते ।
संकुचितबुद्धियुक्तास्तु ब्रह्मरुद्रपुरस्सराः ॥

शरण्यं शरणं जग्मुः नारायणमनामयम् ।
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥ इति ।
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्सन्नान् भगवान् वेदान् उज्जहार हरिस्वयम् ॥

चतुर्धा व्यभजत् तांश्च चतुर्विंशतिधा पुनः ।
शतधा चैकधा चैव तथैव च सहस्रधा ।।

तथा द्वादशधाचैवं पुनस्तस्यार्थवित्तये ।
चकार ब्रह्मसूत्राणि तेषां सूत्रत्वमञ्जसा ॥"

सूतसंहितायां तु—

संक्षिप्य सकलान् वेदान् चतुर्धा कृतवान् द्विजाः ।
ऋग्वेदः प्रथमः प्रोक्तः यजुर्वेदस्ततः परः ॥

तृतीयः सामवेदाख्यः चतुर्थोऽथर्व उच्यते ।
एवं विग्शतिभेदेन ऋग्वेदो भेदितोऽमुना ॥

यजुर्वेदो द्विजा एकशतभेदेन भेदितः ।
नवधा भेदितोऽथर्ववेदः सामस्सहस्रधा ॥

व्यस्तवेदतया व्यास इति लोके श्रुतो मुनिः ।

"सहस्रं सामशाखाः, एकशतं यजुश्शाखाः, एकविग्शतिशाखाः बह्वृचः, नव अथर्वणशाखाः"इति, चरणव्यूहादिग्रन्थेषु । एवं बहुषु स्थलेषु बहुभिः प्रकारैः विभक्ता शाखासंख्या प्रदर्शिता । पूर्वोक्त–उपाख्याने "अनन्ता वै वेदाः""इत्यनेन वेदानामानन्त्यमुक्तम्।"वेदाश्चत्वारः; तेषां इयत्यश्शाखाः इति वचनेन, आनन्त्यस्य विरोधः संभवति । कथमिति चेत्—

"वेदमेकं चतुष्पादं चतुर्धा व्यभजत् प्रभुः ।

इत्यादिपुराणवचनैः वेदगतचतुष्टयसंख्या या प्रदर्शिता सा ऋग्वेदत्वादिधर्म-परिगणनाभिप्रायैव न तु धर्मिपरिगणनाभिप्राया। "अनन्ता वै वेदा." इति श्रुत्यनुरोधात् शतसहस्रसम्मितः इति वचनं आनन्त्यतात्पर्यकमिति वक्तव्यम् । शतानि च तानि सहस्राणि चेति कर्मधारयसमासः।

"दश दश तच्छतम्, दश शतानि तत्सहस्रं तत्सर्वं" इति श्रुतेः अनन्तसंख्याक "अनन्ता वै वेदाः" इति श्रुतेः आनन्त्यतात्पर्यक इत्यर्थः। शाखासंख्या तु ऋगादीनां भागेषु ध्येया। सा वेदभागावयवरूपधर्मिपरिगणनाभिप्रायैव।

अस्मिंस्तु वैवस्वतमन्वन्तरे अष्टाविंशतितमे द्वापरे युगे=द्वापरयुगान्ते इत्यर्थः। प्राराशर्येण अपरिमितशाखानां मध्ये एतावत्यः शाखाः विभक्ता इति वक्तव्यम्। अपरिमेये तु इयं गणना आनन्त्यस्य उपलक्षणमेव। तत्र तस्याः अवयवसाकल्यपर्यवसायित्वाभ्युपगमे तस्य आनन्त्यबोधकवाक्यस्य अप्रामाणिकत्वापातात्।

दृष्टश्च अयमेव संख्योपादानप्रकारः इतरत्रापि आनन्त्यस्य तु। भगवद्गीतासु विभूतिवर्णनस्य अन्ते—

"अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नं एकांशेन स्थितो जगत्॥" इति॥

लोके अंशानां परिगणने द्वयी गतिर्विद्यते। विभाज्यस्य पदार्थस्य अंशानां संख्यामनुक्त्वा ततः विभक्तानां अंशानां संख्यावचनमेकम्। यथा "विन्ध्यस्य स एक परमाणुः। तौ द्वौ ते त्रयः" इत्यादौ अनन्तपदार्थस्य यावन्तः परमाणवस्सन्तीति तत्संख्यामनुक्त्वा तदवयवपरिगणनायां एकः परमाणुः इत्यादि। इयं रीतिः प्रथमा। यत्र हि पदार्थस्य यावन्त अंशास्सन्ति तावतां एकैकसंख्याया अभिधित्सायां अवधिभूतसंख्यावाचिपदं प्रयुज्य ततः विभक्तसंख्यावचनं द्वितीया रीतिः। यथा द्वयोरेकः त्रयाणामेक इति। अत्र वेदविषये तावत् प्रथमा रीतिरेव अनन्यगतिकत्वात् आश्रीयते। एवं च श्रीभगवताऽपि विश्वतो व्याप्तिमङ्गीकृत्य स्वस्य विद्यमानं निर्धारण-अव-

धिवाच्यं अंशगतसंख्यामनुपादायैव एकांशेन इत्युक्तम् । परमात्मनः अनन्तांशोपेतत्वात् । एवमेव वेदस्य आनन्त्यस्य, अंशानामपि आनन्त्यस्य च आवश्यकतया कतिपयेष्वंशेषु एकविंशतिरित्यादि विभक्तसंख्या शाखाविवरणेन अवधिगतनियामकादीनां संख्यानामवधारणं अशक्यमेवेति उक्त— उपनिषदाद्युक्तवेदाऽवयवसंख्यावर्णनं आनन्त्यस्य उपलक्षणमेव । तथा च परिगणिताभ्यः शाखाभ्यः अन्याः भगवदेकवेद्याः वेदभागास्सन्तीति सिद्धम् । तथा च आनन्त्यश्रुतेः संख्यावाचकवचनानां च विरोधो नास्तीत्युक्तः ।

ननु तत्तथैव भवतु, संख्यावाचकप्रमाणेषु एकत्र ऋग्वेदस्य एकविंशतिशाखा इति अन्यत्र चतुर्विंशतिशाखा इति तथैव अथर्ववेदश्च एकत्र नवधा विभक्त इति अन्यत्र मुक्तिकोपनिषदि पञ्चाशदिति, स्कन्दपुराणे तु द्वादशधेति प्रतिपादकवचनानि दृश्यन्ते । अतः अत्रापि परस्परविरोधो अस्तीति चेत् उच्यते-कल्पभेदेन वा वैशंपायनादिव्यासशिष्याणा चतुर्णां ये शिष्याः प्रशिष्याः सन्ति तत्प्रचारसमये बोधसौकर्याय अल्पसंख्याकासु शाखासु मन्त्रराशीनुद्धृत्य अधिकसंख्याकत्वं अधिकशाखागतमन्त्रराशीनुद्धृत्य कासुचिच्छाखासु अन्तर्भाव्यशाखागतसंख्यान्यूनताऽपि संपादितेति वक्तुं शक्यते । अतः इयता ग्रन्थेन कृतयुगादौ वेदचतुष्टयसमूहरूपः वेदः एक एव । प्रतिकल्पे प्रतिमन्वन्तरे च द्वापर-कलियुगसन्धिकाले कलियुगे उत्पत्स्यमानानां जनानां शक्तिसामर्थ्यादिकं ज्ञात्वा अवतीर्णेन व्यासरूपेण नारायणेन वेदः ऋग्यजुस्सामाथर्वभेदेन चतुर्धाविभक्तः तान् वैशंपायनादीनां शिष्याणां एकैकस्मै एकैकं वेदं ददौ । तैः तच्छिष्यप्रशिष्यैश्च ते वेदाः बहुशाखात्मकत्वेन प्रचारिताः विभक्तशाखागतसंख्यया तास्ताः शाखाः परिमिता अपि "अनन्ता वै वेदाः"इति श्रुत्यनुरोधात् युक्तितश्च अनन्ताः वेदशाखाऽपि सन्तीति वक्तुं शक्यत एवेति वेदस्य अनन्तत्वं सिद्धम् । सोऽयमनन्तो वेदः अपौरुषेयः नित्यः स्वतः प्रमाणं भगवत्स्वरूप इति मीमांसाशास्त्रे साधितः । अनेन शब्दतः वेदमहिमा वर्णितः । अर्थतः वर्णनीयः एतन्महिमोपेतः वेदः कर्मज्ञानभेदेन काण्डद्वयात्मकः । कर्मकाण्डे बहूनि कर्माणि विहितानि । "वेदा हि यज्ञार्थमभिप्रवृत्ताः ।" (श्री लगथज्यो-

तिपम्) यज्ञो नाम देवतोद्देशेन द्रव्यत्यागात्मक इति निश्चितम् । वेदेषु पूर्वकाण्डे यज्ञस्वरूपाणि कर्माणि अग्निहोत्र इष्टि, पशु, सोमरूपाणि । तत्रापि नित्यनैमित्तिककाम्यरूपेण बहूनि कर्माण्यभिहितानि । ज्ञानकाण्डे तु प्राधान्येन ब्रह्मस्वरूपलक्षणे विचारिते । किमर्थमिति चेत् पूर्वकाण्डोक्तकर्मस्वरूपधर्मानुष्ठानेन चित्तशुद्धौ संपादितायां परमपुरुषार्थं मोक्षं प्राप्तुं ब्रह्मज्ञानमावश्यकम् । तदर्थं ज्ञानकाण्डे चित्तैकाग्र्यमावश्यकमिति चित्तैकाग्र्यसंपादनार्थं प्रसंगानुप्रसंगतया बहून्युपासनान्यभिहितानि तेषां पूर्वोत्तरकाण्डयोरन्तर्भावमङ्गीकृत्य काण्डद्वयत्वेनैव व्यपदेशो भवति । उभयोरपि काण्डोक्तयोः धर्मब्रह्मणोः श्रेयस्साधनत्वमभ्यधायि । श्रेयस्साधनत्वेन रूपेण उभयोरविशिष्टत्वेऽपि श्रेयःसापेक्षं निरपेक्षमिति भेदो वर्तते । तत्र कर्मजन्यं श्रेयः अभ्युदयापरपर्यायम् । ब्रह्मज्ञानजन्यं श्रेयस्तु निःश्रेय इति मोक्ष इति च व्यपदिश्यते । "ज्ञानादेव हि कैवल्यं तरति शोकमात्मवित् ।" इत्याद्युपनिषद्वाक्यैः साक्षात्कैवल्यसाधनं ज्ञानमेवेत्येवकारेण अन्यव्यवच्छेदोऽप्यभिधीयते ।

यतो हि साक्षान्मोक्षसाधनत्वं ज्ञानस्योच्यते अतो हि ज्ञानस्यैव प्राधान्यमित्यवसीयते यद्यपि, तथापि कर्मानुष्ठानमन्तरा विविदिषा न संभवतीति" "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ।" एष एव विदित्वा मुनिर्भवति । बृ आ. औपनिषदं वाक्यमभिधत्ते । अत एव श्रीशङ्करभगवत्पादाः बृ. आ. भाष्ये "किं ज्योतिरयं पुरुष इत्येवमादि षष्ठप्रपाठकविहितायां तस्यां ब्रह्मविद्यायामेव फलायां काम्यैकदेशवर्जितं कृत्स्नं कर्मकाण्डं तादर्थ्येन विनियुज्यते इत्याद्युक्त्वा अग्रे "वेदानुवचनशब्देनापि किमुच्यत इत्याकांक्षायां" "तस्मात्कर्मैव वेदानुवचनशब्देनोच्यत इति गम्यते । कर्म हि नित्यस्वाध्यायः । कथं पुनः नित्यस्वाध्यायादिभिः कर्मभिरात्मानं विविदिषन्ति नैव हि, तान्यात्मानं प्रकाशन्ति यथोपनिषदः, नैष दोषः ।

कर्मणां विशुद्धहेतुत्वात् कर्मभिस्संस्कृता हि विशुद्धात्मानः शक्नुत्यात्मानमुपनिषत्प्रकाशितमप्रतिबन्धेन वेदितुम् इत्युक्त्वा दानतपश्शब्दा-

र्थाऽपि विवृतम् "वेदानुवचनयज्ञदानतपश्शब्दैः सर्वमेव नित्यं कर्म उपलक्ष्यते। एवं काम्यवर्जितं नित्य कर्मजातं सर्वमात्मज्ञानोत्पत्तिद्वारेण मोक्षसाधनत्वं प्रतिपद्यते। एवं कर्मकाण्डेन अस्य एकवाक्यतावगतिः" इत्यादिना द्वयोः काण्डयोरेकवाक्यता नित्यकर्मणामेव विविदिषोत्पत्तिद्वारेण मोक्षसाधनत्व-मुक्तं चेत्यवसीयते। एव पूर्वोत्तरकाण्डयोः विषयभेदः निरूपितः।

प्रकृतमनुसरामः। पूर्वकाण्डे यानि बहूनि कर्माण्यभिहितानि इत्युक्तं तत्कर्मविचारार्थमेव प्रवृत्तं मीमांसाशास्त्रम्। अत एवोक्तं "धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् श्लो॰ वा॰। अत एव मीमांसाशास्त्र स्यापि अध्ययनविधिविहितत्व मी. शा. प्रथम ध्याय-प्रथमपाद-प्रथमाधि-करणे धर्मविचारशास्त्रं आरम्भणीयं न वा इति निर्णेतुं आदौ "स्वाध्यायोऽ-ध्येतव्यः" इत्यध्ययनविधिविहितस्य स्वाध्यायस्य न स्वर्गार्थत्वं, किन्तु अर्थ-ज्ञानार्थत्वमिति सिद्धान्तितम्।

यदा अर्थज्ञानार्थत्वं तदा तदर्थज्ञानं मीमांसाशास्त्रं विना अनुप-पन्नमिति अर्थज्ञानार्थत्वेन विहितस्वाध्यायाध्ययनविधिनैव मीमांसाशास्त्र-स्यापि अध्ययनविधिः सिद्ध्यतीति तेनैव मीमांसाशास्त्रमपि विचारणीय-मित्युक्तम्। तथा हि :- प्रथमाध्याये श्रुतिस्मृत्यादीनां धर्मं प्रति प्रामाण्य-विचारः। द्वितीये कर्मभेदविचारः, तृतीये विहितकर्माणां मध्ये शषशेषि-भावविचारः, चतुर्थे कर्मणां ऋत्वर्थ-पुरुषार्थविचारः, पञ्चमे प्रयोगप्राधु-भावसिद्धयर्थं कर्मानुष्ठानसमये कर्मणां कीदृशः क्रमः अवलम्बनीय इति विचारः, षष्ठे तावत् कस्मिन् कर्मणि कीदृशस्य अधिकारः अधिकारानु-सारेण विनियोगो वा विनियोगानुसारेण अधिकारो वा काम्यकर्मसु साङ्ग-प्रधानानुष्ठानशक्तिमत एव अधिकारः उत नित्यनैमित्तिकात् यथाशक्त्य-ङ्गानुष्ठानेनाप्यधिकारः। मुख्यद्रव्येणैव काम्यकर्मानुष्ठानं कर्तव्यं उत प्रतिनिधिद्रव्येणापि, काम्यकर्मणः संकल्पानन्तरं मुख्यद्रव्यस्यापचारे तदानीं कर्म समापनीयं न वा, यदि समापनीयं स्यात् प्रतिनिधिद्रव्योपादानं संभवति न वा? तादृशस्य कर्मणः कीदृशं फलमित्यादि बहु विचारः, सप्तमे विकृ-तिषु सामान्यतः अतिदेशविचारः। अष्टमे अतिदेशविशेषविचारः। नवमे

कर्मसु विनियुक्तानां मन्त्राणां ऊह विचारः, दशमे तावत् बाधविचारः प्रकृतितः विकृतिषु अतिदेशप्राप्तानां कस्य बाध इति एकादशे केषां कर्मणां तन्त्रत्वेन अनुष्ठानमिति विचारः द्वादशे केषां कर्मणां प्रसङ्गसिद्धिरिति विचारश्च कृतः। एतद्विचारान्तरा अनुष्ठातारः याज्ञिकाश्च कस्मिन्काले कस्मिन्देशे कीदृशेषु कर्मसु कादृशामधिकार इति निर्णेतुं नेशते। किञ्च मीमांसाशास्त्रनिर्दिष्ट-न्यायानवलम्ब्य प्रयोगकाले केवलं कल्पशास्त्रज्ञा अपि बहुभिः सूत्रकारैरुक्तेषु विरुद्धेषु संशयग्रस्तेषु च विविध-विषयेषु च संशयापनोदनाय न पार्यन्ते। अतः विना मीमांसाशास्त्रं तत्तद्यागानुष्ठानकाले प्रयोगज्ञानमात्मानं न लभते। एवमेव केवल मीमांसा शास्त्रज्ञा अपि कर्मानुष्ठानकाले तत्तत्कर्म कर्तुं कारयितुं वा प्रयोगशास्त्रज्ञानं विना न प्रभवन्ति।

अत एवोक्तं मी. शा तन्त्रवार्तिके कल्पसूत्राधिकरणे 229

"के पुनः कल्पाः कानि सूत्राणीति— उच्यते।

"सिद्धरूपः प्रयोगो यैः कर्मणामनुगम्यते।
ते कल्पा लक्षणार्थानि सूत्राणीति प्रचक्षते॥

कल्पनाद्धि प्रयोगाणां कल्पोऽनुष्ठानसाधनम्।
सूत्रं तु सूचनात्तेषां स्वयं कल्प्यप्रयोगकम्।
कल्पाः पठितसिद्धा हि प्रयोगाणां प्रति क्रतु।
बौधायनीयवाराह-मशकादि प्रबन्धवत्॥

स्वसंज्ञापरिभाषाभिर्यदुत्सर्गापवादनम्॥

हेतुदृष्टान्तवत्सूत्रं तल्लक्ष्यव्यापि लक्षणम्।
आश्वलायनकं सूत्रं बैजाकपि कृतं तथा॥
द्राह्यायणीय-लाटीय-कात्यायन-कृतानि च॥

इति वार्तिकेन प्रयोगकाले कल्पशास्त्रस्य आवश्यकता निरूपिता। अन्येषामपि "रक्षोहागमलघ्वसन्देहाः प्रयोजनं व्याकरणम्" इति व्याकरणादिशास्त्राणाम् आवश्यकतायास्सत्त्वेऽपि तदपेक्षया मीमांसाकल्पशास्त्रयोः

सम्यग्वेदार्थज्ञाने तदुदितकर्मानुष्ठाने च अन्तरङ्गविधया उपयोग इति नात्र पृथग्वक्तव्यम् ।

अत एव मीमांसाशास्त्रे तावत याज्ञिकाः एवं वदन्ति इति तत्र तत्र उल्लिख्यते । ये तावत् मीमांसाशास्त्रज्ञानसहितप्रयोगशास्त्रज्ञाः तान् मीमांसकाः याज्ञिका इति समाचक्षते । अत एव तान् याज्ञिकान् मीमांसकाः प्रमाणतया उररीकुर्वन्ति ।

तादृशा एव तत्तत्कर्माणां यष्टारः याजयितारश्च भूयासुरिति निश्चप्रचोऽयं विषयः । त एव वेद मीमांसाकल्पशास्त्राभिज्ञाः नित्यकाम्यानि विवेचयितुं अनुष्ठातुं अनुष्ठापयितुं च शक्नुवन्ति । एते अतीव विरलविरलाः एव भवेयुः । बहूनां तज्ज्ञानसंपादनं दुःशकं भवेत् अत एव त्रिकाण्डमण्डने त्रयः यागाधिकारिणः प्रदर्शिताः तथा हि—

"स्वाध्यायविधिसंसिद्धकृत्स्नवेदार्थवेदनः"
यद्वाऽध्ययनसंसिद्धानुष्ठेयमखमात्रवित् ।।
यद्वाऽध्ययनसंसिद्ध-विज्ञानरहितोऽपि सन् ।
नातीवाधिक्रियाशून्यो भर्तृयज्ञादिदर्शनात् ।। त्रि. मं. 1-40-41

अध्ययनविधिचोदितषडङ्गसकलस्वशाखापरपर्याय-वेदाध्ययनसंसिद्धार्थज्ञानवत्त्वमधिकारितावच्छेदकम् । अनेन प्रथमाधिकारी निरूपितः ।

यद्वेति पक्षान्तरं स्वाध्यायविध्युत्थापित-अनुष्ठेय-मात्रोपयोगिस्वाध्यायार्थज्ञानवत्त्वं अधिकारितावच्छेदकम् इति द्वितीयाधिकारी निरूपितः ।

पुनः यद्वेति पक्षान्तरमुच्यते — अध्ययनविधिसिद्ध-अध्ययनवत्त्वमेव अधिकारिविशेषणम् । नार्थज्ञानवत्त्वमेव । तेन अर्थज्ञानाभावे कर्मणि अधिकारो नास्तीति वक्तुं न युक्तमिति भावः । तदर्थे सम्मतिमपि दर्शयति । भर्तृयज्ञादिदर्शनात् भर्तृयज्ञकृतनिबन्धेषु भाष्यरूपेषु दृष्टत्वात् अनेन अर्थज्ञानं माभूदिति न । सत्यर्थज्ञाने भूयसी फलसिद्धिः । एवं त्रिविधअधिकारितावच्छेदकधर्मयुक्तानां यष्टृणां त्रयाणामधिकारः उक्तः ।

एवमेव सत्याषाढादि श्रौतसूत्रग्रन्थेषु याजयित्वृणां ऋत्विजामपि आत्विज्याऽधिकारलक्षणान्याह । तथा हि—

"ब्राह्मणानार्षेयानृत्विजः षोडशैकैकशो वृणीते" इति स॰ श्रौ॰ 10-1-4. अत्र व्याख्याने गोपीनाथभट्टमहोदयैः "अत्र ब्राह्मणशब्देन क्षत्रियवैश्ययोर्निवृत्तिरिति" ब्राह्मणानामेवात्विज्यम् सर्वत्रतूनाम् इति सूत्रकारान्तरेणापि स्मरणाच्च । ऋत्वर्थत्वेनैव नियमबोधकम् । अत एव रामायणे—

"क्षत्रियो याजको यस्य चण्डालस्सविशेषतः ।
कथं सदसि भोक्तारः हविस्तस्य सुरर्षयः ।।" इति

तथा "राजयाजकयाज्यस्य विनश्यति यथा हवि" इति वचनं क्रतुवैगुण्यबोधकमेव । एतेन क्षत्रियादि वृत्त्युपजीविनोऽपि निरस्ताः । किञ्च ब्राह्मणानामार्त्विज्यम् इत्यत्र लिङ्गान्यपि । "ब्राह्मणानामिदगँ हवि" रित्यादीनि द्रष्टव्यानि । तस्माद्ब्राह्मणानामेवार्त्विज्यमिति सिद्धान्तः ब्राह्मणवचनमापद्यपि क्षत्रियादिनिवृत्त्यर्थमिति मीमांसकाः ।

"द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः
ब्राह्मणार्त्विज्यनियमः ऋत्वर्थे नापि हि स्मृतः ।।" इति मिश्राः ।

आर्षेयानिति :—

"ये स्वानृषीन्जानन्ति ते आर्षेयाः" एतेन अप्रज्ञातबान्धवानां निवृत्तिः । शुश्रुवांसश्च आर्षेयाः । "एष वै ब्राह्मणऋषिरार्षेयो यश्शुश्रुवान् इति श्रुतेः ऋषयः मन्त्रद्रष्टारः" ऋषिर्दर्शनादिति" निरुक्तम् । शुश्रुवान् = सार्थवेदत्रयाध्यायी स्वशाखामात्राध्यायी वा ब्राह्मणानार्षेयानिति अन्येषां शाखान्तरोक्तानामुपलक्षणम् । तथा हि "आर्षेयान्, यूनः अनूचानानृत्विजो वृणीते, सोमेन यक्ष्यमाणश्चतुरस्सर्वानेवेति" शांखायनसूत्रम् । वसन्ते ज्योतिष्टोमेन यजमानो ब्राह्मणानार्षेयानृत्विजो वृणीते यूनस्स्थविरान् अनूचानान् अनङ्गहीनानूध्वेवं च" इति भरद्वाजसूत्रम् ।

एवमेव आपस्तम्बोऽपि, यूनः = तरुणान् तेषामेव प्रकृतोपयोगात् । अत एव न च बालान् न वृद्धान्, त्रिंशद्वर्षोत्तरं षष्टिपर्यन्तं स्थविरत्वम् बाल-

वृद्धयोः क्रियासु पाटवं न स्यादिति यूनस्थविरग्रहणम् । साङ्गस्य वेदस्य अध्येता प्रवक्ता वा अनूचानः । न अनूचानः अननुचानः "अननूचानमृत्विजं न वृणीते" इति निषेधात् साङ्गवेदाध्यायिनमेव ऋत्विजं वृणुयात् इत्यर्थः । अनूचानो द्विविधः । वेदानूचानः, कर्मानूचानश्च । केवलवेदानूचानस्य कर्म कर्तुमशक्तेरर्थान्निषेधः केवलकर्मानूचानस्य शक्तत्वात् प्राप्तिः स्यात्, सा मा भूत् । किंतु द्विविधअनूचानत्व-रहितस्यापि निषेधो यथा स्यादित्येवमर्थम् । अनेन संप्रदायसिद्धवेदाध्ययनवंशसंजातः स्वयमपि वेदाध्यायी परम्परागतकर्मप्रयोक्तृवंशोत्पन्नोऽपि यः, सः "ब्राह्मणमद्याराध्यासमृषिमार्षेयपितृमन्तं पैतृमत्यम् इति श्रुतिबलाच्च आर्त्विज्याधिकारीति ज्ञायते । ऊर्ध्ववाचः — उरः कण्ठः शिर इति त्रिस्थानकरणसामर्थ्यं येषां ते ऊर्ध्ववाचः । अनङ्गहीनाः अविकलाङ्गाः अन्यूनातिरिक्ताङ्गा इत्यर्थः ।

अनेन एतल्लक्षणोपेताः आर्त्विज्ये मुख्याधिकारिण इति प्रादर्शि । मुख्याधिकारिणामसंभवे ब्राह्मणत्वादिलक्षणविशिष्टाः अनुष्ठाप्यमानमखमात्रविदः द्वितीयाधिकारिणः । तत्तत्कर्मविषयक-अर्थज्ञानाभावेऽपि केवलप्रयोगज्ञाः तृतीयाधिकारिणः इत्यवसीयते ।

एवं यष्टृगत-याजयितृगत अधिकारितावच्छेदक विशेषणजातं मुख्यगौणभेदेन नित्यकर्मानुष्ठानस्य सर्वथा विच्छेदो मा भूदित्यस्मदनुजिघृक्षया शास्त्रकारैः त्रेधा विभक्तमित्यवगन्तव्यम् ।

यद्यपि यष्टृणां याजयितृणां च सर्वेषां साङ्गं मीमांसाशास्त्रसहितकृत्स्नवेदार्थज्ञानमावश्यकम्, तथापि उपरि प्रदर्शितानां मध्ये द्वितीयाधिकारिणः कृत्स्नमवगन्तुं, तृतीयाधिकारिणः सुतरामवगन्तुं च न पार्यन्ते । वेदे कर्माणि विहितान्यपि तत्तत्कर्मसंबन्धिनः बहवो विषयाः मीमांशाशास्त्रे द्वादशसु अध्यायेषु विचारिताः, तत्रापि प्राधान्येन नित्यकाम्यविषयाः मीषष्ठाध्याये न्यायरत्नमालायां च विचारितास्सन्तः प्रकीर्णा अभूवन् । एवमेव आपस्तम्ब-आश्वलायन, कात्यायन, सत्याषाढ, द्राह्यायण, लाटचायनादि कल्पसूत्रग्रन्थेष्वपि तत्तत्कर्मप्रयोगविषयाः अभिहिताः । गौतममहर्षिणा

तावत् चत्वारिंशत्संस्कारा इति तन्मध्ये अग्निष्टोमादिसंस्था अपि परिगणिताः। अतः ते संस्कारा नित्या इति बहुभिरुद्घोष्यते। मीमांसकमते तावत् अग्निष्टोमातिरिक्तास्संस्थास्सर्वा अपि काम्या इति तासां काम्यत्वं सूपपादम्। कति संस्थाः? संस्थाशब्दार्थः कः? वाजपेयः कति विधः? संस्थान्तर्गतो वाजपेयः संस्थावाजपेयः उत अन्यः, आप्तवाजपेय-कुरुवाजपेयौ काम्यौ उत नित्यौ· तेषां प्रयोगभेदः कीदृशः उभयत्र वाजपेय इति नाम्नः प्रवृत्तिनिमित्तभेद अस्ति वा काम्यानामपि कर्मणामनुष्ठाने आवश्यकता अस्ति वा? तदनुष्ठाने प्रत्यवायो अस्ति वा? अस्मिन्विषये वेदान्तिनामपि मते परंपरया कर्मणामपि ज्ञानोपयोगस्य अभ्युपेतत्वात् तानि कर्माणि नित्यानि उत काम्यानीति विचारः तेषामपि अवसरतया प्राप्तः। अतः तेषां सिद्धान्तः कः? काम्येष्वपि नित्यकर्मसु विद्यमानयथाशक्तिन्यायः योजनीयो न वा? क्वचिदन्यथा विहितानि कर्माणि अन्यथाकर्तुं शक्यन्ते न वा? तथाकरणे प्रत्यवायः उत क्रतुवैगुण्यं उत उभयमपि इत्यादयः बहुषु शास्त्रग्रन्थेषु च विप्रकीर्णतया विचारिताः तत्सर्वावबोधनमतीव प्रयाससाध्यम्। तदनवगमे शास्त्रमुल्लंघ्य अनुष्ठितत्वात् स्वस्व प्रत्यवायः क्रतुवैगुण्यं च तेन अनर्थोत्पत्तिरिपि भविष्यतीति ज्ञात्वा तन्मा भूदिति मीमांसादर्शन-श्लोकवार्तिक-तन्त्रवार्तिक, भाट्टदीपिका, शास्त्रदीपिका, न्यायरत्नमालादिग्रन्थान् आपस्तम्ब, सत्याषाढादि सूत्रग्रन्थान् अन्यांश्च धर्मशास्त्रग्रन्थान् सायणभाष्यं च सम्यक् परिशील्य तत्र तत्र स्थान् सिद्धान्तानेकत्र समाकलय्य परस्परविरोधपरिहाराय व्यवस्थाप्य च सङ्ग्रहीतुमयं नित्यकाम्यकर्ममीमांसाभिधो ग्रन्थः पञ्चाऽध्यायात्मकः, धर्ममवैकल्येन सम्यगनुष्ठास्याम इत्यभियुक्तानाम्· अलूक्षाणाम्· धर्मैककाम्यानाम्· धर्मश्रद्धानाम् नित्य-नैमित्तिक-कर्मसु अतीव श्रद्धामाधापयितुं तदनुष्ठानं चित्तशुद्धिसम्पादनद्वारेण परम्परया मोक्षसाधनत्वेन भवितुमर्हतीत्यवगन्तुं च उपकरिष्यतीति धिया अयं ग्रन्थः सप्रमाणम् मया व्यरचि।

अत्र प्रथमाध्याये धर्मस्वरूपलक्षणविचारः कृतः। धर्मं प्रति वेद एव प्रमाणम्। वेदः प्रमाणमेवेति सिषाधयिषया वेदस्य अपौरुषेयत्वं स्वतः

प्रामाण्यं च प्रसङ्गानुप्रसङ्गेन वैयाकरणमीमांसकादिमतभेदेन कश्शब्दः? शब्दः नित्यो न वा, शब्दस्य कीदृशे अर्थे शक्तिः, वाक्यस्य वाक्यार्थे शक्तिरस्ति, न वा इत्यादि विचारः कृतः।

द्वितीये अध्याये अग्निष्टोमातिरिक्ताः संस्थाः नित्याः उत काम्याः कति संस्थाः। अत्र कल्पसूत्रकारमीमांसकमतभेदः संस्थाशब्दार्थः, अन्यासु संस्थासु अन्यासां संस्थानां निवेशः कथम्? सामवेदीयताण्ड्यब्राह्मण-तैत्तिरीयशाखाद्युक्तरीत्या अग्निष्टोमोक्थ्यादयः कति वर्तन्ते? इति।

तृतीये अध्याये वाजपेयः कति विधः, को वाजपेयः संस्थान्तर्गतः कः काम्यः, तयोः नामधये प्रवृत्तिनिमित्तभेदः प्रयोगभेदोऽप्यस्ति वा? इत्येतादृशविचारः चतुर्थाध्याये काम्यकर्मणां नित्यकर्मवत् अननुष्ठाने प्रत्यवायाऽभावेऽपि सुरापानादिवत् काम्यकर्मणां वेदेन अनिषिद्धत्वात् तदनुष्ठाने प्रत्यवायः अस्ति वा? प्रत्यावायाऽभावेऽपि मीमांसकमतरीत्या तदनुष्ठाने आवश्यकता नास्तीति न तु केवलं मीमांसकमतरीत्या वेदान्तमतेऽपि "तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन।"

बृ. आ. उपनिषद्वाक्येन कर्मणां विविदिषार्थत्वं तत्परंपरया मोक्षार्थत्वं चेत्यङ्गीकृतत्वेऽपि अत्र यज्ञशब्देन नित्यकर्माण्येव ग्रहीतव्यानि न काम्यानि, तेषामावश्यकता नास्तीति श्रीशङ्करभगवत्पूज्यपादप्रभृतिभिः बहुभिः तपस्विभिः बहुशास्त्रविद्भिश्च निरूपितमिति काम्यकर्मणामनावश्यकताविचारः।

पञ्चमाध्याये कर्मानुष्ठानविषये शास्त्रविधिमुल्लंघ्य स्वबुद्ध्या अन्यथान्यथानुष्ठाने धर्मपरिवर्तनं भविष्यति। तेन क्रतुवैगुण्यं प्रत्यवायश्च तेन तत्तत्कर्मभ्यः अन्यथाफलोत्पत्तिश्च भविष्यतीति सप्रमाणं वैगुण्यादिविचारश्च कृतः। अस्मिन्विचारे, भ्रमप्रमादादिकृताः यदि दोषाः स्युः तान्दोषानपगमय्य-

"न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः ।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥"

इति श्लो वा. श्रीभट्टपादोक्तरीत्या समीचीनेन मनसा गुणानेव स्वीकुर्वन्त्विति विबुधजनानां पुरतः सप्रश्रयं साञ्जलिबन्धं विज्ञाप्यते । किञ्च—

यदक्षरपदभ्रष्टं मात्राहीनं तु यन्मुद्रितम् ।
तत्तु ग्रन्थानुगुण्येनैव योजयन्त्विति कामये ॥

इत्थम्
विबुधजनविधेयः
रेमिळ्ळ सूर्यप्रकाशशास्त्री

शुक्लनामसंवत्सरे
कार्तिकशुक्लत्रयोदशी
११-११-१९८९

श्री गुरुभ्यो नमः

हरिः ओम्

नित्यकाम्यकर्ममीमांसा

प्रथमोऽध्यायः

धर्मविचारः

हेरम्बचरणौ वन्दे ग्रन्थविघ्नोपशान्तये ।
यस्यानुग्रहमाश्रित्य वितन्वन्तेऽखिलाः क्रियाः ॥

अनादिनिधनं नित्यं सर्वविज्ञानदायकम् ।
नमामि तं वेदरूपं सच्चिदानन्दलक्षणम् ॥

काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः ॥

वेदविद्यागुरुं तातं वन्दे बापन्नदीक्षितम् ।
प्रसवित्रीं सुब्बमाम्बां प्रत्यहं प्रणतोऽस्म्यहम् ॥

वेदविद्यागुरुञ्चान्यं पितृव्यं मयि वत्सलम् ।
जगन्नाथाभिधं वन्दे श्रद्धाभक्तिपुरस्सरम् ॥

गुरुं सिद्धान्तकौमुद्यां साहित्यस्यापि कोविदम् ।
चिलुकूरिवंशसञ्जातं वन्दे पापय्यशास्त्रिणम् ॥

तङ्गिरालकुलोद्भूतं सूर्यसुब्बावधानिनम् ।
तर्कप्रकरणानां तं बोधकं भावये हृदि ॥

बृहस्पतिसमं बुद्ध्या चतुश्शास्त्रविपश्चितम् ।
मीमांसाशास्त्रवक्तारं वन्दे साम्बशिवाभिधम् ।।

मीमांसागुरुमन्यञ्च वन्दे वीरेशशास्त्रिणम् ।
वेदान्तगुरुमीडेऽहं श्रीनृसिंहविपश्चितम् ।।

वेदभाष्यप्रवक्तारं गुरुमन्नावधानिनम् ।
अग्रजं वेदशास्त्रज्ञं श्रद्धया प्रणतोऽस्म्यहम् ।।

वेदवंशाब्धिसञ्जातः वेदशास्त्रविशारदः ।
सूर्यप्रकाशाभिधोऽहं व्यरचं विनयान्वितः ।।

मीमांसकमतेनेमं नित्यकाम्यविवेचकम् ।
कर्ममीमांसाभिधं ग्रन्थमनुष्ठानोपयोगिकम् ।।

अद्यतनकाले वेदाध्ययनाध्यापनतदुदितकर्मानुष्ठातारश्च अतीव विरलविरला एव दृश्यन्ते । यदि स्युः केषु कर्मसु कीदृशामधिकारः कीदृशां नेतीति विचारमन्तरा नित्यानि काम्यानि च अविशिष्टानीति तेषां सर्वेषां वेदचोदितत्वात् वेदचोदितं कर्म धर्म इति बुद्ध्या नित्याग्निहोत्रदर्शपूर्णमास-ज्योतिष्टोमादिवत् अकरणे प्रत्यवायाजनकत्वेऽपि नित्यानीव काम्यानि पौण्डरीकवाजपेयादीन्यप्यनुतिष्ठेयुः । देशकालपात्रविवेचनमन्तरा यद्यन-धिकारकृतं कर्म स्यात् तदनर्थसाधनमेव भवेत् । तदेवोक्तं मनुना—

"अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु"

इति । एवमेव न्यायप्रकाशे विनियोक्त्रीश्रुतिप्रदर्शनावसरे "पशुना यजेत" इत्यत्र एकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम् इत्युक्तम् । अतः पुम्पशुरेव एक एव अग्नीषोमीयादिषु आलब्धव्यः । अत्र वासुदेवशास्त्रिकृतायां "प्रभा" व्याख्यायां "अत एव तत्र यागसाधनीभूतः पशुः एक एव पुमानेव च आलभ्यते । अजायाः स्त्रियः आलम्भने तु अविधिरेवेति नापूर्वोत्पत्तिः प्रत्युत अनिष्टमेव आपद्येतेति भावः"—इत्युक्तम् ।

अत एवेदानीं कस्मिन् कर्मणि कस्याधिकारः कस्य नेतीति निरूपणार्थमादौ धर्माधर्मलक्षणस्वरूपविचारः क्रियते। तत्र किमर्थमेष विचारः इत्याशङ्क्य "इष्टप्राप्त्यनिष्टपरिहाराय धर्माधर्मौ निरूपणीयौ" इति सामान्यतः विशेषतश्च धर्माधर्मविचारः कृतः द्वादशलक्षण्यां मीमांसायाम्। तत्र भाष्ये– "अथाऽत" इत्यत्र "धर्मः प्रसिद्धो वा स्यादप्रसिद्धो वा ?" यदि धर्मः प्रसिद्धस्स्यात् न जिज्ञासितव्यः, यद्यप्रसिद्धः सुतरां तदेतदनर्थकं धर्मजिज्ञासाप्रकरणमित्युक्त्वा "अथवा अर्थवत् धर्मं प्रति विप्रतिपन्नाः बहुविदः केचिदन्यं धर्ममाहुः केचिदन्यम्। तथाहि-तत्र षट् पक्षाः सन्ति।

1. तत्र मनसः वृत्तिविशेषौ धर्माधर्मौ। आद्यः यागादितः, द्वितीयो ब्रह्मवधादितः जायत इति सांख्याः।

2. क्षणिकविज्ञानवादिनः बौद्धाः, ते तावत् क्षणिकविज्ञान-सन्तानघटकस्य ज्ञानस्य पूर्वविज्ञानान्तरजन्ये शुभाशुभे वासने एव धर्माधर्मौ इति वदन्ति।

3. पुद्गलाख्याः कायारम्भनिमित्तभूताः परमाणव एव शुभाशुभ-कर्मवासनावासिताः धर्माधर्मावित्यार्हताः।

4. जीवात्मनः विशेषगुणौ धर्माधर्माविति वैशेषिकाः। तदुक्तं तैः–

"विहितक्रियया साध्यः धर्मः पुंसो गुणो मतः।
प्रतिषेधक्रियासाध्यः पुंगुणोऽधर्म उच्यते॥" इति।

5. अपूर्वमेव शुभम् अशुभं च धर्माधर्माविति प्राभाकरा इति बहवः पक्षास्सन्तीति आलोच्य भगवान् श्रीजैमिनिमहर्षिः "अथातो धर्म-जिज्ञासा" इति सूत्रयामास। अत्र शबरस्वामी—

"सोऽयमत्र अविचार्य प्रवर्तमानः कञ्चिदेव उपाददानः विहन्येत अनर्थं च ऋच्छेत्। तस्मात् धर्मो जिज्ञासितव्यः स हि निःश्रेयसेन पुरुषं संयुनक्तीति प्रतिजानीमहे।"तदभिधीयते। "चोदनालक्षणोऽर्थो धर्मः" इति।

एतत्सूत्रभाष्यवार्तिककारैः भट्टपादैः उपरितनपञ्चपक्षाः निराकृताः। तथा हि—

"अन्तःकरणवृत्तौ वा वासनायां च चेतसः।
पुद्गलेषु च पुण्येषु नृगुणेऽपूर्वजन्मनि ॥

प्रयोगधर्मशब्दस्य न दृष्टो न च साधनम्।
पुरुषार्थस्य ते ज्ञातुं शक्यन्ते चोदनादिभिः ॥

न च वस्त्वन्तरं शक्यमपूर्वं स्वर्गयागयोः।
ज्ञातुं साधनभूतं वा साध्यं वा नाप्यतोऽन्यथा ॥

श्रुतसाधनसाध्यत्वत्यागेनाश्रुतकल्पना।
प्रसज्येतास्य तादूप्ये व्यतिरेके त्वरूपता ॥

तस्मात् फले प्रवृत्तस्य यागादेश्शक्तिमात्रकम्।
उत्पत्तौ वापि पश्वादेरपूर्वं न ततः परम् ॥

शक्तयस्सर्वभावानां भावशब्दैर्विशेषिताः।
नोपाख्यायन्त इत्येवं नाऽपूर्वे धर्मशब्दता ॥"

—इति श्लोकवार्तिके

अयमाशयः। उक्तपक्षपञ्चकं न युक्तम्। मनोवृत्त्यादिषु धर्मशब्दप्रयोगस्य क्वचिदप्यदर्शनात्, किं च श्रेयस्साधनेष्वेव धर्मशब्दः लोके प्रसिद्धः। श्रेयस्साधनता च मनोवृत्त्यादौ नास्त्येव, प्रमाणाभावात्। बाह्येषु आगमाभासेष्वपि चैत्यवन्दनादीनामेव तत्र श्रेयःसाधनता अवगम्यते। न तु वासनादीनां किमुत? वेदचोदनाचोदितासु। अथ मा नाम मनोवृत्त्यादीनां, क्वचिदपि श्रेयस्साधनतावगमः। ननु अपूर्वस्य तु "तेन अपूर्वं कृत्वा नाऽन्यथा" इति त्वयैव "चोदना पुनरारम्भः" इति सूत्रे वक्ष्यमाणत्वात् सा त्वां प्रत्यपि जागर्त्येव। तथा च अपूर्वं कथं न धर्मपदार्थः इति चेन्न। साध्यसाधनभावापन्नाभ्यां स्वर्गयागाभ्याम् अतिरिक्तस्य वस्त्वन्तरस्य अपूर्वस्य अत्यन्ताप्रामाणिकत्वात्। तथा हि – तत् साध्यरूपं साधनरूपम् उभयरूपं

वा भवेत् । तत्र साध्यरूपत्वे सति "स्वर्गकामो यजेत" इति स्वर्गनिष्ठस्य साध्यत्वस्य तथाभूतस्य यागनिष्ठस्य साधनत्वस्य च हानिप्रसङ्गात् । अश्रुतस्यापूर्वस्य साध्यत्वेन साधनत्वेन कल्पनाप्रसङ्गाच्च । नापि तुरीयः पक्षः, प्रयोजनप्रमाणविहीनत्वात्, अपूर्वरूपस्यैव भङ्गप्रसङ्गाच्च । "चोदना पुनरारम्भः" इति सूत्रेण अपूर्वमस्तीति यतः समर्थ्यते, अतः तद्विरोधोऽपि प्रसज्यते । अतः अपूर्वं नास्तीति न वक्तव्यम् । किन्तु फलं साधयितुं अभिप्रवृत्तस्य यागादेः शक्तिमात्रमपूर्वं यद्वा उत्पत्तौ प्रवृत्तस्य पश्वादेः फलस्य सूक्ष्मावस्था शक्तिरेव अङ्कुरस्थानीया अपूर्वं, न तु ततः पृथग्भूतं वस्त्वन्तरं स्वतन्त्रम् ।

न च तथापि तस्य धर्मपदार्थत्वे किं बाधकमिति वाच्यम् । लोके तत्र धर्मशब्दप्रयोगाभावरूपस्य बाधकस्य अनुपदमेव उक्तत्वात् ।

चोदनासूत्रार्थविवरणम्

अत्र "चोदनालक्षण" इत्यत्र चोदनैव प्रमाणं, चोदना प्रमाणमेवेति-इति द्वेधा विग्रहः । किं च सर्वेषामेव पदार्थनां शक्तयः शक्तिसामर्थ्यादि-पदैरभिधीयन्ते । न चासौ धर्मशब्दः भावविशिष्टशक्तिवाची भवितुमर्हति । तदभ्युपगमे तु अपसिद्धान्तापातात् । तस्मात् नापूर्वं धर्मपदार्थं इति ।

एवं परिशिष्टः षष्ठः पक्षः, स एवोपपादितः सूत्रभाष्यवार्तिककारैः धर्मे अलौकिके लक्षणप्रमाणयोरसम्भवात् नरविषाणादिवत् तद्विचारो न कर्तव्य इति पूर्वपक्षे प्राप्ते "चोदनालक्षणोऽर्थो धर्मः" इति सिद्धान्तसूत्रमाह जैमिनिः । सूत्रस्य चायमर्थः । योऽयं निष्प्रमाणकप्रत्यक्षादिप्रमाणकचोदना-प्रमाणकत्वादीनां विप्रतिपत्तिविशेषाणां विषयभूतः साधारणात्मा धर्मपदार्थः स चोदनालक्षण इति । धर्ममुद्दिश्य चोदनाप्रमाणकत्वं विधीयते श्रुत्या । अर्थात् चोदनागम्य एव अग्निहोत्रादिः धर्म इति न तल्लक्षणचैत्यवन्दनादिः इति धर्मस्वरूपमपि सिध्यति। यश्चोदनालक्षणः स धर्म इति धर्मस्वरूपविधेः अर्थात् चोदनाप्रमाणकत्वं सिध्यति । अनेन अलौकिके धर्मे लक्षणप्रमाणयोः संभवात् धर्मविचारः कर्तव्य इत्येवं सिध्यति । (अनेन अलौकिके धर्मे

लक्षणप्रमाणयोः संभवात् धर्मविचारः कर्तव्यः इत्येवं सिध्यति ।) अनेन द्वेधा विग्रहः प्रदर्शितः । प्रथमविग्रहेण प्रत्यक्षादीनां धर्मं प्रति प्रामाण्यं नास्तीति । द्वितीयविग्रहेण चोदनायाः अप्रामाण्यशङ्का च व्यावर्त्यते । प्रथमतः सूत्रघटकचोदनापदार्थविचारः क्रियते । "चोदनेति क्रियायाः प्रवर्तकं वचनम्" इति भाष्यम् । तस्यायमर्थः-चोदना नाम क्रियायाः यत्किञ्चिदितिकर्तव्यताकयागविधिरूपायाः प्रवर्तकं प्रवृत्त्यनुकूलव्यापार-बोधकलिङादिप्रत्ययघटितं वचनम् । यथा "यजेत स्वर्गकामः" इत्यादि-वाक्यम् । तदेवोक्तं वार्तिककारैः—

"किमाद्यपेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ ।
तन प्रवर्तकं वाक्यं शास्त्रेऽस्मिन् चोदनोच्यते ॥"

यथा "यजेत स्वर्गकामः" इत्यादिवाक्यम् । लक्षणं नाम लक्ष्यते ज्ञायते अनेनेति लक्षणं ज्ञानजनकमित्यर्थः "अर्थः" इति लक्षणया स्वसाधनपरः । तथा च चोदनाजन्यप्रमाणविषयः अर्थात्मकस्वर्गरूपश्रेयस्साधनपरः ज्योतिष्टो-मादिः धर्म इति अत्र अर्थपदसार्थक्यम् । अनर्थो धर्मः मा भूदिति अर्थपदं फलस्वरूपपरम् । न हिंस्यात्सर्वाभूतानि इति निषिध्यमानमनर्थरूप-हिंसात्मकं फलम् । तादृशहिंसारूपफलसाधनत्वेन श्येनादयः "श्येनेनाभि-चरन् यजेत" इत्यादिभिः विधीयन्ते । यद्यपि फलस्य कुत्रापि विधेयत्वं नास्ति, तथापि प्रत्यवायजनकहिंसारूपफलसाधनत्वेन विहितश्येनादीनां परम्परया अनिष्टसाधनत्वेन तेषां धर्मत्वं मा भूदिति सूत्रे अर्थपदं गृहीतम् । अत एव भाट्टरहस्यादिषु "वेदविहितत्वे सति बलवदनिष्टाननुबन्धित्वं धर्मत्वम् । वेदेन निषिद्धत्वे सति बलवदनिष्टानुबन्धित्वमधर्मस्य लक्षण-मुपपादितम् ।

अत्र "चोदनालक्षणो अर्थ" इति धर्मलक्षणसूत्रे प्रदर्शितविग्रहद्वयं [illegible] किञ्चिद्विचारयामः ।

प्रामाण्यविचारः

प्रमाणानां स्वतःप्रामाण्यम् । अत्र चोदनैव लक्षणं प्रमाणं यस्येति इना, लक्षणमेव प्रमाणमेव इति चावधारणद्वयं प्रदर्शितम् । प्रथम-

विग्रहेण धर्मं प्रति चोदनैव प्रमाणमित्युक्तत्वात् परतन्त्रस्य शब्दस्य स्वातन्त्र्येण प्रामाण्यं, स्वतन्त्रस्य प्रत्यक्षादेश्च अप्रामाण्यमित्यवधारितं भवति। तदसंभावितमित्याक्षेपे प्राप्ते उच्यते। शब्दविशेषरूपस्य वेदस्य प्रामाण्यं साधयितुं प्रथमतः चोदनाशब्देन शब्दसामान्यं गृहीत्वा तस्य शब्दसामान्यस्य भूतभविष्यद्वर्तमानादिपदार्थग्रहणसामर्थ्यं विद्यत इति "चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं वदति। नान्यत् किं च नेन्द्रियम्" इत्युक्तं भाष्ये। इन्द्रियपदेन प्रत्यक्षादिकं गृह्यते। प्रत्यक्षं नाम, "सत्संप्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षं" इति सतः विद्यमानपदार्थस्य पुरुषेन्द्रियाणां चक्षुरादीनां च संयोगेन अयं घटः अयं पटः इत्यादिज्ञानं जायते तदेव प्रत्यक्षमिति व्यपदिश्यते। तत्प्रत्यक्षं इन्द्रियागम्यधर्मं प्रति अनिमित्तं अप्रमाणं कुतः? विद्यमानोपलम्भनत्वात् प्रत्यक्षस्य विद्यमानपदार्थोपलम्भकत्वात् इत्यर्थः। यतः प्रत्यक्षं अप्रमाणं तन्मूलकत्वेन अनुमानादिकमपि सुतराम् अप्रमाणम्। शब्दस्येव भूतभविष्यत्-वर्तमानादिपदार्थज्ञापकत्वाभावात्।

शब्दसामान्यस्यायं स्वभावः ज्ञानजनकत्वम्। अत एवोक्तं वार्तिककारैः—

"अत्यन्ताऽसत्यपि ज्ञानमर्थे शब्दः करोति हि।
तेनोत्सर्गे स्थिते तस्य दोषाभावात्प्रमाणता॥" इति।

ननु शब्दस्तावत् अत्यन्तासन्तमप्यर्थं नरविषाणादिकं ज्ञापयति कथं प्रमाणं भवितुमर्हतीति शङ्कामुत्थाप्य श्लोकवार्तिकव्याख्यायां तात्पर्यटीकायां श्रीभट्टोम्बेकः एवमवादीत्। तथाहि—ननु अत्यन्तासत्यपीत्यनेन न प्रकृतोपयोगः अत्यन्तासत्यपीत्यनेन अत्यन्तं असति सद्रूपं ज्ञानं शब्दः करोति इत्युच्यते। अतः प्रक्रमविरोधः। प्रमाणं चोदना, यतः अत्यन्तासत्यपि सत् इति ज्ञानं करोतीति विरुद्धाभिधानात्। तदनुपपन्नम्। इति तत्परिहाराय एवमर्थो वक्तव्यः। यद्यप्यनुष्ठेयरूपत्वात् वाक्यार्थः

अत्यन्तासन् प्रत्यक्षादीनामविषयः । तथापि तस्य तत्र प्रामाण्यं सम्भवत्येव । यतः तत्रापि शब्दः ज्ञानमुत्पादयति । अत एवोच्यते "तेनोत्सर्गे" इति तेन बोधकत्वात् औत्सर्गिकं प्रामाण्यं सम्भवतीति । शब्दसामान्यस्य त्रैकालिकार्थज्ञानजनकत्वेन प्रामाण्यमिति चोदना हि भूतं भवन्तम् इति भाष्यस्थचोदनाशब्दः व्याख्यातः—

"चोदनेत्यब्रवीच्चात्र शब्दमात्रविवक्षया ।
न हि भूतादिविषयः कश्चिदस्ति विधायकः ।।
इन्द्रियादिव्युदासेन शब्दो यावन्न साध्यते ।
तावच्च तद्विशेषस्य कुतो वाऽवसरो भवेत् ।।" इति

शब्दसामान्यस्येन्द्रीयादिव्युदासेन प्रामाण्यप्रसाधनमन्तरा शब्दविशेषस्य विधिवाक्यस्य प्रामाण्यकथनावसरो नास्तीत्यर्थः । तेन शब्दविशेषरूप-चोदनाया एव प्रत्यक्षाद्यनवगम्यमानं धर्मं प्रति प्रामाण्यं संभवतीत्यत्र न कोऽपि संशयः । अत्र सूत्रघटकचोदनापदेन पूर्वोक्तलक्षणानुसारेण लिङादि-घटितं विधिवाक्यमेव नोच्यते । किन्तु मन्त्रब्राह्मणसमुदायात्मकः वेदस्सर्वोऽपि गृह्यते । "प्रभावल्यां" शम्भुभट्टमहोदयैरप्येवमुक्तम् । तथाहि—जिज्ञासासूत्रे धर्मप्रमाणमात्रस्य प्रतिज्ञानात् । "वेदोऽखिलो धर्ममूलम्" इति स्मृत्यादिषु वेदस्यैव तत्प्रमाणत्वावगतेः चोदनासूत्रेऽपि चोदनापदस्य प्रवर्तकत्वपर्याप्त्यधिकरणमन्त्रार्थवादनामधेयोपेतविधिवाक्यवाचित्वेन सर्व-वेदविषयत्वात्, अर्थवादादीनामपि चाग्रे धर्माधर्मप्रमाणत्वेन निरूप-यिष्माणत्वाद्वेदाध्ययनस्याऽनंतर्यप्रतियोगितया अन्वयाद्वेदपरत्वमेव ।

किं च भाट्टरहस्ये अत्र अनुष्ठानोपयोगितया धर्माधर्मौ विचारिता-वित्युपक्रम्य एवं वेदबोधितश्रेयस्साधनताकत्वं धर्मत्वम् । तद्बोधितानिष्ट-साधनताकत्वमधर्मत्वमिति धर्माधर्मलक्षणमित्युक्तम् । एवमेव लौगाक्षि-भास्करेणापि अर्थसंग्रहे "वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः" इति लक्षणमुक्त्वा "ननु सौत्रतल्लक्षणविरोधः प्रसज्यते । सूत्रे विधिबोधित-श्रेयस्साधनताको धर्मः इत्युक्तत्वात्" इत्याशङ्क्य अत्र "चोदनापदेन

वेदस्सर्वोऽपि गृह्यत इति न विरोध" इत्युक्तम् । अनेन धर्मं प्रति चोदनैव वेद एव प्रमाणं नान्यत् प्रत्यक्षादिकमित्युक्तम् ।

ननु अतीन्द्रिये धर्मे वेदस्य प्रामाण्यं कथं संगच्छतेति प्रष्टव्यं वर्तते । यदि वेदः पौरुषेयः तदा वेदस्य पुरुषकृतत्वात् पुरुषोच्चरितवाक्यानां लोके कदाचित् याथार्थ्यं कदाचित् अयाथार्थ्यमपि दृश्यते । यथा "नद्यास्तीरे पञ्च फलानि सन्तीति" पुरुषोच्चरितवाक्यश्रवणानन्तरं नदीतीरे फलानि सन्तीति ज्ञानस्य जननात् तत्फलोपलब्ध्यर्थं कश्चित्पुरुषः प्रवृत्तः तत्र तानि फलानि कदाचित्सन्ति कदाचिन्न सन्तीति तद्वाक्यमनैकान्तिकं यथार्थज्ञानजनकं न भवति । एवमेव वेदवाक्यानामपि वाक्यत्वाविशेषात् कदाचित् यथार्थज्ञानजनकत्वेन प्रामाण्यम् । कदाचित् अयथार्थज्ञानजनकत्वादप्रामाण्यमपि स्यात् इति चेन्न । वेदः अपौरुषेय इत्यग्रे वक्ष्यमाणत्वात् लौकिकवाक्यसादृश्यं नास्तीति विषयो दृष्टान्तः । किञ्च तत्तद्वाक्यं तत्तज्ज्ञानजनकं भवति ज्ञानाजनकमपि भवतीति विरुद्धमेतत् । तदेवोक्तं भाष्ये "ब्रवीतीति उच्यते । तत्तथ्यमपि भवति वितथमपि भवतीति विरुद्धं तदिति । किञ्च लौकिकवाक्यस्य मिथ्यात्वे वैदिकवाक्यस्यापि मिथ्यात्वं न वक्तव्यम् । देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापि श्यामत्वं भवितुं नार्हतीति, भाष्येण" परिहृतमेतत् । अत्र वेदे तावत् "अग्निहोत्रं जुहुयात् स्वर्गकामः" इति वाक्येन अग्निहोत्रात् स्वर्गे भवतीति ज्ञायते । इदं ज्ञानं प्रत्यक्षम् । एतत् बाधकम् अनुमानं तथा न भवतीति कथम् उदेति ? ज्ञानस्य प्रामाण्यं स्वत एव जायते मीमांसकप्रामाण्यस्य न कारणापेक्षा । किन्तु अप्रामाण्यं कारणाधीनम् ।

तथा हि—

1. ज्ञानस्य प्रामाण्यमप्रामाण्यं च स्वत एवेति सांख्याः ।

2. प्रामाण्यं कारणनिष्ठगुणाधीनम् अप्रामाण्यं कारणनिष्ठदोषाधीनम् इति तार्किकाः ।

3. ज्ञानोत्पत्तिकाले सर्वस्यापि ज्ञानस्य स्वतः अप्रामाण्यं यावत् कारणनिष्ठगुणोपलब्धिपर्यन्तम् । प्रामाण्यं कारणनिष्ठगुणाधीनम् इति बौद्धाः ।

4. ज्ञानस्य सर्वस्यापि उत्पत्तिकाले स्वतःप्रामाण्यमेव यावत् कारणनिष्ठदोषज्ञानपर्यन्तं यथा लोके शुक्तिकां दृष्ट्वा रजतम् इति मन्यमानः रजतार्थी तत्र प्रवर्तते। ततः नेदं रजतमिति ज्ञायमानः इत.पूर्वं जातं यद्रजतज्ञानं तदप्रमाणं तस्य चक्षुर्निष्ठकाचकामलादिदोषोत्पन्नत्वात्। अन्यथा उत्पत्तिकाल एव यद्यप्रमाणं स्यात् तर्हि तत्र न प्रवर्तेतेत्यप्रवृत्त्यापत्तिः। अत एव उक्तं वार्तिककारैः—

"स्वतस्सर्वप्रमाणानां प्रामाण्यमिति गीयते।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते॥
तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते॥"

इति मीमांसकाः। प्रामाण्यस्य स्वतस्त्वाङ्गीकारात् अग्निहोत्रात् स्वर्गो भवतीति जातस्य ज्ञानस्य अप्रामाण्यापादकं कारणनिष्ठदोषवत्त्वं वा, ज्ञानानुत्पत्तिर्वा, उत्पन्नस्य ज्ञानस्य संशयात्मकं वा बाधकज्ञानं वा नास्ति। तथा हि—

वेदस्य वक्तैव नास्ति इति अपौरुषेयत्वस्य साधयिष्यमाणत्वात् कारणनिष्ठदोषवत्त्वं न वक्तव्यम्। "अग्निहोत्रं जुहुया" दिति वाक्येन अग्निहोत्रात्स्वर्गो भवतीति यतः ज्ञानं जायते अतः ज्ञानानुत्पत्तिरूपकारणमपि नास्ति। अग्निहोत्रात्स्वर्गो भवति न वा इति संशय एव न जायते इति संशयात्मकत्वरूपम् अप्रामाण्यं नास्ति। अग्निहोत्रात्स्वर्गो न भवतीति केनापि वेदवाक्येन बाधकज्ञानं न जायत इति बाधकज्ञानाधीनमप्रामाण्यमपि नास्तीति स्वतःप्रामाण्यं अनपोदितम्। यत्तु लौकिकवचनं दृष्टान्ततया उक्तं तन्न सङ्गतम्। लौकिकवचनस्य प्रामाण्यम् अप्रामाण्यं च एवं व्यवस्थापितम्। यदि इन्द्रियविषयः -इन्द्रियेणोपलब्धुं योग्यं प्रत्ययितपुरुषोच्चरितं च सत् तदा तत्प्रमाणम्। इन्द्रियेण उपलब्धियोग्यता अभावे प्रत्ययितपुरुषोच्चरितत्वेऽपि तदा तदप्रमाणम्। यथा दिवा चन्द्रः उदेति रात्रौ सूर्यः उदेतीति वाक्यवत्। इन्द्रियेण उपलब्धियोग्यत्वाभावे वक्तरि

आप्तेऽपि तद्वाक्यमप्रमाणं तद्वाक्यप्रतिपादितपदार्थस्योपलब्धियोग्यत्वाभावादित्यर्थः। वक्तरि अनाप्ते सति तदुच्यमानार्थस्य प्रत्ययितत्वेऽपि अप्रामाण्यम्, अनाप्तत्वादेव। अतीन्द्रियार्थविषये वचनं विना ज्ञातुम् अशक्यत्वात्। एवं तावत् पौरुषेयेण वाक्येन अर्थनिश्चयस्य जातस्य प्रतिष्ठितस्य च पश्चान्मूलदोषावगमेन प्रत्यक्षबाधसंभवेन च अप्रामाण्यमिति वेदितव्यम्। सामान्यतः पुरुषवचसां द्विविधः स्वभावः। एकः वक्तरि उच्यमानवाक्यार्थज्ञानवत्त्वअवधारणसामर्थ्यात्मकः वक्तरि एतादृशवाक्यार्थज्ञानमस्तीति निश्चेतुं योग्यता अस्त्येवेति, यथा आप्तवाक्येषु। आप्तवाक्यं श्रुत्वा तदर्थमनुतिष्ठन्पुरुषः अन्येन किमर्थमेवमाचरसि, किं ते प्रमाणमिति पृष्टस्सन् सः आप्तमेव प्रदर्शयति; स तु जानाति नाहम् इति। तेनावगच्छामः नूनमस्याचरतः पुरुषस्य वक्तृज्ञानद्वारा अर्थनिश्चय इति। पुंवाक्यत्वात् पुरुषे च भ्रमप्रमादादिदोषसम्भवेन योग्यताज्ञानवत्त्वावधारणं विना प्रथमं जातोऽप्यर्थनिश्चयः न प्रतिष्ठितो भवतीति भावः। अनाप्तवाक्ये योग्यताज्ञानं दुर्घटमिति तत्र अप्रामाण्यमेवेति अपरस्वभावः यथा प्रत्यक्षादीनां धर्मं प्रत्यप्रामाण्यं उक्तम्। तथा प्रत्यक्षादिमूलकपुरुषवचनस्यापि धर्मं प्रत्यप्रामाण्यं सिद्धमेव। यद्यपि लोके प्रमाणान्तरमूला प्रामाण्य दृश्यते आप्तवचसां शब्दत्वेऽपि तत्र आप्तत्वादि गुणापेक्षा स्वतःप्रामाण्यवादिनां मीमांसकानां असत्त्वेऽपि तत्र गुणोपवर्णनं दोषाभावज्ञापनार्थम् एव। अतः लौकिकवचनेषु प्रामाण्यस्य अप्रामाण्यस्य च अन्यथाव्यवस्थापितत्वात् लौकिकवचनदृष्टान्तेन वेदस्य धर्मं प्रति प्रामाण्यं नास्तीति वक्तुं न शक्यम्। वेदस्य अपौरुषेयत्वेन स्थापयिष्यमाणत्वात् तत्र वक्तुरेवाभावात् वक्तृनिष्ठगुणा अपि न सन्ति दोषा अपि न सन्तीति स्वतःप्रामाण्यमनपोदित भवति। अतः चोदनैव धर्मे प्रमाणमित्यत्र न विरोधः। एतावता ग्रन्थेन वेदस्य स्वतःप्रामाण्यं व्यवस्थापयितुं सामान्यतः सर्वेषां प्रमाणानां स्वतःप्रामाण्यं प्रसाधितम्। तेषां प्रत्यक्षादीना स्वतःप्रामाण्यस्य सत्त्वेऽपि धर्मस्य अतीन्द्रियत्वात् प्रत्यक्षादिगोचरत्वं न संभवति। अतः चोदनैव धर्मे प्रमाणं न प्रत्यक्षादिकमित्येवं चोदनासूत्रे प्रतिज्ञातोऽर्थः एको

व्यवस्थापितः। इतःपरं चोदना प्रमाणमेवेति प्रतिज्ञातः अपरोऽर्थः व्यवस्थापनीयः। तदर्थमयं विचारः—

तत्र चोदना धर्मे प्रमाणं भवितुमर्हति उत नेति। सामान्यतः सर्वेषां प्रमाणानां स्वत एव प्रामाण्यमिति यत उक्तं अत एव न प्रामाण्यं कारणापेक्षम्। ननु तथा चेत् अनाप्तवाक्यस्यापि प्रामाण्यापत्तिरिति चेत् न तस्याप्रामाण्यं न मूलविरहात् किन्तु अनाप्तत्वरूपदोषसम्भवात्। अप्रामाण्यं दोषाधीनमित्युक्तं वार्तिककारैः। तथा हि—

तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते॥"

अर्थान्यथात्वज्ञानं च द्वेधा। नैतदेवमिति पूर्वोक्तदोषोपमर्देन तत्त्वप्रकाशनेन वा हेतवः ज्ञानानां इन्द्रियादयः तेषु वातादिसमुत्थाः दोषाः तिमिरादयः तत् ज्ञानेन उत्सर्गतः प्राप्नुवन्ती प्रमाणता अपोद्यत इति श्लोकार्थः।

यतः अप्रामाण्यं दोषाधीनमित्युक्तं अतः वेदे पुरुषानुप्रवेशाऽभावात् अप्रामाण्यहेतवः इन्द्रियनिष्ठवातादिसमुत्थिताः न सम्भवन्तीत्युक्तप्रायमेव। यदि वेदे पुरुषानुप्रवेशः कल्प्येत — त्रेधा ह्यत्र पुरुषानुप्रवेशो वक्तव्यः। पदपदार्थसम्बन्धद्वारेण प्रथमः। वाक्यवाक्यार्थसम्बन्धद्वारेण द्वितीयः। ग्रन्थस्यैव भारतादिवत् पुरुषरचितत्वेन तृतीयः। तेषां मध्ये शब्दशब्दार्थसम्बन्धद्वारा वेदे पुरुषानुप्रवेशः न सम्भवतीत्युपपादितम् (मी॰ द॰ 1-1-5) "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः तस्य ज्ञानमुपदेशः अव्यतिरेकश्च अर्थे अनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वात्" इत्यनेन सूत्रेणोपपादितम्।

मीमांसकमते शब्दस्वरूपशब्दशक्तिविचारः

तथा हि— वेदस्य प्रामाण्यस्थापनप्रसङ्गे औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति सूत्रावयवेन शब्दार्थसम्बन्धः नित्य इति वदन्ति। तादृशनित्यत्वं शब्दस्य अर्थस्य च नित्यत्वे खलु भवतीति कृत्वा शब्दार्थयोः नित्यत्वं साधनीयमिति तन्नित्यत्वसाधनात्प्रागेव सम्बन्धित्वाद्याधारो हि सम्बन्धः नाऽनिरूपितयोः तयोः निरूपयितुं शक्यत इति आधारभूतं शब्द-

स्वरूपमेव कीदृशमिति प्रथमं निरूपयामः। तथा हि—शाबरभाष्ये "गौरित्यत्र कः शब्दः" इत्याशङ्कच —

"गकारौकारविसर्जनीयात्मकः शब्द इति भगवानुपवर्षः" इत्यादि भाष्येण भगवन्तो भाष्यकाराः शबरस्वामिनः; "वर्णसमुदायात्मकः शब्दः" इति, तत्रैव भगवतः उपवर्षाचार्यस्यापि सम्मतिं प्रदर्शयितुं तन्नामग्रहणपूर्वकं उपपादयामासुः।

वैयाकरणमतम्

यद्यप्यत्र वैयाकरणाः एकैकस्य वर्णस्य अर्थबोधकत्वं वा उत समुदायात्मकस्य वा इत्याशङ्कच गौर्घटः इत्यादिषु श्रोत्रग्राह्यवर्णात्मकध्वनिविशेषेषु शब्देषु न वर्णानां प्रत्येकं वाचकत्वम्। तथा सति आद्यवर्णेनैव अर्थबोधसम्भवे द्वितीयादिवर्णोच्चारणवैयर्थ्यप्रसङ्गात्। नापि संहितानां तेषां तत् सम्भवति, वर्णानामुच्चरितप्रध्वंसित्वेन यौगपद्यासम्भवात्, उत्पत्तेरभिव्यक्तेर्वा क्षणस्थायित्वात्। उत्तरोत्तरवर्णोत्पत्तिकाले पूर्वपूर्ववर्णानां नष्टत्वेऽपि पूर्वपूर्ववर्णोच्चारणजन्यसंस्काराणां विद्यमानत्वे तत्सहकारेण चरमवर्णप्रत्यक्षकाले समूहालम्बनरूपसकलवर्णज्ञानं सम्भवतीति न वर्णसमुदायासंभव इत्यपि न वक्तुं शक्यम्। तज्ज्ञानस्य सरो, रसः, राजा, जारा, नदी, दीनादि साधारणत्वेन सर इत्यतः रसरूपार्थस्य रस इत्यतः सरोरूपार्थस्य च बोधाऽपत्त्यां अतिप्रसङ्गात्। किञ्च-येनैव क्रमेण तत्तद्वर्णसंस्कारो जायते तेनैव क्रमेण तत्तद्वर्णसंस्कारसहितः अन्त्यो वर्णो वाचक इति रीत्या कथञ्चित् वर्णसंघातस्य प्रत्यक्षत्वोपपादनेऽपि वस्तुतः वर्णसमुदायस्य अभावेन तत्प्रवृत्त्याश्रयत्वग्रहानुपपत्त्या तस्य वाचकतायाः वक्तुमशक्यत्वात् इत्याद्युपपत्तिभिः न वर्णानां प्रत्येकं, समुदितानां वा वाचकत्वं उपपद्यते। अतः वर्णात्मकध्वनिविशेषरूपेण श्रोत्रग्राह्येण वैखरीपदवाच्येन अभिव्यज्यमानः परश्रोत्राग्राह्यः स्वयं तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन श्रूयमाणः मध्यमावस्थापन्नः हृदयदेशस्थः सूक्ष्मप्रणव-

रूप यो नादांशः स्फुटति- प्रकाशते अस्मादिति व्युत्पत्त्या साक्षात् अर्थाभिव्यञ्जकः स्फोटात्मकः शब्द इति वदन्ति ।

स्फोटवादनिरासः

तथापि श्रोत्रग्रहणे ह्यर्थे शब्दशब्दः प्रसिद्धः । इत्यादि भाष्येण गकारौकारादिवर्णानां स्वरूपतः साहित्याऽसम्भवेऽपि तत्तत्स्मरणद्वारा अर्थप्रतीतिः उपपद्यत एवेत्यनर्थिकैव स्फोटकल्पना ।

ननु शब्दादर्थं प्रतिपद्यामह इति लौकिकं वचनम् अनुपपन्नं स्यादिति भाष्ये वर्णसमुदायातिरिक्तस्फोटात्मकशब्दकल्पनाऽभावे प्रतीतिरनुपपन्ना स्यादित्याशङ्क्य यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यत्र दर्शपूर्णमाससंज्ञकानां आग्नेयादीनां षण्णामेव यागानां स्वरूपतः क्रमवर्तिनामपि सहितानामेव तेषां श्रुतफलसाधनत्वान्यथानुपपत्त्या स्वरूपतः साहित्यासम्भवेऽपि तत्तज्जन्य-अवान्तराऽपूर्वद्वारा साहित्यं परिकल्प्य सहितानां फलसाधनत्वं श्रूयमाणमुपपद्यते, तथा वर्णानामपि एकैकशः अर्थाभिधानाऽदर्शनात् सकलोच्चारणे तदवगमात् संहत्यकारित्वे निश्चिते स्वरूपेण च वर्णानां साहित्यासम्भवात् संस्कारनामकमवान्तरव्यापारं परिकल्प्य तद्द्वारा साहित्यम् अभ्युपगम्य अर्थप्रत्यायकत्वं संहितानां वर्णानामेव उपपद्यत इत्यर्थापत्तेः अत्रैव क्षीणत्वात् न स्फोटकल्पनाय प्रभवति । किञ्च— येनैव क्रमेण वर्णाः उच्चरिताः तेनैव क्रमेण तत्तदर्थाऽभिव्यञ्जकाः न सम्भवन्तीति सरो रस इत्यादिस्थलेषु व्युत्क्रमेणापि अर्थप्रतिपत्तिरिति यदुक्तं तन्न संगच्छते । अभिव्यञ्जकवर्णक्रमानुसारेणैव स्फोटस्याभिव्यक्तिरिति स्फोटवादिभिरप्यङ्गीक्रियते खलु । तेनोक्तदोषः न सम्भवति ।

ननु अक्षरेभ्यः संस्काराः संस्कारादर्थप्रतिपत्तिरिति अर्थप्रतिपत्तौ शब्दः गौण इति चेत् "न गौणः अक्षरेषु निमित्तभाव । तद्भावे भावात् तदभावे चाऽभावात् । अथापि गौणः न गौणश्शब्दो मा भूदिति प्रत्यक्षादिभिरनवगम्यमानः अर्थः शक्यः परिकल्पयितुम् । यथा-"अग्निर्माणवकः" इत्यत्र

अग्निशब्दः गौणो मा भूदिति ज्वलनपरो नेष्यते । माणवके ज्वलनाभेदस्य प्रत्यक्षबाधितत्वात्, तद्वत् शब्दादर्थं प्रतिपद्यामहे इत्यादौ प्रत्यक्षादिभिरनवगम्यमानस्य स्फोटस्य न शब्दवाच्यत्वम् । अर्थप्रत्यायिकत्वं कल्पयितुमुचितम् । किञ्च स्फोटशब्दपक्षे हि अवश्यं तत्तद्वर्णानुभवजनितं संस्कारान्तरं स्फोटाभिव्यक्तिसमर्थं स्मृतिहेतोरेव वा तदभिव्यक्तिसामर्थ्यम् अदृष्टमेव कल्पनीयम् । तच्चास्माभिः अर्थप्रतीतावेव कल्प्यते । भवन्मते तु पूर्वोक्तरीत्या अदृष्टकल्पना अप्रसिद्धस्फोटात्मकशब्दकल्पना चेति कल्पनाद्वयापत्तिरित्यधिको दोषः । तदेवोक्तं भाष्ये-"ननु संस्कारकल्पनायाम् अपि अदृष्टकल्पना ।" उच्यते—शब्दकल्पनायां सा च शब्दकल्पना च तस्मादक्षराण्येव पदमिति । तस्मात् गौर्घट इत्यादिषु तत्तद्वर्णसमुदाय एव शब्द इति सिद्धम् ।

शब्दस्यानित्यत्वाक्षेपः

तस्य शब्दस्य "कर्मैके तत्र दर्शनात्" इत्यादिभिः सूत्रैः पराभिमतं अनित्यत्वमाक्षिप्य "समं तु तत्र दर्शनम्" इत्यादिभिस्समाहितम् । तथा हि—उच्चारणानन्तरं शब्दः नष्टः सन् पुनः प्रयत्नानन्तरमेव दृष्टत्वात् उच्चरितस्य शब्दस्य मुहूर्तकालमप्यदर्शनात् । "शब्दं कुरु" "शब्दं मा कार्षीः" इत्यादिव्यवहारेण करोति विषयत्वात् । यदि शब्दः नित्यः एक एव स्यात् । एकत्वे युगपदनेकेषु देशेषु उपलम्भनं न सम्भवति । युगपदनेकेषु देशेषु युगपदनेकैः वक्तृभिरुच्चारितस्सन्नुपलभ्यते । तथा उपलब्धत्वात्, "गौः" "गौः" इति शब्दाः भिन्ना इति अनित्या इत्यभ्युपगन्तव्याच्च ।

शब्दस्य नित्यत्वे प्रकृतिविकारभावः न संभवति । "दध्यत्र" "सुध्युपास्यः" इत्यादिस्थलेषु प्रकृतिविकारभावदर्शनाच्च । यदि शब्दः नित्यः स्यात् शब्दस्य अल्पत्वमहत्त्वादिकं न सम्भवति । यथा लोके मृत्पिण्डपरिमाणानुसारेण घटस्य अल्पत्वमहत्त्वादिकमिव एकेनोच्चरितः शब्दः अल्प इव बहुभिरुच्चरितः शब्दः महानिव च दृश्यते । तथा दर्शनात् "शब्दः अनित्यः" इत्याक्षेपे प्राप्ते—

शब्दस्य नित्यत्वसमर्थनम्

"समन्तु तत्र दर्शनम्" इत्यादिसूत्रैः समाधानमुच्यते। यत्तूक्तं प्रयत्नानन्तरदृष्टत्वात् अनित्यः इति तन्न। शब्दस्य नित्यत्वेऽपि प्रयत्नानन्तरोपलब्धिः उपपन्नैव सा उपलब्धिः तस्य सत्तां गमयति। न तु कालान्तरे स्थितिं निषेधति। यथा– तमसि विद्यमानः पदार्थः दीपप्रकाशेन अभिव्यज्यते। तेनाभिव्यञ्जनेन सः पदार्थः इतः पूर्वमेव विद्यत इति ज्ञायते। तदानीं नोत्पद्यते। न तु कालान्तरे नास्तीति निषिध्यते।

यत्तु उच्चारणानन्तरं क्षणमप्यदर्शनादिति तत्र दर्शनादर्शनयोः कारणमन्यदुक्तव्यम्। इतःपूर्वं स्तिमितः वायुः तदपसरणात्मकः उच्चारयितृमुखोद्गतवायवीयसंयोगः दर्शनकारणमिति वायवीयविभागः अदर्शनकारणमिति च। तदेवोक्तं भाष्ये-"अभिघातेन हि प्रेरिताः वायवः स्तिमितानि वाय्वन्तराणि प्रतिबाधमानाः सर्वतोदिक्कान् वायवीयसंयोगविभागान् उत्पादयन्ति। यावद्वेगमभिप्रतिष्ठन्ते" इति। अस्य अयमर्थः-उच्चारणप्रयत्नेन अभिहताः कोष्ठ्याः वायवः तालवादिस्थानविशेषसंयोगमनुरुध्यन्ते। तदुच्चारणकालीनाः वायवीयसंयोगविभागाः यावद्वेग प्रस्थिताः तत्तत्कर्णशष्कुल्यवच्छिन्नश्रोत्रदेशं संप्राप्य तत् श्रवणयोग्यं संस्कारमादधानाः शब्दोपलब्धिहेतवो भवन्ति।

ननु "तस्मादयं सर्वतः पवते" इति श्रुत्या वायोः सदा गतिरुच्यते। तद्विरुद्धतया वायोः स्थिरत्वं कथमुक्तम् इति चेदुच्यते— सूक्ष्मत्वात् स्थिर इव भवति न तु स्थिरः। अत एव इतःपूर्वं चलनरहितः वायुः लोके व्यजनेन चालितस्सन् उपलब्धो भवति तद्वदत्रापि उच्चारणसमकालीनवायवीयसंयोगविभागं श्रोत्रदेशं प्राप्य शब्दोपलब्धिहेतवो भवन्ति। यत्तु "शब्दं कुरु" इत्यादिप्रयोगः अनित्यकारणमिति, तन्न। "गोमयं कुरु" इत्यत्र गोमयेन पिटकं कुरु इतिवत् "शब्दप्रयोगं कुरु" इत्यर्थे स प्रयोगः योजनीयः। यत्तु शब्दः एकः स्यात् नानादेशेषु युगपदुपलम्भनमनुपपन्नमिति, तस्मात् शब्दाः बहवः इति। तन्न। एक एव आदित्यः तं नानादेशेषु

सर्वास्वपि दिक्षु वर्तमानाः स्वाभिमुखमादित्यं पश्यन्ति । तदेवोक्तं श्रुतौ "सर्वाः प्रजाः प्रत्यङुदेति तस्मात् सर्व एव मन्यते मां प्रत्युदगादिति ।" तद्वत एकोऽपि शब्दः सोऽयं गकारः इति प्रत्यभिज्ञाबलेन युगपत् अनेकेषु देशेषु उपलम्भनं भवति । किञ्च — प्रकृतिविकारभावेन अनित्य इति यदुक्तं, तन्न । लोके प्रकृतिरूपैः तृणैः "कटः क्रियते," तत्करणकाले तृणानुपाददते तद्वदत्र इकारस्थाने यकार उच्चारणकाले इकारं नोपाददते । इकः अचि परे सति इक् न प्रयोक्तव्यं किन्तु यण् प्रयोक्तव्यमित्येव, यतः महान् शब्दः दृश्यते । अतः अनित्य इत्युक्तं, न सङ्गतम् । शब्दाभिव्यञ्जकनादवृद्ध्या शब्दो वृद्ध इव दृश्यत इति वक्तव्यम् । अतः पूर्वोक्तकारणानां अनैकान्तिकत्वात् तैः कारणैः शब्दस्य अनित्यत्वं न सम्भवति इत्यादिभिः समाहितं शब्दस्यानित्यत्वनिरसनपूर्वकं नित्यत्वं समर्थितम् ।

पुनः "नित्यस्तु स्यात् दर्शनस्य परार्थत्वात्" इत्यादिभिः षड्भिः सूत्रैः स्वाभिमतं युक्त्यन्तरैरपि नित्यत्वं प्रसाधितम् । "दृश्यते शब्दः अनेनेति" व्युत्पत्त्यां दर्शनं नाम उच्चारणं तस्य परप्रत्यायनार्थत्वात् । यदि शब्दः उच्चरितप्रध्वस्तः तस्य परप्रत्यायनं न सम्भवतीति अतो हेतोः शब्दः नित्यः "सर्वत्र यौगपद्यात्" सकृदुच्चरिते गोशब्दे सर्वगवीषु यौगपद्येन प्रत्ययसम्भवात् । "संख्याऽभावात्" लोके अष्टौ गोशब्दा उच्चरिता इति प्रतीतिः न दृश्यते । किन्तु अष्टकृत्वगोशब्द उच्चारित इति प्रतीतिः शब्दनित्यत्वे एव सम्भवति इत्याद्युपपत्तिभिः नित्यत्वं भाष्ये साधितम् । तस्मात् वर्णसमुदायात्मकः शब्दः इति, स नित्य इति च सिद्धम् ।

स शब्दः द्विविधः — पदं वाक्यं च । पदं च द्विविधं—नाम, आख्यातं च । तदेवोक्तं भगवद्भिः पाणिन्याचार्यैः । "सुप्तिङन्तं पदं" —सुबन्तं तिङन्तं च पदसंज्ञं स्यात् । एवं सुबन्तपदानां तिङन्तपदानां च नित्यत्वं साधयित्वा तत्तत्पदजन्यार्थस्यापि नित्यत्वं साधयितुं प्रथमाध्यायस्य तृतीयपादे कोऽर्थः पदस्य, कुत्र शक्तिरिति विचारावसरे प्रथमतः व्याकरणाधिकरणानन्तरं लोकवेदाधिकरणे लौकिकानां वैदिकानां शब्दानां

अर्थानां च एकत्वं सिद्धान्तितम् । ततः आकृत्यधिकरणे आकृतिः शब्दार्थः उत व्यक्तिः उत आकृतिविशिष्टा व्यक्तिः इत्यादिना अष्टौ पक्षाः भाष्य-वार्तिकयोः प्रदर्शिताः । शास्त्रदीपिकायां तु त्रय एव पक्षाः प्रदर्शिताः । आकृतिविशिष्टव्यक्तिपक्षनिराकरणेनैव इतरे पक्षाः निराकृताः भवन्तीति । अत्र आकृतिर्नाम जातिरित्यर्थः । न तु नैयायिकाभिमत अवयवसंस्थान-रूपा आकृतिः, तस्याः निरवयवकेषु असम्भवादिति मयूखमालिकायां सोमनाथयज्वना विवृतम् । तथा च गौरित्यादिपदानां कस्मिन्नर्थे शक्ति-रिति विचारणीयम् ।

व्यक्तौ शक्तिरिति पूर्वपक्षः

तथा हि– "व्रीहीनवहन्ति" "पशुमालभेत" "गामानय" "ब्राह्मणो न हन्तव्यः" इति यावन्तः एवमादयः श्रूयन्ते ते सर्वेऽपि व्यक्तिरूपार्थ एव समञ्जसा भवन्ति नत्वाकृतौ । यद्याकृतिः शब्दार्थः "व्रीहीनवहन्ति" इत्यादिभिः व्रीहित्वजातेरवहननं, पशुत्वजातेरालम्भनं, गोत्वजातेरानयनं, ब्राह्मणत्वजातेर्हननप्रतिषेधश्च न सम्भवति । किञ्च जात्यर्थत्वे लिङ्ग-संख्याकारकैः सम्बन्धो न भवति । "गौः शुक्लः" इत्यत्र शब्दद्वयस्य जातिगुणमात्रवृत्तित्वात् । अर्थभेदे द्वयोः सामानाधिकरण्यं न स्यात् । एवमेव "पुरुषो देवदत्तः" इत्यत्र जातिद्रव्यवाचकयोः पदयोः सामानाधि-करण्यं न सम्भवति । अतः व्यक्तिरेव अर्थः ।

न च व्यक्तिवाचित्वे व्यक्तिनानात्वात् शक्तिनानात्वापत्तिरिति वाच्यम् । सर्वव्यक्त्यनुगतसामान्यस्य उपलक्षणतया सर्वव्यक्तिक्रोडीकारे-णैव शक्तिग्रहणात् । न च उपलक्षणत्वमात्रेण सामान्यस्य अभिधेयत्व-प्रसक्तिः । योऽयं शुक्लवासाः स देवदत्तः इत्यत्र उपलक्षणीभूतं वासः अनभिधाय देवदत्त एव अभिधीयते । तथा—इहापि उपलक्षणमात्रत्वात् सामान्यस्य अनभिधानेऽपि शुद्धाः व्यक्तय एव अभिधीयन्ते ।

अथवा आकृतिविशिष्टव्यक्त्यभिधाने तु न कश्चित् दोषः । तदे-वोक्तं पार्थसारथिमिश्रैः सङ्ग्रहेण—

"प्रयोगबोधनाभावाद्व्यक्तिरेवाभिधीयते ।
न ह्याकृतिरमूर्तित्वात् व्यवहारोपयोगिनी ।।

लिङ्गकारकसंख्याभिः सम्बन्धोऽस्या न कल्प्यते ।
सामानाधिकरण्यं च न जातिगुणशब्दयोः ।।

व्यक्तिवाचित्वपक्षे तु सर्वमेतत्समञ्जसम् ।
तेन शुद्धा विशिष्टा वा व्यक्तिः शब्दार्थगोचरः ।।"

इति पूर्वपक्षे प्राप्ते उच्यते—

जातौ शक्तिरिति मीमांसकसिद्धान्तः

व्यक्तिवाचित्वपक्षे व्यक्तिनानात्वात् जात्युपलक्षणत्वेऽपि अभिधेयानामानन्त्यात् शक्त्यानन्त्यमस्त्येव । व्युत्पत्तिकाले जातिरुपलक्षणं न अभिधानसमये । अभिधानं हि प्रातिस्विकेन तत्तद्व्यक्तिस्वरूपमात्रेण भवति ।

यदा अक्षत्रयम् एकापवरकस्थं तदा य एकस्मिन् अपवरके अधुना स्थिताः ते अक्षशब्दाभिधेयाः इति । तत्र यद्यपि व्युत्पत्तिसमये अपवरकस्थितिर्नाम एकमुपलक्षणं लभ्यते; तथापि शब्दः तदनादरेण व्यक्तिमात्रमेव स्वरूपेण अभिधत्ते इति, विदेवन, विभीतक, रथावयवात्मकम् इति, तथा इहापि यद्यपि व्युत्पत्तिसमये एका जातिः उपलक्षणमासीत् । तथापि शब्दः तामस्पृशन्नेव नानारूपा व्यक्तीः स्वेनैव रूपेणाभिधत्ते इति शक्त्यानन्त्यम् । यदि व्युत्पत्तिसमय इव अभिधानसमयेऽपि शब्दः जात्युपलक्षणमादाय गोजातीयामिति तज्जातीयरूपेण अभिधत्ते । ततः प्रथमं जातिरभिधेया । "नागृहीतविशेषणे विशिष्टे बुद्धिः प्रवर्तते" इति न्यायेन विशेषणरूपां जातिमनभिधाय तत् जातीयत्वेन रूपेण न हि व्यक्तिः अभिधातुं शक्यते । ततश्च विशिष्टाभिधाने शक्तिकल्पना तदपेक्षया विशेषणरूपजातिमात्राभिधाने तदविनाभूतव्यक्तिप्रतिपत्तिसिद्धेः न तत्र शक्तिकल्पनावसर इति लाघवं भवति । किञ्च व्यक्तिवाचित्वे अङ्गीकृते खण्डमुण्डादीनां बहूनां व्यक्तीनां सत्त्वात् विशेषनिर्णयो न भवतीति

गोशब्दोच्चारणकाले विचित्रा च संशयरूपा बुद्धिः स्यात् । जात्यभिधान-पक्षे एकाकारा तु जातिः अभिधेयेति बुद्धिः उत्पद्यते । अत एव क्रिया-सम्बन्धः लिङ्गसंख्याकारकसंबन्धः सामानाधिकरण्यं च व्यक्त्यभेदादुपपन्नं भवति । "पशुना यजेत" "अरुणया क्रीणाति" इत्यादौ करणत्वश्रवणं जातिगुणयोश्च अमूर्तयोरपि तत्तद्द्रव्यपरिच्छेदेनोपपन्नं भवति । तदेवाह—

"आनन्त्यव्यभिचाराभ्यामेकरूपप्रतीतितः ।
आकृतेः प्रथमज्ञानात् तस्या एवाभिधेयता ॥
व्यक्त्याकृत्योरभेदाच्च व्यवहारोपयोगिता ।
लिङ्गसंख्यादिसम्बन्धः सामानाधिकरण्यधीः ॥
सर्वं समञ्जसं ह्येतद्वस्त्वनेकान्तवादिनः ।
लक्षणा वाभ्युपेतव्या जातेस्तेनाभिधेयता ॥
तेन तल्लक्षितव्यक्तेः क्रियासम्बन्धबोधनाः ।
जातिव्यक्त्योरभेदो हि वाक्यार्थेषु विवक्षितः ॥ इति जातावेव शक्तिरिति सिद्धम् । तथा च—वर्णसमुदायात्मकः शब्दः, स च नित्यः । तस्य जातावेव शक्तिः, स च जातिरूपो अर्थः नित्यः ।

पदपदार्थसम्बन्धद्वारेण वेदस्य पौरुषेयत्वशङ्का तन्निरासश्च

ननु एवं नित्यावेव शाब्दार्थौ भवेताम् नाम, अनयोः सम्बन्धा-रमन्तरा सम्बन्धो न सम्भवति । अतः येन केनचित् पुरुषेण जगदादौ शब्दानामर्थैस्सह कञ्चित्संबन्धं कृत्वा "तेन वेदाः प्रणीताः" इति तत्कर्तुः पुरुषत्वेन भ्रमप्रमादादीनां सम्भवात् तद्दोषाधीनमप्रामाण्यं वेदानां धर्मं प्रति प्रसज्यत एवेति चेन्न । यदि कश्चित् सम्बन्धा स्यात् प्रत्यक्षेणोप-लभ्येत । प्रत्यक्षमूलकत्वात् अनुमानादीनामपि नात्र प्रसरः । ननु प्रत्यक्षादीनां तत्राप्रवृत्तत्वेऽपि तदर्थावगमान्यथानुपपत्त्या अर्थापत्तिः कल्प्यत इति चेन्न । यद्यन्यः प्रकारः नास्ति चेत् तथा कल्प्येत । अस्ति त्वन्यः प्रकारः वृद्धव्यवहारः – यस्मिन् यस्मिन्नर्थे ये ये शब्दाः वृद्धैः प्रयुज्यन्ते तादृशप्रयोगं दृष्ट्वा बालाः अस्य शब्दस्य अनेनार्थेन सम्बन्ध इति अजानन्

ते वृद्धाः यदा बालाः तदा अन्येभ्यो वृद्धेभ्यो तेऽपि अन्येभ्य इति अनादि-व्यवहारेणैव शब्दार्थयोः सम्बन्धः सिद्ध इति तदर्थं अर्थापत्तिप्रमाणेनापि सम्बन्धो न कल्पनीयः। अतः शब्दार्थसम्बन्धः न कृतकः किन्तु नित्यसिद्ध इति। "औत्पत्तिकस्तु शब्दस्य अर्थेन सम्बन्धः" इति सूत्रावयवेन उच्यते। अनेन पदपदार्थसम्बन्धद्वारेण पुरुषानुप्रवेशः निराकृतः। एवं शब्दार्थसम्बन्धोऽपि नित्यो भवतु नाम।

वाक्यवाक्यार्थसम्बन्धद्वारेण वेदस्य पौरुषेयत्वशङ्का तन्निरासश्च

तथापि चोदनासूत्रे प्रतिज्ञातं चोदनानां धर्मे प्रामाण्यमिति तन्न संभवति। वाक्यार्थप्रतिपत्तौ मूलाऽभावात् लोके व्यवहारात् यथा शब्दादर्थः अवगम्यते, न तथा पदसमुदायात्मकस्य वाक्यस्य अर्थः वृद्धव्यवहारात् अवगन्तुं शक्यते। पदसमुदायस्य "अग्निहोत्रं जुहोती"त्यादेः लोके केनापि अप्रयुक्तत्वात् इत्यादिना वाक्यार्थविचारः कृतः। तथाहि– वाक्यार्थो नाम अनेक-गुणभूतपदार्थविशिष्टः एकः पदार्थो वा ? पदार्थानां अन्विताऽवस्था वा ? तद्बोधः वाक्यार्थबोधः अन्वयबोधः शाब्दबोध इति च आख्यायते। अत्र पदानि वाक्यार्थं अवगमयेयुः उत श्रूयमाणपदसंघातव्यतिरिक्तम् अन्यत् किञ्चित् उत पदसंघातरूपवाक्यं, उत पदार्थाः इति अनेक-कोट्यात्मकं संशयं भाष्ये प्रदर्श्य अनेके पक्षाः प्रदर्शिताः। तत्र नाद्यः। प्रत्येकं पदानि वाक्यार्थं अवगमयेयुरिति एकस्मात् पदात् यतः वाक्यार्थप्रतीतिः न जायते यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यत्र अन्यतमात् पदात् अग्निहोत्रात् स्वर्गो भवतीति न गम्यते। गम्यते तु पदत्रये उच्चरिते। अतः पदानि वाक्यार्थं अवगमयेयुः इति प्रथमपक्षः निराकृतः। पदसंघातव्यतिरिक्तं "अन्यत् किञ्चित् नास्ति अग्निहोत्रमि"ति वाक्ये पदत्रयातिरिक्तं चतुर्थं पदं न श्रूयते इति द्वितीयः पक्षोऽपि निराकृतः। न चायं समुदायः अस्ति लोके अग्निहोत्रं जुहोतीत्यादेः केनापि अप्रयुक्तत्वात्। अतः लोकव्यवहारात् यथा शब्दादर्थः अवगम्यते न तथा पदसमुदायात्मकस्य वाक्यस्य वृद्धव्यवहारादर्थः अवगन्तुं शक्यते। अतः पदसंघातात्मकवाक्यात् वाक्यार्थप्रतीतिः न

संभवति इति तृतीयपक्षः निराकृतः ननु समुदायादर्थो मा भूत्। "गामानय" इत्यादौ गवादिपदार्था एव वाक्यार्थो भवतु। ते पदार्थाः पदमूलाः। अतः वाक्यार्थो न निर्मूलमिति चेत् न। न पदार्थः वाक्यार्थः, पदं हि सामान्यरूपेऽर्थे वर्तते। वाक्यं तु विशेषरूपेऽर्थे। अतः वाक्यघटकपदैः पदार्थसामान्यज्ञाने जातेऽपि न तु विशेषरूपवाक्यार्थावधारणमिति चतुर्थपक्षोऽपि निराकृतः। ननु पदार्थाः वाक्यार्थो मा भूत् पदार्थावगममूलकवाक्यार्थावगमः अस्तु इति चेन्न। यथा लोके धूमाग्न्योः नियतसम्बन्धस्य सत्वात् धूमदर्शनमात्रेण परोक्षे विद्यमानः अग्निरप्यनुमीयते न तथाऽत्र। पदार्थवाक्यार्थयोः नियतसम्बन्धाभावात् न पदार्थावगममात्रेण वाक्यार्थावगमः। यद्यपि वाक्यघटकपदैरभिहितानां पदार्थानां वाक्यार्थेऽन्तर्भावात् पदार्थैः वाक्यार्थस्य अविनाभावसम्बन्धः अस्त्येव, तथापि पदार्थावगममात्रेण वाक्यार्थः अवगमो भवत्विति भवदीयशङ्काभिप्रायः। एकैकपदार्थावगमेन वाक्यार्थावगम इति वा? संहतैः पदार्थैः वाक्यार्थवगम इति वा? एकैकपदार्थस्य "गामानय, गां बधान, अश्वमानय, अश्वं बधान" इत्यादिषु तत्तत्पदानां बहुवाक्यसाधारणत्वात् न ऐकान्तिकविशिष्टवाक्यार्थावधारणं सम्भवति। किञ्च एकस्मिन्नवगते सर्वम् अवगतं स्यात् संहितानां पदार्थानां तत्तद्वाक्यार्थव्यतिरेकस्थले अन्यत्र एतद्वाक्यप्रयोगात्पूर्वं वाक्यार्थमूलकत्वेन अनवगतानां असाधारण अनैकान्तिकता स्यात्। अतः पदार्थावगममूलको वाक्यार्थ इति पक्षोऽपि निराकृतः।

ननु प्रथमश्रुतात् वाक्यात् स्वार्थे सम्बन्धज्ञानाभावेऽपि स्वभावादेव अर्थावगमो अस्त्वितिचेन्न। तथा लोके केचिदपि न जानन्ति। यदि प्रथमश्रुतादपि वाक्यात् स्वार्थसम्बन्धग्रहाभावेऽपि जानन्ति इति चेत् तत्तत् वाक्यश्रवणानन्तरं सर्वेऽपि पदार्थविदः अन्ये च तत्तत्वाक्यार्थं जानीयुः। अपदार्थविद्भिः कैश्चिदपि वाक्यार्थो न ज्ञायते। अतः स्वभावादेव वाक्यात् वाक्यार्थावगमो नास्ति।

ननु पदार्थवेदनं वाक्यार्थवेदने उपकारकं भवतु। अतः पदार्थविद्भिः वाक्यार्थवेदनस्य संभवात् वाक्यवाक्यार्थसम्बन्धः न पुरुषकृतः इति

चेन्नेति ब्रूमः । यदि पदेभ्यः अतिरिक्तं वाक्यं अर्थान्तरभूतः वाक्यार्थः, न तदा पदार्थवेदनस्य उपयोगः । तदनुपयोगे पदार्थव्युत्पत्तिः अनर्थिका, वाक्यार्थजिज्ञासूनाम् । अतः प्रथमश्रुतात् अगृहीतसम्बन्धात् वाक्यात् वाक्यार्थावगमो दुर्लभः । अतश्च विचार्यमाणे मूलविशेषानिश्चयात् व्याकरण-परिभाषितवृद्धचादिपदार्थप्रतीतिवत् । यद्वा याज्ञिकपरिभाषसिद्धो वा भवतु । न तु सन्मूलिकः । किं च गवाश्वादिपदैः गोसामान्यं अश्वसामान्यं च प्रतीयते । शुक्ल-कृष्ण-पदसमभिव्याहारात् वाक्यात् विशेषज्ञानं जायते । यद्यपि सामान्यं विशेषमन्तरा न पर्यवस्यति तदा पदरूपश्रुतिज्ञानं पदसमभि-व्याहाररूपवाक्यज्ञानेन बाधेत । तथा चेत् बलावलाधिकरणन्यायेन स बाधो न युक्तः । तस्मात् वाक्यस्य वाक्यर्थेन सम्बन्धः कृत्रिमः व्यामोहो वा। किञ्च यथा पुरुषकृताः नीलोत्पलवनेष्वद्य चरन्तश्चारु संरवाः इत्यादि पदसङ्घाताः, तथा अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यादि पदसङ्घाता अपि पुरुषकृता एव भवेयुरिति वेदाः पौरुषेयाः इति प्राप्ते उच्यते । वाक्यात् वाक्यार्थप्रतीतेः मूलं बहवः बहुभिः प्रकारैः वदन्ति ।

तत्र वैयाकरणमतम् ।

वैयाकरणाः अविभागमेव वाक्यम् । व्यञ्जकध्वनिभेदात्, तेन तेन वर्णपदविपर्यासात्मना तस्य तस्य वाक्यार्थस्य वाचकमिति वदन्ति । अयमर्थः आशुतरविनाशिभिर्वर्णैः प्रत्येकं यौगपद्येन च वाक्यार्थप्रतीतेर-सम्भवात् तत्तद्वर्णाभिव्यङ्ग्यं अखण्डस्फोटात्मकं वाक्यं वाक्यार्थस्य वाचकमिति वदन्ति ।

यद्यपि तैस्तैर्वर्णैर्वर्णस्फोटः, पदैः पदस्फोटश्चाङ्गीक्रियते, तथापि तैर्वाक्यार्थप्रतीतेरसम्भवात्, अखण्डस्फोटरूपमेव वाक्यार्थस्य वाचकम् इति वदन्ति । यथा वर्णेभ्यः अर्थप्रतीतेरनुपपत्तेः निरवयवमेव पदं पदार्थस्य वाचकं तथा एकैकस्मात् पदात् वाक्यार्थप्रतीतेरनुपपत्तेः, एकं पदमिति परामर्शाच्च पदेषु वर्णस्फोटानां मिथ्यात्ववत् वाक्येषु पदस्फोटानां मिथ्या-त्वमङ्गीकृत्य निरवयवम् अखण्डं स्फोटरूपं वाक्यमेव वाक्यार्थस्य वाचक-मिति वाक्ये शक्तिमङ्गीकुर्वन्ति ।

बौद्धमतम्

बौद्धैकदेशिनः विज्ञानवादिनः एवं मन्यन्ते । वाचकं शब्दमपि ज्ञानं, वाच्यं द्रव्यक्रियात्मकं अर्थजातं विज्ञानादभिन्नं विज्ञानात्मकमेव । अतः वाकयमपि वाकयार्थश्च ज्ञानमिति ।

नैयायिकवैशेषिकाभिमतम्

सावयवं वाकयं वाकयार्थस्य वाचकमिति ।

"पदवत् वाकयमपि पूर्वपूर्ववर्णसंस्कारसचिवः अन्त्यो वर्णो वाचक इत्यादिना मार्गेण सावयवमेव प्रतिलब्धसम्बन्धावयवभूतपदजनितपदार्थ-संविदुपायसहायं वाकयार्थस्य वाचकमिति ।"

इयं हि तन्मतस्थिति

वर्णानां प्रत्येकं पदार्थवाचकत्वे अतिप्रसङ्गात् आशुतरविनाशित्वेन समुदायग्रहणासंभवात् पूर्वपूर्ववर्णानुभवजन्यसंस्कारसचिवः अन्त्यो वर्णः यथा पदार्थस्य वाचकः एवमेव पूर्वपूर्वपदानुभवजन्यसंस्कारसचिवम् अन्त्यपदं वाकयार्थस्य वाचकं=बोधकमिति । तत्र क्रमनियतवर्णा एव पदम् । तथा नियतक्रमविशिष्टपदान्येव वाक्यमित्यादिना मार्गेण पदवद्वाकयमपि वाकयार्थस्य वाचकं बोधकम् इति सावयवमेव वाकयं पदान्येव वाक्या-पेक्षया अवयवभूतानि । तेभ्यो जनिता पदार्थसंवित् तदुपायकं वाकयं वाकयार्थस्य बोधकमिति । वाकयार्थज्ञाने पदजन्यपदार्थोपस्थितिः कारण-मिति न पृथक् वाकयस्य वाकयार्थे शक्तिरिति नैयायिकाः वैशेषिकाश्च पदान्येव पदार्थान्तरान्वितं स्वार्थम् अभिदधतीति गुरुमतम् ।

पदैरभिहिताः पदार्था एव वाक्यार्थं प्रतिपादयन्तीत्याचार्याः ।

एवं च तत्तन्मतानुसारेण वाक्यार्थप्रतीतिमूलमुपपादितम् स्वमत-स्थापनार्थं यद्यपि वैयाकरणमतनिरासः प्रथमतः कर्तव्यः, तथापि तत्क्रम-मनालम्ब्य आदौ बौद्धमतनिरासः क्रियते ।

यत्तु बौद्धैकदेशिभिरुक्तं वाक्यं वाक्यार्थश्च ज्ञानात्मकमिति। तन्न। उभयोरपि ज्ञानरूपत्वे प्रतिपाद्यप्रतिपादकभावः न सम्भवति। किन्तु कार्यकारणभावरूपसंबन्धःवक्तव्यः।

किञ्च वाक्यवाक्यार्थयोः ज्ञानात्मकत्वे तयोरेव ज्ञानविषयत्वात् एकस्यैव विषयत्वं विषयित्वं च विरुद्धम्। अपि च ज्ञानमन्तरतया अवभासते। अर्थस्तु तद्विपरीततया बहिरवभासते। अतः ज्ञानार्थयोः तादात्म्यमयुक्तमिति बौद्धमतनिरासः।

नैयायिकवैशेषिकमतनिरासः

यत्तूक्तं तैः पूर्वपूर्ववर्णानुभवजन्यसंस्कारसचिवः अन्त्यो वर्णः यथा पदार्थस्य वाचकः एवमेव पूर्वपूर्वपदानुभवजन्यसंस्कारसचिवम् अन्त्यपदं वाक्यार्थस्य वाचकमिति=बोधकमिति। तन्न युक्तम्। ननु भवदुक्तरीया पूर्वपूर्वसंस्कारसचिवमन्त्यपदं वाक्यार्थस्य वाचकमिति पक्षे पदात् वाक्यं भिन्नमभिन्नं वा पदार्थोऽपि वाक्यार्थात् भिन्नः अभिन्नो वा। यदि भिन्नः तदा अखण्डवाक्यवादपरिशेषः। यद्यभिन्नं तदा वाक्यं पदमित्यादिभेदानुपपत्तिः। अतः "पदपदार्थव्यतिरेकाव्यतिरेकादिविकल्पस्यापि अनेकान्तवादाश्रयणेन परिहरति इति न्या. र. मा. याम् अयमर्थः :- तथा विकल्पाङ्गीकारे अनेकान्तवादाश्रयणेन अनियमाश्रयणेन भेदाभेदाश्रयणेन परिहारः कर्तव्य इति। ननु अनयोरत्यन्तभेदः – अत्यन्ताभेदो वा स्यात्। कुतः भेदाभेदाश्रयणमिति चेत् उच्यते। तथा प्रतीतिवलात् तथैवाश्रयणं युक्तम्। अत एवोक्तं न्या. र. मा. यां "वाक्यं हि नाम एकविशिष्टार्थप्रतिपादनपराणि पदान्येव। वाक्यार्थोऽपि पदार्थ एव पदार्थान्तरव्यतिषक्तात्मेति।" एवञ्च पदपदार्थाभ्यां वाक्य वाक्यार्थयोः भिन्नतया प्रतीतिसिद्धत्वेन अपह्नोतुमशक्यत्वात् सर्वैरपि वादिभिः तावदवश्यं तौ निरूपणीयौ। यद्यपि समुदितानां पदानामेव वाक्यत्वात् समुदितानां पदार्थानामेव च वाक्यार्थत्वात् न पदपदार्थेभ्यः वाक्यवाक्यार्थयोः भेदो युज्यते। एकैकपदस्यावाचकत्वात्। एकैकपदार्थस्य च अवाक्यार्थत्वात् नाभेदोऽपि युज्यते।

तथापि अवान्तरस्थित्युपपत्तेः=भेदाभेदमध्यमावस्थितिरूप-तृतीय-प्रकारोपपत्तेः बहिर्भूतौ-पृथग्भूतौ-पदादसहायस्वभावात् वाक्यस्य समूहीभावः; तदर्थाच्च अव्यतिषङ्गात्मकात् वाक्यार्थस्य व्यतिषक्तता च अपह्नोतुं न शक्येते इति पदवाक्ययोः पदार्थवाक्यार्थयोश्च भेदाभेदाश्रयणेन नैयायिकवैशेषिकमतनिरासः कृतः ।

स्फोटवादनिरासः

यत्तूक्तं वैयाकरणैः ननु वर्णेभ्यः अर्थप्रतीतेरनुपपत्तेः एकैकस्मात् वर्णात् पदार्थप्रतीतौ अतिप्रसङ्गात्समुदायस्य च असंभवात्, एकं पदमिति परामर्श एव नानात्वं प्रतिक्षिपतीति, नानात्वैकत्वयोर्विरोधात् यथा निरवयवमेव पदं पदार्थस्य वाचकं तथैव निरवयवमेव वाक्यं वाक्यार्थस्य वाचकमिति । तन्न । तथाहि पदवदिति दृष्टान्ताऽसिद्धेः । वर्णात्मकपदस्य श्रावणप्रत्यक्षत्वात् । प्रत्यक्षविरोधि-वर्णातिरिक्तं पदं योग्यानुपलब्ध्यैव नास्तीति निश्चीयते । यदा तदसिद्धं तद्दृष्टान्तेन निर्भागं वाक्यं वाक्यार्थस्य वाचकमित्यङ्गीकर्तुं कथं शक्येत । यत्तूक्तं एकं पदं एकं वाक्यमिति परामर्शोऽस्तीति । तत्रोच्यते—घटः पटः इत्यादिषु द्वयोरपि वर्णयोः एकार्थोपाधिवशात् एकपदत्वं, यथा लोके एकस्मिन्देशे बहूनां जनानां सत्त्वेऽपि देशैक्यात् सेनेत्येकपदेन व्यवहारः, तथा "राजसूयेन स्वाराज्यकामो यजेत" इत्यत्र स्वाराज्यरूपफलस्यैकत्वात् राजसूययागे बहूनां इष्टि-पशु-सोमयागानां सत्त्वेऽपि तत्संघातात्मक-एक-फलोपाधिवशात् राजसूय इत्येकपदेनैव व्यपदिश्यते । तद्वदत्रापि एकार्थप्रतिपत्तिमूलत्वात् एकं पदं एकं वाक्यमिति परामर्श उपपन्न इति । यदा वर्णा एव अक्षधीगोचराः नान्यदिति स्थितं तदा वर्णानन्तरजायमाना अर्थप्रतिपत्तिः तन्निमित्तैव विज्ञायते ।। तत्त्वान्तरस्य स्फोटरूप पदान्तरस्य योग्यानुपलब्ध्यैव निरस्तत्वात् तादृशस्य वाचकत्वं सुतरां न संभवतीत्युक्तप्रायमेव । तदेवोक्तं ।

"न चार्थप्रतिपत्त्यापि पदमन्यत्प्रसिध्यति ।
वर्णानन्तरजाता हि सा तत्कारणिकैव नः ।।—न्या-र-मा- 94

इत्यादिना वर्णातिरिक्तं पदं नास्तीति वर्णात्मकपदस्यैव पदार्थ-प्रतिपत्तिकारणमित्युक्तत्वात् वर्णस्फोटनिरासः ।

भाट्टमते तावद्वर्णाः द्रव्यं, न गुणः, ते वर्णाः नित्याः, व्यापकाश्च, ध्वनिस्तु तद्व्यञ्जकः प्रतिवर्णं विलक्षणः वर्णानां क्रमः ध्वनिगतः वर्णेषु आरोपितः । तादृशक्रमविशिष्टा एव वर्णाः पदम् । तत्क्रमभेदात् "जरा" "राजा" "सरो" "रसः" "नदी" "दीना" इत्यादिस्थलेषु पदभेदः सिद्धः ।

तेन ध्वनिधर्माणामेव दीर्घोदात्तक्रमादीनां वर्णेषु समारोपितानां स्मृत्यारूढानां अर्थाभिधानाङ्गत्वमिति न किञ्चिदनुपपन्नम् । अत एवाह आचार्यसम्मतिम् ।

"तद्वशेन च वर्णानां व्यापित्वेऽपि क्रमग्रहः ।
एवं ध्वनिगुणान्सर्वान् नित्यत्वेन व्यवस्थिताः ॥
वर्णा अनुपतन्तस्स्युरर्थभेदावबोधकाः ।
—श्लो-वा-६-३००-३०१

तत्सिद्धं न वर्णातिरिक्तमनवयवं पदमस्तीति पदस्फोटनिरासः कृतः । एवमेव तत्तत्पदभेदात् गामानय गां बधान अश्वमानय अश्वं बधानेत्यादि वाक्यभेदः । तद्भेदादर्थभेदसिद्धिः । अतः तत्तत्पदरूपभागावगमादेव निरवयवं स्फोटात्मकं वाक्यं नास्ति । तादृशवाक्यस्य वाक्यार्थे शक्तिरपि नास्तीति वैयाकरणमत-निरासः कृतः । अत एवोक्तं (न्यायरत्नमालायां) "भागावगमादेव वाक्यमपि नानवयवं सिध्यति" इत्येवं स्थिते पुनर्वैयाकरणैः—

ननु अस्तु नियतक्रमेभ्यो वर्णेभ्यः पदरूपेभ्यः पदार्थभेदावगतिः पदार्थसंसर्गरूपवाक्यार्थस्तु तदतिरिक्तः । अतः कथं तर्हि वाक्यार्थावगतिः इत्याक्षेपे कृते तस्य समाधानतया नैयायिकैकदेशिनः एवं वदन्ति । "पदार्थ-वदिति ब्रूमः" इति ।

नैयायिकैकदेशमतम्

यथा वर्णेभ्य एव संहितेभ्यः पदार्थोऽवगम्यते तथा तेभ्य एव वाक्यार्थोऽपि । तत्प्रतीत्येककार्यकरणाच्च बहवो वर्णा एव एकं वाक्यमि-

त्युच्यते। अनेन वर्णसमुदायात्मकं वाक्यमिति तदयुक्तमिति मीमांसकैकदेशिनो वदन्ति। यद्यपि वैयाकरणवत् स्फोटात्मकं अखण्ड-वाक्यमिति नाङ्गीकुर्वन्ति। किन्तु सावयवमेव। तथापि वर्णसमुदायात्मकवाक्यात् वाक्यार्थप्रतिपत्तौ पदार्थज्ञानस्योपयोग एव नास्ति। अत एवाह बृहट्टीकाकारः—

"अपेक्षते न वा वाक्यं स्वार्थसङ्गतिसंविदम्।
परस्मिन्सर्वसंवित्तिपूर्वस्मिन्न तु कस्यचित्॥"

पदार्थज्ञानोपयोगाभावे अपूर्वतया वाक्यश्राविणां सर्वेषामपि वाक्यार्थज्ञानापत्तिः। यदि वाक्यस्य वाक्यार्थेन सम्बन्धज्ञानापेक्षा ततः अपूर्ववाक्यश्रवणेन न कस्यचिदपि वाक्यार्थावगतिस्स्यात्। यदि पदार्थज्ञानं वाक्यात् वाक्यार्थप्रतिपत्तौ अङ्गमित्युच्येत वर्णानामेव वाक्यत्वे वाक्यार्थस्य पदार्थातिरेके अनुपकारकत्वात् पदार्थव्युत्पत्ति— अनुपकारिकैवेति वक्तव्यम्। अयमाशयः। पदपदार्थसमूहस्यैव वाक्यत्वे तदर्थत्वे च पदपदार्थव्युत्पत्तिरङ्ग स्यान्नाम। समुदायसमुदायिनोरत्यन्तभेदाभावात् वर्णानामेव वाक्यत्वे तदर्थस्य पदार्थातिरेके अनुपकारकत्वात् पदार्थव्युत्पत्तिरनुपकारिकैव।

यदा पूर्वपूर्ववर्णजनित - संस्कारसहितः अन्त्यो वर्णो वाचकः स्मृत्यारूढा वा वर्णाः पदार्थेभ्यो अर्थान्तरमभिदधति। तदा पदार्थज्ञानस्य न कोऽप्युपयोगः। यद्युपयोगः अस्ति चेत् दृष्टोपकारकत्वाभावात् अदृष्टाङ्गीकारकल्पना स्यात्। तच्चायुक्तम्। लौकिककार्यकारणस्थलेषु तत्कल्पनानुपपत्तेः। किञ्च वाक्यवाक्यार्थयोरेव पृथक् पृथक् सङ्गतिग्रहणाङ्गीकारपक्षे नियतक्रमविशिष्टवर्णानामेव वाक्यत्वात् "गामानय" "गां बध्नान" "गां मुञ्च" "अश्वमानय" "अश्वं बध्नान" "अश्वं मुञ्च" इत्यादिषु अल्पैरेव तु पदैर्बहुवाक्यविरचनात् वाक्यस्यैव वाचकत्वाङ्गीकारे वाक्यबाहुल्यात् वाचकशक्तयः बह्व्यः कल्पनीयाः स्युः। अतः वर्णसमुदायात्मकवाक्यात् वाक्यार्थप्रतिपत्तिः न सम्भवतीति। अतः वर्णसमुदायात्मकं वाक्यं वाक्यार्थप्रतिपत्तौ कारणमिति यदुक्तं नैयायिकैकदेशिभिः तदनेन ग्रन्थेन निराकृतम्।

गुरुमतावतरणम् ।

ननु त्वदुक्तरीत्या वर्णेभ्यः वाक्यार्थप्रतीत्यनुपपत्तौ लोके वाक्यार्थप्रतीतिरेव न स्यादिति एकदेशिन अभिप्रायमाशङ्क्य लोकसिद्धार्थाभिधायिभिः पदैरेव वाक्यार्थप्रतीतिस्सम्भवतीति गुरुमतानुयायिभिरुच्यते ।

"पदार्थानेव वाक्यार्थं मिथस्सङ्गतिशालिनः ।
आचक्षतेऽभिधीयन्ते पदैस्ते च तथाविधाः ॥"

पदार्था एव तावत् परस्परान्विताः वाक्यार्थ इत्युच्यन्ते । ते च तथाभूता एव स्वपदैरभिधीयन्ते न च अर्थस्वरूपमेव पदाभिधेयं नान्वितमिति वाच्यम् । तदेवोक्तं—

"पदानन्तरजाता हि संविदन्वितगोचरा ।
अन्वितार्थाभिधायित्वं पदानामुपकल्पयत् ॥" इति न्या-र-मा-99

यतः अन्वितेषु व्युत्पत्तिः अतः अन्वितार्था एव पदैरभिधीयन्त इति अन्वितार्थपराणि पदान्येव वाक्यमिति । तेन पदमेव वाक्यार्थस्य मूलमिति गुणभूतपदार्थान्तरान्वितप्रधानभूतपदार्थः वाक्यार्थ इति । तच्च वाक्यार्थं पदान्येवावगमयन्ति । पदानां पदार्थान्तरान्वितस्वार्थे शक्तत्वात् । लोके तत्रैव व्यवहारो दृश्यते । "घटमानये"त्यादि स्थलेषु । अन्यथा तत्र नयनादिरूपव्यापारे प्रवृत्तिरेव न स्यात् । अतः आकाङ्क्षासन्निधियोग्यताविशिष्ट अर्थान्तरान्वितार्थाभिधायीनि पदानि वाक्यम् । तद्वाक्यार्थबोधजनकमिति प्राभाकरमतम् ।

प्राभाकरमतनिराकरणम्

तन्न युक्तम् । सर्वेषां पदानां इतरान्वितार्थाभिधानशक्तिस्वीकारे अस्य पदस्य जातेरर्थः इत्यादिना जातिद्रव्यगुणादिरूपपदार्थविभाग एव न स्यात् । किञ्च एकैकस्य इतरान्वितस्वार्थाभिधायकत्वे एकैकस्मिन्वाक्ये यावन्ति पदानि श्रूयन्ते तावन्तो वाक्यार्थाः भवेयुरिति वाक्यभेददोषः प्रसज्येत । किञ्च पदार्थान्तरान्वितपदार्थाभिधाने तत्तत्पदार्थान्तरं

तत्तत्पदेनानभिहितं वा? अभिहितं वा? यद्यनभिहितेनेतरेणान्वितं स्यात् वाक्ये श्रूयमाणानां द्वितीयादि पदानां वैयर्थ्यं स्यात् प्रथमपदेनैव तत्तत्पदार्थस्य अभिहितत्वात्। यद्यभिहितेनेतरान्वितं स्यात् तदा "गामानय" इत्यत्र गोशब्दोच्चारणकाले "आनये"ति पदस्य अनुच्चरितत्वात् आनयनान्वितगोशब्दार्थः गोपदेन वक्तुं न शक्यते। आनयनपदस्यापि गवान्वित-आनयनपदार्थः न संभवति। किञ्च पदार्थान्तरान्वितपदार्थमभिधातुं केवलं तत्तत्पदेन तत्तत्पदार्थाभिधानमपेक्षते इति गोशब्दस्य आनयनपदार्थाभिधाने आनयनशब्दस्य गोशब्दर्थाभिधाने अपेक्षा विद्यत इति अन्योन्याश्रयः प्रसज्यते। न च अभिधानमन्यत् स्मरणमन्यत् गोशब्दस्मारितेन अर्थेनान्वितः आनयनशब्दार्थः आनयनपदेन आनयनशब्दस्मारितेनान्वितः गोशब्दार्थः प्रतिपाद्यत इति वाच्यम्। गां पश्य इत्यत्र गोशब्दस्यानयनान्वितार्थ एव वक्तव्यः स्यात्। प्रासादं पश्येत्यत्र पश्यति शब्दस्य गवान्वितार्थ एव वक्तव्यः स्यात् तादृशार्थाभिधानेनैव आकाङ्क्षायाः उपशान्तत्वात्। गां पश्येत्यत्र गोपदस्य पश्येति पदेन प्रासादं पश्येत्यत्र पश्यति पदस्य प्रासादपदेनान्वयो न स्यात्। तथा च वाक्यार्थो दुर्लभो भवेत्। किञ्च इतरान्विते शक्तिरितिवादिनां मते अन्वितार्थे शक्तिः। अन्वये च पृथक् शक्तिरिति शक्तिद्वयं कल्पनीयं स्यात्। नच पदानां जात्यर्थवाचित्वे व्यक्त्यर्थवाचित्वाभावेऽपि यथा व्यक्तिरपि बुध्यते तथा अन्वितार्थाभिधानेनैवान्वयोऽपि अभिहितः स्यादिति वाच्यम्। विनाऽपि अन्वयम् अर्थस्वरूपप्रतिभासात्। यद्यन्वयाविनाभावित्वादर्थस्य शक्तिप्रयोज्य अर्थज्ञाने अन्वयोऽपि भासते इति उच्येत, धूमस्यापि वह्न्यविनाभावित्वात् धूमज्ञानमेव वह्न्यवगाहि भवेत्। इति धूमेन वह्न्यनुमानं न स्यात्। किञ्च रूपिज्ञानं विना रूपज्ञानं भवत्येवेति पार्थसारथिमिश्रैरुक्तम्। रूपिशून्या च रूपेषु बुद्धिः अस्त्येव। तद्यथा-

"हिमवर्तिनि हेमन्ते शैत्ये संवित्त्वगिन्द्रियात्।
तथा गन्धवति द्रव्ये नासाग्रमधिरोहति॥
न द्रव्ये जायते संविद् गन्ध एव तु जायते।"

इति । अतः जातिव चकशब्देनैव व्यक्तेरपि भानं सम्भवतीति यदुक्तं तन्न सङ्गच्छते । कुतः पदस्य जात्यभिधाने शक्तिरस्ति न तु पृथिवीव्यक्त्यभिधाने शक्तिः । यदि व्यक्तावपि शक्तिः स्यात् । यदि जातौ स्वाभाविकी शक्तिः व्यक्तौ जात्यभिधायिकत्वनिमित्ता शक्तिरिति कल्पनेऽपि प्रमाणाभावः । अतः शब्दस्य जातावेव शक्तिः । व्यक्तौ तु आनयनकर्मत्वाद्यनुपपत्त्या आक्षेपलभ्यत्वमिति अतः न व्यक्तिः शाब्दबोधविषयः इत्यङ्गीकरणीयम् ।

भाट्टमतम्

तस्मात् "पदै. पदार्था अभिधीयन्ते ।" पदानि स्वंस्वमर्थमभिधाय निवृत्तव्यापारणि" इति भाष्यम् । ते च पदार्थाः आकाङ्क्षादिसहकृताः वाक्यार्थमवगमयन्तीति पदार्थानामेव वाक्यार्थकारणत्वं निरूपितम् ।

यत्तु पूर्वपक्षिणा श्रौतः पदार्थः गौरिति वा अश्व इति वा गोसामान्य-अश्वसामान्यवाचिनः पदात् श्रुत्या गोसामान्य–अश्वसामान्यविषयिणी बुद्धिः जायते । ततः गौश्शुक्लः श्वेतोऽश्वः इति शुक्ल-श्वेत-पदान्तरसमभिव्याहाररूपवाक्यानुरोधेन प्रथमतः जायमान शुक्ल-कृष्ण-सामान्यरूपा बुद्धिः कृष्णरूपविशेषात् नापवर्तितुमर्हतीति, अन्यथा श्रुतिवाक्ययोर्विरोधे श्रुतेः प्रावल्यमित्युक्तबलाबलाधिकरणन्यायविरोधः प्रसज्येत इत्युक्तम् । तत् "सत्यमेवैतदिति" भाष्येण विरोधमङ्गीकृत्यैव भाष्यकारः परिहरति ।

यत्र विशिष्टार्थ-प्रत्यायक-वाक्यार्थापेक्षामन्तरा केवलः पदार्थः प्रयुज्यमानः प्रयोजनाभावादनर्थः संजायत इत्यवगतं भवति तत्र आनर्थक्यप्रतिहतानां विपरीतं बलावलमिति न्यायेन श्रुत्यपेक्षया वाक्यस्य दुर्बलत्वेऽपि विशेषमन्तरा सामान्यं न पर्यवस्यतीति सामान्यविशेषयोः विशेषस्य प्रबलत्वात् विशिष्टार्थरूपवाक्यार्थः स्वीकरणीयः । एवं न सर्वत्र वाक्यवशेन विशेषे व्यवस्थापनम् । किन्तु यत्र श्रुत्यवस्थायामेव विशेषावगमः न वाक्यार्थापेक्षा तत्र न्यायविरोध एव नास्तीति एवं बलावलाधिकरणन्यायः व्यवस्थापनीयः ।

अपि च गां, अश्वमित्यादिस्थलेषु प्रातिपदिकादुच्चरन्ती द्वितीयादि विभक्तिः श्रूयते। तत्र प्रकृत्यर्थः प्रत्ययार्थश्चेति द्वावंशौ वर्तेत। तयोर्मध्ये यद्यपि प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोस्तु प्रत्ययः प्राधान्येनेति न्यायेन प्रत्ययस्य प्राबल्यं वर्तते। तथापि प्रत्ययार्थः कर्मत्वरूपसामान्यरूपोऽर्थः, प्रकृत्यर्थः गवादि–विशेषरूपोऽर्थः।

"न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः" इति न्यायेन उभयोः परस्पराकाङ्क्षायास्सत्त्वात् प्रबलप्रत्ययार्थः कर्मत्वरूपः सामान्यात् दुर्बलः प्रकृत्यर्थः गोविशेषः तन्निष्ठकर्मत्वमपि तद्विशेष एव पर्यवस्यति। प्रत्ययानां प्रकृत्यर्थानुरक्तस्वार्थबोधकत्वस्वाभाव्यात्। तदेवोक्तं शाबरभाष्ये– "प्रातिपदिकादुच्चरन्ती द्वितीयादिविभक्तिप्रातिपदिकार्थो विशेषक इत्याह"। सा च विशेषश्रुतिः सामान्यश्रुतिं बाधेत। अयं पिण्डितार्थः यत्र प्रबलप्रमाणबोधितस्सन्नपि सामान्यरूपोऽर्थः दुर्बलप्रमाण-बोधितविशेषार्थान्वयमन्तरा न पर्यवस्यतीति न तत्र बलाबलाधिकरणविरोधः प्रसरति इति।

न च पदाभिहितपदार्थानां वाक्यार्थकारणत्वाङ्गीकारे पदानां पदार्थाभिधानशक्तिः पदार्थानां वाक्यार्थाभिधानशक्तिः पदानां पदार्थेषु वाक्यार्थावगम-शक्त्याधानशक्तिरिति शक्तित्रयकल्पनादोषः प्रसज्यत इति वाच्यम्। अन्विताभिधानवादिनामपि शक्तित्रयकल्पनातौल्यमस्त्येव। तथाहि पदानां पदार्थज्ञानजननशक्तिः, अन्वितार्थप्रतिपादनशक्तिः पदगतअन्वितार्थप्रतिपादनाशक्त्याधानशक्तिश्चेति शक्तित्रयकल्पना भवति। किं च नानाशब्दानां एकोऽर्थः। यथा पाणि-हस्त-कर-शब्दाः त्रयोऽपि एकार्थबोधकाः तत्र शब्दत्रयस्यापि एकार्थ-बोधनशक्तित्रयं एकस्यार्थस्य वाक्यार्थबोधनशक्तिरिति शक्तिचतुष्टयं अभिहितान्वयवादिनां मते संगच्छते। न तथा अन्विताभिधानवादिनां मते। त्रिष्वपि शब्देषु प्रत्येकं अन्वितान्वयभेदेन शक्तिषट्कं कल्पनीयं स्यात्। अतः शक्तिकल्पना-लाघवात् अभिहितान्वयवाद एव श्रेयान्। तस्मात् दृष्टानुगुण्यात् शक्तिकल्पनालाघवात् पदार्थनिमित्तक एव वाक्यार्थबोधः न पदनिमित्तक इति। तदेव उक्तं भट्टपादैः–

"पदार्थानां च सामर्थ्यं गम्यमानमपह्नुतम् ।
आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चति ।"

अतः पदानां पदार्थेषु शक्तिः वाक्यार्थाविगमे तु तात्पर्यमात्रम् । पदानि पदार्थ-प्रतिपादनमात्रपर्यवसित-व्यापाराणीति वदन्ति । तेषां मते पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनं वदद्भिः भङ्ग्यन्तरेण पदानां वाक्यार्थानुभव-कारणता स्वीकृतैव पदार्थज्ञानस्य अवान्तरव्यापारत्वात् । एवं वाक्यार्थस्य शाब्दत्वं निर्बाधम् । अतः अयं निर्गलितोऽर्थः पदानां न त्वन्विताभिधाने, न तु वाक्यार्थाभिधाने शक्तिः । किन्तु केवलपदार्थप्रतिपादने शक्तिः इति सिद्ध्यति ।

यत्तु नीलोत्पलवनेष्वद्येति लौकिकवाक्यवत् वैदिकवाक्यमपि पौरुषेयं पदसंघातात्मकत्वादित्युक्तं; तन्न संभवति । उभयोः परस्परविल-क्षणत्वात् । लोके—

"नीलोत्पलवनेष्वद्य चरन्तश्चारु संरवाः ।
नीलकौशेयसंवीताः प्रनृत्यन्तीव कादम्बाः ।।"

इत्यत्र प्रत्यक्षेण अर्थमुपलभ्य एवं जातीयकानि वाक्यानि संहर्तुं शक्यन्ते । वेदे तु "ज्योतिष्टोमेन स्वर्गकामो यजेत" "अग्निहोत्रं जुहुयात्स्वर्गकामः" इत्यादिषु यागस्वर्गयोः साध्यसाधनभावः केनापि प्रमाणेनोपलब्धुं अयोग्यः । सृष्टिप्रभृतिएतावत्पर्यन्तं अनेन यागेनायं स्वर्गः मया अनुभूतः इति वक्ता नास्ति । अतः चाक्षुषप्रत्यक्षेण वा श्रावणप्रत्यक्षेण वा अर्थमुपलभ्य रचितत्व-कल्पनानुपपत्तेश्च । अतः एवंजातीयकेऽर्थे वाक्यानि संहर्तुं पुरुषाणां न किञ्चन बीजमस्तीति भाष्ये उक्तम् । पदार्था एव वाक्यार्थस्य कारणमि-त्युक्तत्वात् वाक्यवाक्यार्थसम्बन्धद्वारेणापि पुरुषानुप्रवेशो नास्तीति सिद्धम् । एवं पदपदार्थसम्बन्धस्य नित्यतया वाक्य- वाक्यार्थस्यापि कृतकत्वं नास्ति । किन्तु पदार्थमूलकत्वमेवेत्यनेन च चोदनानां प्रामाण्याक्षेपः परिहृतः ।

वेदग्रन्थस्य पौरुषेयत्वनिरासः

अधुना वेदशाखायां काठकं कालापकं तैत्तिरीयकमित्यादि समाख्यावशात् जननमरणवतां बबरकुमुरविन्दादीनां वेदे श्रूयमाणत्वात्

तत्तत्कृत्यनन्तरमेव तत्तन्नाम्ना वेदग्रन्थः व्यपदिश्यते भारतादिवत् रचितत्व-आवश्यकत्वेनेति वक्तुं शक्यत्वात् पौरुषेयत्वाक्षेपे प्राप्ते "आख्या प्रवचनादि"त्यादिसिद्धान्तसूत्रैः तत्तन्नाम्नां प्रवचनातिशयेनापि सम्भवात् "ववरः प्रावाहणिरकामयते"त्यादिषु प्रवाहणस्यैव असिद्धत्वात् तदपत्यं प्रावाहणिरिति न वक्तव्यः। किन्तु शब्दस्यैव साम्यमात्रं प्रकर्षेण वहनक्रिया कर्तृपरत्वेऽपि यथा अपत्ये इकारः तथा अत्रापि सम्भवतीति। किञ्च "वनस्पतयस्सत्रमासत", "सर्पास्सत्रमासत" गावो वा एतत्सत्रमासतेत्यादयः अनुपपन्ना इति तत्सदृशानि ज्योतिष्टोमेनेत्यादीनीति यदुक्तं तन्न सम्भवति। ज्योतिष्टोमेनेति वाक्ये प्रत्ययस्य कृतिरर्थः कृतिरेव भावनेति। तस्याः आकांक्षात्रयमिति, किमित्याकांक्षायां स्वर्गः अन्वेति, केनेत्याकांक्षायां यागेनेति, कथमित्याकांक्षायां तत्प्रकरणे श्रूयमाणमङ्गजातमितिकर्तव्यतात्वेन अन्वेति। एवं वाक्यस्य पिण्डितार्थं परस्परसमन्वितमवगच्छन्तः पुरुषाः तत्र प्रवर्तयन्ति। एवं प्रवृत्ते सति कथमुन्मत्तवाक्यसदृशानि भवेयुः? वनस्पतयस्सत्रमासतेत्यादयः वनस्पत्यादय एव सत्रयागमन्वतिष्ठन् किमुत चेतनाः भवदादयः इति स्तोतुं प्रवृत्ता इति न कापि क्षतिः। अतः वाक्यसमुदायात्मकग्रन्थस्यापि भारतादिवत् पुरुषरचितत्वं न सम्भवति। एतावता त्रिभिरपि प्रकारैः वेदे पुरुषानुप्रवेशासंभवात् वेदस्य अपौरुषेयत्वं सिद्धम्।

अपौरुषेयत्वनिरूपणम्

अत एव वार्तिककारैः कल्पसूत्राधिकरणवार्तिके वेदापौरुषेयत्वमेवं समर्थितम्। तथा हि—

यातद्वहिरवस्थानाद्वेदरूपं न दृश्यते।
ऋक्सामादिस्वरूपे तु दृष्टे भ्रान्तिर्निवर्तते॥

वेदानां पौरुषेयता न शक्याध्यवसातुं हि मनागपि सचेतनैः

दृष्टार्थव्यवहारेषु वाक्यैर्लोकानुसारिभिः।
पदैश्च तद्विधैरेव नराः कार्याणि कुर्वते॥
प्रपाठकचतुष्षष्टिनियतस्वरकैः पदैः।
लोकेऽप्यश्रुतप्रायैः ऋग्वेदं कः करिष्यति॥

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं ।
होतारं रत्नधातमं इत्येतन्नृवचः कथम् ।।

किमालोच्य क्व वा दृष्टं वाक् प्रतिच्छन्दमीदृशम् ।
रचयेत् पुरुषो वाक्यं किं चोद्दिश्य प्रयोजनम् ।।

अग्नेः पुरोहितत्वं च क्व दृष्टं येन कीर्त्यते ।
ईले शब्दप्रयोगश्च क्व दृष्टः स्तोत्रगोचरः ।।

देवत्वं चास्य यज्ञस्य विहितं क्वोपलक्षितम् ।
होतृत्वमपि यत्तस्य देवताह्वानहेतुकम् ।।

रत्नधायितमत्वं च तन्नरैः ज्ञायते कथम् ।
अविज्ञातगुणानां च स्तवनं कल्पते न च ।।

स्वतन्त्रवेद एवैतत् केवलो वक्तुमर्हति ।
इषेत्वेत्ययमप्यर्थः पुरुषेणोच्यतां कथम् ।।

शाखाच्छेदोपयोगश्च पुंभिरुत्प्रेक्ष्यते कुतः ।
एवमूर्जेत्ययं मन्त्रः केन शाखानुमार्जने ।।

वक्तुं शक्यो नियोक्तुं ? वा बुद्धिपूर्वककारिणा ।
वायुमन्त्रो वत्सापाकरणं प्रति एकशो
विनियोक्तव्यः इति कः कथयिष्यति ।।

वायुशब्देन बहुवचनान्तेन मातुर्वियोज्यमानः एकैको वत्सः अभिधीयत इति नैतत् बुद्धिपूर्वकारिणा वक्तुं शकयम्-

सामवेदे यदोग्नाई प्रभृतीनां प्रयुज्यते रूपं ।
तत्रापि पौंस्नत्वेनाभिप्रायोऽस्ति कश्चन ।।

को नाम बुद्धिकारी पुरुषः अर्थाभिधानपराणां ऋगक्षराणां लोकव्याकरणादिषु अनवगतपूर्वं अग्ने इत्यस्य पदस्य अकारं ओकारेण प्लुतेन विकुर्यात् ।

"तथा वीतय इत्यस्मिन्नकारस्यापि विक्रियाम् ।
तशब्दस्य च तो शब्दं ये शब्दस्य विरूपताम् ।।

को मूढो बुद्धिपूर्वो वा नियमात् कल्पयिष्यति ।
तेन वेदस्वतन्त्रत्वं रूपादेवावगम्यते ।।

किञ्चिदेव तु तद्वाक्यं सदृशं लौकिकेन यत् ।
तत्रापि च्छांदसी मुद्रा दृश्यते सूक्ष्मदर्शिभिः ।।"

एवं च यदा अध्येतारः अध्यापयितारश्च पार्श्वस्था वा वेद पद-वाक्य तदर्थरूपाण्यालोचयन्ति, तदा स्वसंवेद्यमेव अपौरुषेयत्वमध्यवस्यन्ति इति लोकस्य वेदस्वरूपपरिशीलनपर्यन्तमेव पौरुषेयत्व भ्रान्तिर्भवति । तत्परि-शीलनात्परं सा भ्रान्तिः निवर्तिष्यति । तत्रापि कृत्स्नस्य वेदस्य परिशील-नावसरो नास्ति । तत्तद्वेदेषु विद्यमानानां आदिमन्त्राणां परिशीलनेनैव एतादृशरचना पुरुषाणां अशक्येति अस्मद्बलात्कारमन्तरा त एव पौरुषेय-वादिनः एते वेदाः अपौरुषेया इति वदिष्यन्ति अश्रुतप्रायैः नियतस्वरयुक्तैः पदैः प्रपाठकचतुष्षष्ठियुक्तं ऋग्वेदं कः करिष्यति ? अग्नेः पुरोहितत्वं क्व केन दृष्टमिति वक्तुं शक्यम् । एवमेव यजुर्वेदे इषेत्वेत्यस्य मन्त्रस्य शाखा-च्छेदने विनियोगं वक्तुं कस्समर्थः ? एवमेव सामवेदे आदिमन्त्रस्य अग्न आयाहीत्यत्र अग्न इत्यस्मिन् स्थाने ओ ग्ना इति साम गेयमिति कः वदिष्यतीत्याद्युपपत्तिभिः वेदः स्वतंत्रः, न केनापि रचित इति अपौरुषेय इति सुस्पष्टं प्रतीयते । न च वेदः अपौरुषेयः अकर्तृकः नित्यः इति सिद्धांतः न सङ्गच्छते बहूनां बाधकवाक्यानां सत्त्वात् इति वाच्यम् । तेषां परिहारः अन्यथा वक्तव्यः । तथा हि — तानि वाक्यानि एवं श्रूयन्ते ।

1. अस्य महतो भूतस्य निःश्वसितमेवैतत् यदृग्वेदो यजुर्वेदस्सामवेदो-थर्वाङ्गिरसः (बृह) इत्यत्र परमेश्वरस्य निःश्वास रूपो वेद इति ।

2. ऋचः सामानि जज्ञिरे छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत इति जनी-प्रादुर्भावे इत्यस्मात् धातोः ऋगादयस्सर्वेऽपि परमेश्वर-सकाशादुत्पन्ना इति ।

3. इदँ सर्वमसृजत ऋचो यजूँषि सामानि इत्यादिना ग्रन्थेन परमेश्वरेण सृष्टा इत्युच्यते ।

4. तेभ्यस्ते पानेभ्यास्त्रयो वेदाऽजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः इति श्रूयते ।

5. यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इत्यनया श्रुत्या जगदीश्वरः सृष्ट्यादौ ब्रह्माणं सृष्ट्वा तस्मै स्वे विद्यमानान् वेदान् प्रहिणोति ददातीति प्रतिपाद्यते ।

6 नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यः इत्यत्र मन्त्रकर्तारः ऋषयः इति कथ्यते ।

प्रथमश्रुतौ परमेश्वरनिःश्वासरूपा वेदा इति द्वितीयस्यां तृतीयस्यां चतुर्मुखब्रह्मणः सकाशादेव सर्वे वेदा उत्पन्ना इति, चतुर्थ्यां एकैकस्माद्देवात् एकैको वेदः उत्पन्नः इति, पञ्चम्यां श्रुतौ इतः पूर्वं विद्यमानानेव ईश्वरः ब्रह्मणे ददाति इति, षष्ठ्यां श्रुतौ मन्त्रकृद्भ्यः इत्यनेन ऋषयः मन्त्रकर्तारः इति स्पष्टतया अभिधीयते । वेदव्यास इत्यनेन व्यासस्य वेदकर्तृत्वं वदन्ति केचित् । तन्न युक्तं वेदव्यासभगवतः वेदविभाजकत्वमेव न तु कर्तृत्वम् । ब्रह्मसूत्रभाष्ये शास्त्रयोनित्वाधिकरणे शास्त्रयोनित्वादिति सूत्रकृता वेदव्यासमहर्षिणा सर्वज्ञस्य ब्रह्मणः वेदकर्तृत्वमुक्तम् । तेनैव देवताधिकरणे "अत एव च नित्यत्वम्" इति अत एव च नित्यत्वमिति वेदानां नित्यत्वं प्रदर्शितम् । यद्यपि उपरितनवाक्येषु परस्परविरोधः दृश्यते, तथापि श्रुत्यन्तरस्मृत्यन्तरसंवादेन यथाऽविरोधः तथा एकवाक्यता संपादनीया । "न कश्चिद्वेदकर्ता च" इति पराशरस्मृतिः कश्चिदपि वेदानां कर्ता नास्तीति वदति । तेन यत्र यत्र वेदकर्तृत्वं प्रतिपाद्यते तत्र तत्र वेदाभिव्यञ्जकत्वमेवेति वक्तव्यं तदेवोक्तं मत्स्यपुराणे —

अस्य धर्मस्य सर्वज्ञः कल्पादौ परमेश्वरः ।
व्यञ्जकः केवलं विप्राः नैव कर्ता न संशयः ।।

ब्रह्माणं मुनयः पूर्वं सृष्ट्वा तस्मै महेश्वरः।
दत्तवानखिलान्वेदान् विप्रा आत्मनि संस्थितान्॥
ब्रह्मणा चोदितो विष्णुः व्यासरूपी द्विजोत्तमाः।
हिताय सर्वभूतानां वेदभेदान्करोति सः॥

अनेन वेदकर्तृत्वप्रतिपादकवाक्यानि वेदाभिव्यञ्जकपराण्येवेति अवगन्तव्यम्। किं च अग्निवाय्वादित्येभ्यो वेदा अजायन्तेति चतुर्मुखब्रह्मणस्सकाशादजायन्तेत्यस्य विरोधः महासृष्टि-अवान्तरसृष्टि भेदेन परिहर्तव्यः। किं च मन्त्रकृद्भ्यः इत्यत्र मन्त्रकृत्त्वं नाम अनधीत्यैव वेदानामस्खलितक्रमवर्णतया दर्शनम्। तच्च तत्तन्मन्त्रस्मृतिपूर्वकं प्रजापतिना यथापूर्वं सृष्टैः तत्तन्नामरूपभाग्भिः प्रवाहपरम्परया आगतैः वसिष्ठादिभिः क्रियत इति वेदस्य नित्यत्वमन्त्रकृत्त्वाऽविरोध इत्यर्थः श्रुतप्रकाशिकायाम्। तदेवोक्तं भगवता व्यासेन मनुस्मृतौ मनुना च—

"युगान्तेन्तर्हितान्वेदान्सेतिहासान्महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाता स्वयंभुवा।

इति उक्तम्। अयमर्थः वेदमनधीत्यैव नियतस्वरक्रमवर्णानां स्खालित्यं यथा न भवति तथा वेदमन्त्रदर्शित्वमेव ऋषिणां वेदकर्तृत्वम्। अतीन्द्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनादृषीणां ऋषित्वम्। तदेवोक्तं श्रुतौ "अजान् ह वै पृश्नीँस्तपस्यमानान्..... ...तदृषीणां ऋषित्वमिति तैत्तिरीयारण्यकम् 2.9 सायणभाष्यम्। कल्पादावेव ब्रह्मणा सृष्टाः न हि अस्मदादिवत् कल्पमध्ये पुनः पुनः जायन्ते। तस्मादजाः ते च पृश्नयः=शुक्लाः स्वरूपेणैव निर्मलास्सन्तोऽपि पुनस्तप आचरन्। तदीयेन तपसा तुष्टं स्वयंभु=ब्रह्म जगत्कारणत्वेन स्वतस्सिद्धं परब्रह्मवस्तु वेदस्वरूपेण कांचिन्मूर्तिं धृत्वा तपस्यमानानृषीन् अनुग्रहीतुं अभ्यानर्षत्=आभिमुख्येन प्रत्यक्षमागच्छत्। ततः ते मुनयः ऋषि=गतविति धात्वर्थविषयत्वात् ते ऋषयः अभवन्। "ऋषिर्दर्शनात्" इति निरुक्तम्। अनेनैतदुक्तं भवति वेदप्राप्त्यर्थं तपश्चर्यमाणान् मुनीन् प्रति वेद एव स्वयं तान् प्रत्यागच्छत्। तद्वेददर्शनादेव तेषां ऋषीणां ऋषित्वमिति। अतः न कश्चन ऋषिः वेदमरचयत्

रचितत्वाभावादेव वेदस्य नित्यत्वम् । तदेव "वाचा विरूपनित्यया" इति श्रुतिरप्यवादीत् । रूपयतीति रूपः कर्ता । विगतः कर्ता यस्याः सा विरूपा । अत एव नित्या । तया नित्यया वाचा अग्निः स्तूयत इति अग्निचयनप्रकरणे (तै॰ सं 2-6) उक्तम्—

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
शिवाद्या ऋषिपर्यन्ता स्मर्तारोऽस्य न कारकाः ।।"

इति वचनेनापि वेदानां ऋषयः स्मारकाः न तु कारका इत्युक्तम् ।

"अत एव च नित्यत्व"मिति ब्रह्मसूत्रेण व्यावहारिकनित्यत्वमुपपादितं वेदान्तदर्शने । व्याख्यायुतसर्वदर्शनग्रन्थस्योपोद्घाते "तस्य ह वा एतस्य महतो भूतस्य निश्वासितमेवैतत् यदृग्वेदो यजुर्वेदस्सामवेदोऽथर्वाङ्गिरस" इति निश्वसितन्यायेन परमात्मसकाशात् वेदा आविर्भूता इत्युक्तम् । "यो ब्रह्माणं विदधाती"त्यत्रापि वेदांश्च प्रहिणोति तस्मै इत्यनेन ब्रह्माणं जगदादौ सृष्ट्वा जगदीश्वरः तस्मै वेदान्ददातीत्युक्तत्वात् विद्यमानानामेव प्रदानं संभवति नाविद्यमानानाम् । अतः वेदानां कर्ता न चतुर्मुखः नापीश्वरः नापि व्यासः तस्य वेद-विभागकारित्वात् । नापि ऋषयः तेषां मन्त्रद्रष्टृत्वात् । नापि निर्गुणं ब्रह्म । ब्रह्मविवर्तत्वं वियदादेरिव वेदस्यापीति शास्त्रयोनित्वाधिकरणे उपपादितम् । अतः येन केनापि प्रकारेण कर्तृत्व–अकर्तृत्व–रूपविरोधो नास्तीति वेदा अपौरुषेया इति नित्या इत्यपि सिद्धम् ।

अप्रामाण्यकारणनिराकरणम्

अपौरुषेयत्वादेव अप्रामाण्यकारणानि पुरुषनिष्ठभ्रम-प्रमादादीन्यपि न संभवन्ति । अप्रामाण्यकारणानां पञ्चानां मध्ये कारणे दोषवत्ताज्ञानं यदप्रामाण्यं कारणं तदेकम् "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" इति सूत्रावयवेन परिहृतं भवति ।

"अग्निहोत्रं जुहुयात्स्वर्गकामः" इत्यत्राग्निहोत्रात् स्वर्गो भवति न वा इति संशयज्ञानं यतः न जायते अतः उत्पन्नस्य ज्ञानस्य संशयात्मकता-

रूपअप्रामाण्यकारणं तृतीयं परिहृतं भवति । किञ्च "अग्निहोत्रं जुहुयात्स्वर्गकाम" इत्यनेन अग्निहोत्रात्स्वर्गो भवतीति यद्ज्ञानमुत्पन्नं तदनन्तरं तस्य बाधकज्ञानं अग्निहोत्रात् स्वर्गो न भवतीति न जायते । अतः बाधकज्ञानरूप अप्रामाण्यकारणं चतुर्थमपि न संभवतीति "अव्यतिरेकश्च" इति सूत्रावयवेन परिहृतं भवति । "अग्निहोत्रं जुहुयात्" इत्यनेन स्वर्गरूपश्रेयस्साधनताकं इदमग्निहोत्राख्यं कर्मेति ज्ञानं यतः जायते अतः ज्ञानानुत्पत्तिरूप अप्रामाण्यं द्वितीयमपि न संभवतीति "तस्य ज्ञानमुपदेशः" इति सूत्रावयवेन परिहृतं भवति । अग्निहोत्राख्यं कर्म स्वर्गरूपश्रेयस्साधनताकमिति प्रत्यक्षादिभिरनवगम्यमानमेव, अग्निहोत्रादिवाक्येन ज्ञायत इति अनुवादत्वरूप अप्रामाण्यकारणं पञ्चममपि न संभवतीति, "अर्थे अनुपलब्धे" इति सूत्रावयवेन परिहृतं भवति । अतः वेदस्य धर्मं प्रति अप्रामाण्यकारणानां मध्ये कस्याप्यभावादेव स्वतः प्रामाण्यं सिद्धम् । किञ्च सूतसंहितायामपि वेदप्रामाण्यं प्रति एवमुक्तम् ।

"श्रुतिस्सनातनी साध्वी सर्वमानोत्तमोत्तमा ।
अतीन्द्रियार्थे विज्ञाने मानं नश्श्रुतिरेव हि ।।

श्रुत्येकगम्ये सूक्ष्मार्थे स तर्कः किं करिष्यति ।
मानानुग्राहकस्तर्कः न स्वतन्त्रः कदाचन ।।

श्रुतिस्सनातनी शंभोः अभिव्यक्ता न संशयः ।
शङ्करेण प्रणीतेति प्रवदन्त्यपरे जनाः ।।

वेदोऽनादिश्शिवस्तस्य व्यञ्जकः परमार्थतः ।
अभिव्यक्तिमपेक्ष्यैव प्रणीतेत्युच्यते शिवः ।।
तस्माद्वेदोपदिष्टार्थः यथार्थो नात्र संशयः ।।"

वेदः सनातनप्रमाणानां मध्ये उत्तमप्रमाणम् । अतीन्द्रियार्थबोधकं श्रुत्यैव ज्ञापिते अर्थे तर्कः किं करिष्यति ? केवलं श्रुतिरूपप्रमाणस्य उपष्टम्भक एव भवति । ये शङ्करेण श्रुतिः प्रणीतेति वदन्ति ते तावच्छङ्करस्य अभिव्यञ्ज-

कत्वं अपेक्ष्यैव तथा वदन्ति तस्माद्वेदोपदिष्टार्थः यथार्थं एव प्रमाणमेवेत्युच्यते । अतः वेदस्य प्रामाण्यमनपोदितं भवति ।

धर्मशब्दार्थनिगमनम्

तथा च चोदनासूत्रे प्रदर्शितः चोदना प्रमाणमेवेति विग्रहः सोऽपि व्यवस्थितः । धर्मलक्षणसूत्रस्य चोदना लक्षण इत्यस्यायं पिण्डितार्थः चोदनाजन्यप्रमाणविषयः पुरुषनिःश्रेयसहेतुश्च यः स धर्म इति भाष्ये एवमुक्तम् । तस्माच्चोदनालक्षणोऽर्थः श्रेयस्करः ।

उपक्रमोपसंहारभाष्यविरोधपरिहारः

ननु एवं तर्हि श्रेयस्करो जिज्ञासितव्यः अथातो धर्मजिज्ञासेति किं धर्मजिज्ञासया? उच्यते-य एव श्रेयस्करः स एव धर्मशब्देनोच्यते। कथमवगम्यते ? यो हि यागमनुतिष्ठति तं धार्मिक इति समाचक्षते लोके । यश्च यस्य कर्ता स तेन व्यपदिश्यते । यथा पावकः लावकः इति तेन यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते । न केवलं लोके वेदेऽपि ।

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानस्सचन्ते यत्र पूर्वे साध्यास्सन्ति देवाः ॥

इत्ययं मन्त्रः पशुप्रकरणे विनियुक्तः । तस्य भाष्ये एवं व्याख्यातम् ।

देवाः देवत्वं प्राप्तुमिच्छुमनाः यजमानाः यज्ञेन पुरातनेन अग्निना यज्ञं नूतनमग्निं मिलित्वा अजयन्त=यागं कुर्वन्तः तथा कृतानि कर्माणि धर्माणि प्रथमानि मुख्यानि आसन् ते यागकर्तारः महिमानः महिमोपेताः यस्मिन् स्वर्गे साध्याः सन्ति तं नाकं स्वर्गं; सचन्ते=समवयन्ति प्राप्नुवन्ति इत्यर्थः अनेन धर्मार्थशब्दयोः सामानाधिकरण्येन स्वर्गरूपश्रेयस्साधनताकं क्रमं धर्म इत्युक्तं भवति । धर्म इत्युपसंहार्ये यच्छ्रेयस्करभाषणं तद्धर्मपदवाच्यार्थनिरूपणविवक्षया । तदेवोक्तं वार्तिककारैः—

"श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः ।
चोदना लक्षणैस्साध्या तस्मात्तेष्वेव धर्मता ॥

अन्यत्साध्यमदृष्ट्वैव यागादीननुतिष्ठतः ।
धार्मिकत्वसमाख्यानं तद्योगादिति गम्यते ।।

पश्वादीनि फलस्य धर्माणीति च व्यवस्थितम् ।
चित्रागोदोहनादीनां तान्युक्तानि फलानि च ।।

तस्मात्तेष्वेव धर्मत्वं धर्माणीति च दर्शनात् ।
लिङ्गसंख्याविनिर्मुक्तो धर्म शब्दो निदर्शनम् ।। इति ।

अत्र पुरुषप्रीतिः श्रेयः इत्युच्यते सा पुरुषप्रीतिः, न तु लौकिककर्मजन्या । न सुरापानादिकर्मजन्या । किन्तु वेदचोदितैः द्रव्यगुणकर्मभिः साध्या या पुरुषप्रीतिः सैव । तत्साधनभूतानि द्रव्यगुणकर्माणि धर्माणीति । यथा दध्नेन्द्रियकामस्य जुहुयात् इत्यत्र होमाश्रयीभूतेन दध्ना इन्द्रियं भावयेत् इति इन्द्रियरूपफलसाधनत्वेन विहितस्य दध्नः धर्मत्वमिति । एवमेव अरुणया पिङ्गाक्ष्या क्रीणातीति सोमक्रयणसाधनत्वेन विहितस्य गोद्रव्यगत आरुण्यरूपगुणस्य धर्मत्वमिति । "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति स्वर्गसाधनत्वेन विहितस्य ज्योतिष्टोमाख्यकर्मणः धर्मशब्दाभिधेयत्वमुक्तम् । यागकर्तारः यागसाध्यं फलमदृष्ट्वैव यागादीननुतिष्ठन्ति । साक्षात्तत्साध्यम् अपूर्वमदृष्ट्वैव केवलमनुष्ठीयमानयागदर्शनमात्रेण लोके प्रयोक्तारः तं यागानुष्ठायिनं पुरुषं धार्मिक इति समाचक्षते ।

धर्मः वेदैकगम्य इत्यत्र आक्षेपपरिहारौ

ननु तेषां द्रव्यक्रियगुणादीनां धर्मत्वमुक्तम् । तेषां इन्द्रियोपलब्धियोग्यत्वमस्त्येव । तत्र धर्मत्वं नोपलभ्यते । कथं तेषां धर्मत्वं कथ्यते इति चेत्, उच्यते —

द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।
तेषामैन्द्रियकत्वेऽपि न तादूप्येण धर्मता ।।

श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रतीयते ।
तादूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ।। इति ।

तेषु श्रेयस्साधनतात्वाकारः वेदैकगोचरः तदाकारत्वेनैव तेषां धर्मत्वमिति न विरोधः । अतः यागादीनामेव श्रेयस्साधनानां धर्मशब्दाभिधेयत्वं अनधिकारिकृतयागादेस्तु श्रेयस्साधनत्वाभावादेव न धर्मत्वापत्तिशङ्कापि । किञ्च पश्वादीनि फलत्वेन प्रसिद्धानि । ततश्च तानि तेषां फलानि । ते यागाः धर्मा इति गम्यन्ते । तानि च चित्रादीनां फलत्वेन चोदनातः अवगतानीति चित्रादीनामेव धर्मत्वमित्यर्थः । यज्ञेनेत्यत्र पुंलिङ्ग एकवचनान्तेन यज्ञशब्देन नपुंसकबहुवचनान्तस्य धर्माणीत्यस्य कथं सामानाधिकरण्यमिति न वाच्यम् । तानि इत्यत्र हि तच्छब्दः यागमेव परामृशति । तस्यैव प्रकृतत्वात् । तत्सामानाधिकरण्याच्च धर्मशब्दोऽपि तमेव बोधयति । लिङ्गवचनव्यत्ययस्तु छान्दसत्वादेव न सामानाधिकरण्यं प्रतिबध्नातीति । अतः अस्मिन् भाट्टमते चोदना प्रेरणा, फलभावना, लिङ्गाद्यर्था, अभिधारूपा । तथा च केन कथमित्याकाङ्क्षामुत्थाप्य लक्ष्यते । करणत्वेन बोध्यते । यः करणीभूतः स धात्वर्थयागादिः स धर्मः ।

धर्मलक्षणे प्रमाणान्तरसंवादः

"पुण्यो वै पुण्येन कर्मणा पापः पापेन" इति श्रुतौ इष्टापूर्ते स्मृतिधर्मे इति स्मृतौ च यज्ञादिषु धर्मशब्दप्रयोगः साधु संगच्छते । अत एव चोदनागम्यः अग्निहोत्रादिः धर्मः नातल्लक्षणः चैत्यवन्दनादिरिति शास्त्रदीपिका । एवमेव विश्वामित्रः—

यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः ।
स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते ॥ इति ।

अनया स्मृत्या यागदानादिकं धर्म इति प्रतीयते । आपस्तम्बोऽपि न धर्माऽधर्मौ चरत आवां स्व इति न देवा न गन्धर्वा न पितर इत्याचक्षते । अयं धर्मः अयमधर्मः इति यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः यं विगर्हन्ति सोऽधर्मः इति श्रुतिस्मृत्यादिभिः विहितयागादिकं धर्म इति ताभिः निषिद्धः अधर्म इत्युच्यते । स्वयमेव विग्रहरूपेण धर्माधर्मौ वीथ्यां न चरतः । देवादयः

अयं धर्मः अयमधर्मः इति जनानां पुरतः आगत्य नाचक्षते । किन्तु वेद-शास्त्राभिज्ञाः लोके यं कर्मानुष्ठातारं इदं वेदविहितं कर्म अनेन अनुष्ठीयत इति प्रशंसन्ति । यं प्रति वेदनिषिद्धं कर्म अनुष्ठीयत इति निन्दन्ति-तदनुष्ठितकर्मणि धर्माऽधर्मौ इति कथयन्तीत्यर्थः ।

विद्वद्भिस्सेवितस्सद्भिः नित्यमद्वेषरागिभिः ।
हृदयेनाऽभ्यनुज्ञातो यो धर्मस्तं निबोधत ।।" (मनु 2-2)

इति रागद्वेषरहितैः सत्पुरुषैः विद्वद्भिः साङ्गवेदविद्भिः सेवितः यस्मिन् कर्मणि कृते तेषां विदुषां हृदयं प्रसन्नं भवति स धर्म इति निबोधत इति भाट्टरहस्ये खण्डदेवमहाशयेन ।

अपूर्वे धर्मशब्दः लाक्षणिकः

यद्यपि धर्माऽधर्मौ अदृष्टविशेषात्मकौ न क्रियारूपे । अत एव धर्मः क्षरति कीर्तनादित्यादौ वैशेषिकतन्त्रे च क्रियाजन्यादृष्टे धर्माधर्म-शब्दप्रयोगः । तथापि धर्मस्त्वनुष्ठितः पुंसामित्यादौ तज्जनकविहित-निषिद्ध-क्रियादावपि तच्छब्दप्रयोगात् प्राधान्येन विचार्यते इत्युक्तम् । अनेन अदृष्टविशेष एव धर्मशब्दप्रयोगे मुख्यः क्रियादौ गौण इति प्रतीयते । तथापि वस्तुतस्तु यागादिक्रियादौ अपूर्वे च प्रयोगसत्त्वेऽपि उभयत्र शक्ति-गौरवात् किं च भाष्यवार्तिकशास्त्रदीपिकादिबहुग्रन्थस्वारस्यात् लोके यागादि-क्रियादावेव प्रसिद्धेस्सत्त्वात् तदनुरोधेन तज्जन्यादृष्टविशेषे प्रयोगः लाक्षणिक एवेति वेदितव्यम् ।

अत एव अर्थवादाधिकरणे "इज्याचारे" त्यादिस्मृतौ "एषां मध्येऽयं परमो ब्राह्मण" इत्यत्र षष्ठ्यन्तपदनिर्दिष्टानां ब्राह्मणवदित्यादीनां धर्मत्वप्रतीतेः । अदृष्टे च विहितनिषिद्धधर्माऽधर्मरूपपदार्थ-जन्यत्वसम्बन्धेन लक्षणया प्रयोगोपपत्तेः अपि तु तज्जनकविहितनिषिद्धक्रियागुणद्रव्यादिष्वेव नादृष्टवाचि धर्माऽधर्मपदम् । अतः भाट्टदीपिकाव्याख्याने प्रभावल्यां शंभु-भट्टैरुक्तम् ।

बलवदनिष्टानननुबन्धित्वे सति यददृष्टद्वारा फलकरणं अदृष्टभिन्नं च स धर्म इति यावत् । वस्तुतः विधीयमानत्वं धर्मत्वं निषिध्यमानत्वमधर्मत्वमित्युक्तम् । अनेन यागादिरेव धर्म इति पर्यवसितोऽर्थः । अत एव "तानि धर्माणि प्रथमान्यासन्" "धर्मान्न प्रमदितव्यं" "धर्मं चर" "अयं तु परमो धर्मः" इत्यादिषु क्रियास्वेव धर्मशब्दप्रयोगः संगच्छते । किं च भाट्टदीपिकायां नित्यकर्मणां फलाश्रवणात् धर्मेण पापमपनुदतीति धर्मशब्देन नित्यकर्माण्यभिधाय तेषां पापापनोदनं फलमिति निश्चितम् । अनेनापि कर्मैव धर्म इति ज्ञायते ।

भविष्यपुराणेऽपि "धर्मश्श्रेयस्समुद्दिष्टं श्रेयोऽभ्युदयलक्षणम् ।" इत्यनेन श्रेयस्साधनताकः क्रियाविशेषः धर्म इति ज्ञायते । यद्यपि महाभारते—

"धर्मं शनैस्सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥
एकः प्रजायते तन्तुः एक एव विलीयते ॥

मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥"

इति अनेन परलोकगमनवेलायां जीवेन सह धर्मः अनुगच्छतीत्यनेन द्रव्यक्रियागुणादीनां अनुगमनं न संभवति । धर्मः क्षरति कीर्तनात् इति कीर्तननाश्यत्वं द्रव्यादीनाम् असंभवात् अपूर्वमेव धर्मः इति गम्यते । तथापि— "धर्मपुत्रं निषेवस्व" "स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।" (भ. गी. 3-35) "धर्मसंस्थापनार्थाय संभवामि युगे युगे ।" (भ. गी. 4—8) इत्यादि प्रमाणानुरोधेन अपूर्वे धर्मशब्दः लाक्षणिक इति । क्रियादिषु धर्मशब्दप्रयोगः मुख्य इति ज्ञायते ।

ननु "धर्मोपसंहारमधर्मफलसंहितम् ।
तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥

इत्यत्र धर्माचरणेनैव उपसंहारे भवितव्यम् । तथा च धर्मफलमेव अनुगतं भवति । धर्मजन्यपुण्यविशेषेण अधर्मजन्यपापं नश्यतीत्यर्थः । एवमेव "अधर्मात्तु महोत्पातो भविष्यति हि सांप्रतम्" इत्यत्रापि अधर्मजन्यपाप-विशेषेण महानुत्पातः जनिष्यतीत्यर्थः । एवं च बहुषु स्थलेषु यागदानादयः धर्मशब्देनोच्यन्ते । अनेन यत्र यत्र अपूर्वनामकपुण्यपापयोः धर्माधर्मशब्द-प्रयोगः तत्र तत्र लौकिकवैदिकव्यवहारानुरोधेन क्रियायामेव शक्तौ निर्णी-तायाम् अपूर्वे लाक्षणिक इति ।

परोपकारपरापकारयोः धर्माऽधर्मलक्षणे दोषारोपः

"इदं पुण्यमिदं पापमित्येतस्मिन्पदद्वयम् ।
आ चण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥" (श्लो·वा·)
"परोपकारः पुण्याय पापाय परपीडनम् ।" (वे· व्या)

इति परोपकारपरापकारयोरेव पुण्यत्वेन पापत्वेन निर्वचनस्य कृतत्वात् किमर्थं द्वादशलक्षण्यात्मकं धर्मविचारशास्त्रमित्याशङ्क्य, केवलपरोपकार-परापकारयोः किं लक्षणमिति परस्य सन्तोषजनकं कर्म परोपकारः, परस्य दुःखजनकं कर्म परापकारः इत्येतावन्मात्रोक्तौ—

"य एवमाह तस्याऽपि गुरुस्त्रीगमनादिभिः ।
सुरापानादिभिश्चापि विपक्षैः व्यभिचारिता ॥"

इत्यादि श्लोकवार्तिकग्रन्थेन गुरुदारागमनस्य परोपकारत्वेन शास्त्रेण निषिद्धत्वेऽपि धर्मत्वापत्तिः सुरापानस्य परोपकार-परापकारत्वाभावात्, "न सुरां पिबेत्" इति निषिद्धत्वेऽपि अधर्मत्वानापत्तिः स्यात् । इत्यादि दूषण-जातं प्रदर्श्य अन्ततो गत्वा अतिव्याप्ति-अव्याप्तिरहितं लक्षणम्-विहितत्वं निषिद्धत्वं च ।

"विधिभ्यश्च विधेयानां धर्मत्वेन च निर्णयः ।
निषेधेभ्यश्च निषेध्यानामधर्मत्वेन च निर्णयः ॥

इति वेदविहितत्वे सति श्रेयस्साधनताकानां यागदानादीनां धर्मत्वमिति, वेदनिषिद्धत्वे सति अनिष्टसाधनताकानां अधर्मत्वमिति परिष्कृतम् । अनेन ग्रन्थेनेदमुक्तं भवति । लक्षणप्रमाणाभ्यामुपेतो धर्म इति । मनोवृत्त्यादीनां धर्मत्वमिति यत् पक्षपञ्चकमुक्तं तन्न घटते । किन्तु षष्ठः पक्षः "चोदनालक्षणोऽर्थो धर्म" इति सूत्रोक्तप्रकारेण वेदविहितत्वे सति श्रेयस्साधनताको धर्मः । वेदनिषिद्धत्वे सति अनिष्टसाधनताकः अधर्म इति लक्षणप्रमाणाभ्यामुपेतो धर्म इति अत्र वेदपदं स्मृत्यादीनामप्युपलक्षणमिति धर्माऽधर्मविषये अयमेव मीमांसासिद्धान्त इत्येव सुवचम् ।

इति प्रथमोऽध्यायः



द्वितीयोऽध्यायः

सोमसंस्थानां नित्यकाम्यत्वविचारः

पूर्वस्मिन्प्रकरणे धर्मस्वरूपलक्षणविचारः कृतः। तेन वेदप्रमाणकः श्रेयस्साधनताकः धर्म इति यो धर्मः, स वेदप्रमाणक इति निरधारि तस्मादग्निहोत्र-दर्शपूर्णमासादि-कर्मसमुदायः धर्म इत्युक्तं भवति। इदानीं तादृशकर्मसमुदायमध्ये केषाञ्चित्कर्मणां गौतममहर्षिणा "चत्वारिंशत्संस्काराः" इत्युक्तत्वात् तत्परिगणनेन बहवः यष्टारः नित्यकाम्यविवेकमन्तरा अग्निष्टोमातिरिक्ताः सर्वा अपि संस्थाः नित्या इति, आप्तवाजपेयकुरुवाजपेयावपि संस्थान्तर्गतत्वेन परिगण्य तावपि नित्याविति, एवमेव अन्यानि काम्यानि कर्माण्यपि नित्यकर्मसु विद्यमानं यथाशक्तिन्यायं स्वीकृत्य तेनैव न्यायेन नित्यवदनुष्ठीयेरन्। तदर्थं मीमांसाकल्पसूत्रसिद्धान्तानुसारेण सर्वा अपि संस्था नित्या उत काम्या इति। संस्थानां परिगणने मतभेदः। मतभेदे किं प्रमाणम् ? संस्थाशब्दार्थः, अन्यासु संस्थासु अन्यासां संस्थानां निवेशश्च कथमित्येतत् सर्वमत्र चिन्त्यते। तत्र प्रथमतः, नित्यनैमित्तिक-काम्यकर्माण्यधिकृत्य, कानि नित्यानि, कानि नैमित्तिकानि, कानि काम्यानि? इति लक्षणपुरस्सरमुपपाद्य तेषु कर्मसु अधिकारिलक्षणमुक्त्वा नित्यनैमित्तिककाम्येषु कीदृशः अधिकारभेदः, तेषां किं फलं, नित्यनैमित्तिकवत् काम्यकर्मणामपि अनुष्ठानावश्यकता अभ्यासश्च अस्ति, न वा इत्यादि विचारणीयम्।

नित्य-नैमित्तिक-काम्यलक्षणविचारः

कर्माणि त्रिविधानि- 1. नित्यानि 2. नैमित्तिकानि 3. काम्यानि चेति।

नित्यत्वादीनां किं लक्षणम् ?

येषां कर्मणां यावज्जीवादिवाक्यैः विधीयमानत्वं, यद्वा वीप्साघटितवाक्यैः विधीयमानत्वं, अकरणे प्रत्यवायबोधकत्वं, वा तेषां नित्यत्वम्।

यद्यप्यकरणे प्रत्यवायबोधकत्वरूपलक्षणं नैमित्तिकस्याप्यविशिष्टमतस्तन्निवारणाय नियतनिमित्तकत्वं नित्यत्वम् । अनियतनिमित्तकत्वं नैमित्तिकत्वमिति वक्तव्यम् । तदेवोक्तं भाट्टदीपिकाव्याख्याने शम्भुभट्टीये "अत्र अनियतनिमित्तकानि नैमित्तिकपदेन गृह्यन्ते ।" (6-3-1) इति । स्मृतिसङ्ग्रहकारेण एवं लक्षणमुक्तम् । "नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्" इत्युवतातिक्रमदोषश्रुतेः अत्यागबोधनात् पदश्रुतेः वीप्सया च नित्यत्वमिति कीर्तितमिति यथा—"यावज्जीवमग्निहोत्रं जुहोति" "यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति" विहिताग्निहोत्रदर्शपूर्णमासयोः "सायं जुहोति, प्रातर्जुहोति" इति, "पौर्णमास्यां पौर्णमास्या यजेत" इत्यादिविनियोगान्तरवाक्यानुरोधेन सायंप्रातःकालावच्छिन्नजीवनं तत्तत्पौर्णमास्यमावास्या-कालावच्छिन्नजीवनञ्च निमित्तीकृत्य विहिताग्निहोत्र-दर्शपूर्णमासयोर्नित्यत्वमभिहितं भवति । अत्र निमित्तस्यानुष्ठापकत्वम् । तथा चेत् तत्तत्कालावच्छिन्न-जीवनवतामधिकारिणां सर्वेषां तत्तत्कर्मानुष्ठानं सिध्यत्येवेति अननुष्ठानरूपदोषप्रसङ्ग एव नास्तीत्यापत्तिः । तन्निवारणाय विधिबोधितस्यानुष्ठानस्य आवश्यकताबोधकत्वमात्रम् । तदेवोक्तं भाट्टदीपिकायां "न निमित्तस्यानुष्ठापकत्व", अपि तु विधिबोधितस्यैवानुष्ठानस्य आवश्यकताबोधकत्वमात्रं-तद्बोधस्य च फलं नैमित्तिकाकरणस्य प्रत्यवायजनकत्वबोधः । अन्यथा चेतनप्रवृत्तेरावश्यकत्वानुपपत्तेः । एवं च आवश्यकत्वमेव सप्तम्यादिना बोध्यमानं नैमित्तिकान्वयि" इति ।

एवमेव "वसन्ते वसन्ते ज्योतिषा यजेत" "अहरहस्सन्ध्यामुपासीत" इत्यादिवीप्सापदयुक्तवाक्यैर्विहितत्वात् ज्योतिष्टोमसन्ध्यावन्दनादीनां नित्यत्वम् । एवमेव "अनधीयानाः व्रात्या भवन्ती"ति वाक्येन अध्ययनाकरण व्रात्यत्वरूपदोषस्योक्तत्वात्, "अष्टवर्षं ब्राह्मणमुपनयीत" "एकादशे राजन्यम्" "द्वादशे वैश्यम्" इत्यादिना तत्तद्वर्णानामुपनयनं विधाय "आ षोडशाद्ब्राह्मणस्यानात्ययः" "आ द्वाविंशात्क्षत्रियस्य" "आ चतुर्विंशाद्वैश्यस्य" इत्यादीनां ब्राह्मणादीनां यथाक्रमं षोडश, द्वाविंशति, चतुर्विंशति वयःपर्यन्तं गौणकालमुक्त्वा "तदपि यदतिक्रामेत्" "अतिक्रान्ते सावित्र्याः काले

ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत्," इत्यादिना प्रायश्चित्तमभिहितम् । अन्यथा "ते पतितसावित्रीका भवन्तीत्युक्तत्वात् अध्ययनस्य उपनयनस्य च नित्यत्व-मुक्तम् । एवमेव "प्रजामुत्पादयेत्" इति श्रुत्या अविरक्तस्य गृहस्थस्य प्रजोत्पादनमपि नित्यम् । जैमिनीयन्यायमालायां "ब्राह्मणस्य तु सोमविद्या प्रजमृणवाक्येन संयोगात्" 6-2-11 इत्येतत्सूत्रमवलम्ब्य, "सोमेन यजेत" "स्वाध्यायमधीयीत" "प्रजामुत्पादयेत्" इति विषयवाक्यत्रयं विचार्य नित्यत्वं साधितम् ।

"सोमाधीतप्रजं काम्यं नित्यं वा कामतोऽव्रतः ।
वीप्सानुष्ठेयविज्ञानवाक्यैस्तन्नित्यतेष्यते ।।"

इति । भाट्टदीपिकायामपि अग्निहोत्रादीनां तु नित्यत्वं स्थापितमेव । एवं विद्याया अप्यध्ययनसहिताया: "स्थाणुरयं भारहारः किलाभूत् अधीत्य वेदं न विजानाति सोऽर्थम्" "अनधीयाना व्रात्या भवन्ती"त्यादि निन्दोन्नीताऽ-करणप्रत्यवायबलेन नित्यत्वम् । एवं उपनयनस्यापि षोडशादि-वर्षोत्तरम-करणे प्रत्यवायश्रवणादेव नित्यत्वम् । एवं प्रजोत्पादनमपि "अनुत्पाद्य सुतं मोहान्मोक्षमिच्छन्पतत्यधः"इत्यविरक्तस्य प्रत्यवायश्रवणान्नित्यत्वमित्युक्तम् । एवं च यावज्जीववीप्सादिनिमित्तैः अग्निहोत्र-दर्शपूर्णमासादीनां नित्यत्वं साधितम् । यानि अनियतनिमित्तवशात्कर्तव्यानि तानि नैमित्तिकानि । यथा—"यस्याहिताग्नेरग्निर्गृहान् दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपेत्" इति आहिताग्नेः गृहदहनं निमित्तीकृत्य विहितेयमिष्टिर्नैमित्तिकी, गृहद-हनस्य अनियतप्राप्तत्वात् । एवमेव "अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्" तै॰ सं 2-2-2 इति । आहिताग्नेर्दर्शपूर्णमासातिक्रमणं निमित्ती-कृत्य विहितेयमिष्टिः नैमित्तिकी । एवमेव "वैश्वानरं द्वादश कपालं निर्वपेत्पुत्रे जाते" इति पुत्रजननं निमित्तीकृत्य विहितो वैश्वानरयागः नैमित्तिकः । एवं "राहूपरागे स्नायात्"— इत्यादिना विहितमुपरागनिमित्तकं स्नानमपि नैमित्तिकम् । इत्यादीनि बहूनि विद्यन्ते । अनेन नैमित्तिका-करणे प्रत्यवायो भविष्यतीत्युक्तम् । यथा नियतनिमित्तस्यानुष्ठानावश्य-कताबोधकत्वम् । तद्बलेन नित्यस्याकरणे प्रत्यवायो भवतीत्युच्यते । तथा

अनियत-निमित्तस्यापि निमित्तत्वाविशेषात् नैमित्तिककर्मणामपि आवश्यकतावोधकत्वं तद्वलेन अकरणे प्रत्यवायोऽपि कल्पनीयः। एवं नैमित्तिकान्युक्त्वा इदानीं काम्यान्युच्यन्ते। ततत्फलकामनापदयुक्तवाक्यैः विहितानि काम्यान्युच्यन्ते। यथा– ज्योतिष्टोमेनस्वर्गकामो यजेत" "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" "ऐन्द्राग्नमेकादश कपालं निर्वपेत् प्रजाकामः" इत्यादिवाक्यैः तत्तत्फलसाधनत्वेन विहितानि ज्योतिष्टोमसौर्ययागादीनि।

यत्र यत्र नित्यकाम्यत्वगमकं वचनद्वयं विद्यते तत्कर्म नित्यकाम्यमिति यावत्। तथा हि- कालमाधवीये एकादश्याः नित्यकाम्यत्वविचारे वैरूप्यं च तस्य द्विविधप्रमाणवलादध्यवसीयते। इत्थं नित्यनैमित्तिक–काम्यानां लक्षणपुरस्सरं भेदो निरूपितः। इदानीं वाजपेयादीनां नित्यत्व-काम्यत्वनिर्णयार्थम् अग्निष्टोमातिरिक्ताः संस्थाः नित्या उत काम्या इति विचारणीयाः।

संस्थाविचारः

कति सोमसंस्थाः? संस्थापरिगणने मतभेदः 1. अग्निष्टोमः 2. अत्यग्निष्टोमः 3. उक्थ्यः 4. षोडशी 5. अतिरात्रः 6. वाजपेयः 7. आप्तोर्यामश्चेति सप्तसोमसंस्थाः इति गौतमः। मीमांसकमते तावत् भाट्टदीपिकायां तु 3-6-16 ज्योतिष्टोमे चतस्रः संस्था – 1. अग्निष्टोमः 2. उक्थ्यः 3. षोडशी 4. अतिरात्रसंज्ञिका इति। यास्तु अत्यग्निष्टोम-वाजपेय आप्तोर्यामाख्याः अन्यास्तिस्रः संस्थाः गौतमधर्मसूत्रेषु गण्यन्ते, ता एतासु चतसृषु अन्तर्भूता इति।

सोमनिरूपणप्रस्तावे वसन्तेऽग्निष्टोमः कात्यायनश्रौतसूत्रम्, 7.5 किमर्थमग्निष्टोमपदग्रहणमित्याशङ्क्य प्राथम्यान्नित्यत्वाच्च चतुस्संस्थोऽपि ज्योतिष्टोमः उक्थ्यादीनामनित्यत्वं श्रूयते। पशुकामो उक्थ्यं गृह्णीयात् इत्यादिना "षडुत्तरेऽत्यग्निष्टोमउक्थ्यषोडशीवाजपेयःअतिरात्रोऽप्तोर्यामः 20-9 सू. 10 अ. व्या॰ अत्रात्यग्निष्टोमवाजपेयाप्तोर्यामाणां ज्योतिष्टोमप्राथम्याभिधानेन उत्तरकालता सिद्धा। उक्थ्यषोडश्यतिरा-

त्राणां त्रयाणामपि आचार्येणैव ज्ञापितः उत्तरकालता "उक्थ्यं चोत्तरेष्वेक एवेति" षडुत्तरे षड्विकारा इत्यर्थः । उत्तरो हि विकारो भवति । प्रकृत्यपेक्षया प्रकृतिश्च पूर्वेति ।

ननु अत्यग्निष्टोमवाजपेयाप्तोर्यामाणां ज्योतिष्टोमधर्माः एकाहद्वादशाहयोरित्यनेन विकारत्वं ज्ञापितम् । ज्योतिष्टोमप्रकरणसमधीतानामपि च उक्थ्यादीनामसमानविधानता नित्यानित्यसंयोगविरोधः। अतः तेऽपि विकारा एव । तेन क्रतुविकारत्वस्य अवाच्यत्वात् संस्थाविकारार्थोऽयमारम्भः षडुत्तरे षट्संस्था विकारा इति । तत्र उक्थ्यषोडश्यतिरात्राणा अग्निष्टोमविकारत्वं वाजपेयस्य षोडशविकारत्वं च कथं ज्ञायते ? येन क्रतुपशून् तत्र दर्शयति। तदेतदनतिरात्रे सति रात्रे रूपं क्रियत इति षोडशिक्रतुपशूनामिह दर्शनं भवति। अतिरात्रेऽप्येते भवन्तीति चेत् न । अनतिरात्रे सति रात्रे रूपं क्रियत इति श्रुतेः । तस्मात् षोडशिविकारः वाजपेय इति। अप्तोर्यामेऽपि तिरोह्नौ येभ्यो रात्रि पर्याय उत्तम इति तिरोह्नानां दर्शनं भवति । तेन अतिरात्रविकार अप्तोर्याम इति गम्यते । षडुत्तरे इति विकारत्वज्ञापनस्य प्रयोजनं किमिति चेत् स्वप्रकृत्यपेक्षया क्रतुकरणं यथा स्यादिति । तेन अत्यग्निष्टोमे अग्निष्टोमिकं क्रतुकरणं, वाजपेये षोडशिनः, अप्तोर्यामे अतिरात्रकं, उक्थादिषु तु उक्तमेव ।

कात्यायनमतेऽपि यद्यपि "चतुस्संस्थो ज्योतिष्टोम" इत्यादिना "अत्यग्निष्टोम" इत्यादिना अत्यग्निष्टोम-वाजपेय-अप्तोर्यामाणां तासु चतसृषु संस्थासु अन्तर्भावमङ्गीकृत्य उक्तम् । तथापि "षडुत्तरे" इति सूत्रैकदेशेन षट्संस्थाः तत्तत्संस्थाः न तु क्रतुविकाराः। किन्तु संस्थाविकाराः इत्युक्तत्वात् न कर्मभेद इति ताः षट्संस्थाः अनित्या इत्यपि अभिहिताः । तासां मध्ये उक्थ्यषोडश्यतिरात्राणा अग्निष्टोमविकारत्वं, वाजपेयस्य षोडशिविकारत्वं च, अप्तोर्यामः अतिरात्रविकार इति च स्पष्टमवगम्यते । "स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाविकल्पाः अग्निष्टोम्यमुक्थ्यतातिरात्रमिति" (ला. शौ. सू. 8-1-16. यदा स्वतन्त्रस्य ज्योतिष्टोमस्येति तदा तस्य संस्थाविकल्पाः स्युः । अग्निष्टोमता वा स्यात्, उक्थ्यता वा, अतिरात्रता वा स्यात् ।

किमिदं सिद्धे सति आरभ्यते? उच्यते । मशको ज्योतिष्टोमातिरात्रे विकल्पेन षोडशिनमामनति । तस्य तावदयं प्रतिषेधं दर्शयति । स्वतन्त्रे प्रथमाहारे संस्थाविकल्पे सति ज्योतिष्टोमातिरात्रे षोडशी न स्यात् । अकामे ज्योतिष्टोमे ज्योतिष्टोमेनातिरात्रेणर्धिकामो यजेतेत्येतस्मिन् पक्षे भवति । एतच्च दर्शयति तत्रावशिष्टज्योतिष्टोमस्येत्यत्र संस्थाविकल्पा स्यादिति । अयमभिप्रायः-यदा संस्थाविकल्पतया ज्योतिष्टोमातिरात्रः अनुष्ठीयत तदा "अतिरात्रे षोडशिनं गृह्णाति,नातिरात्रे षोडशिनं गृह्णातीति इति विहितनिषिद्धषोडशिग्रहणाऽग्रहणविकल्पमध्ये षोडश्यग्रहणं "ऋद्धिकामो यजेतेति" ऋथिकामनया अनुष्ठितज्योतिष्टोमातिरात्रे षोडशिग्रहणं व्यवस्थापयति । एवञ्च षोडशिग्रहणाग्रहणयोः व्यवस्थाविकल्पः ज्योतिष्टोमस्य तिस्रः संस्था इति च प्रदर्शितः । अपरो विशेषः "ज्योतिष्टोमातिरात्रः अषोडशिकः अनतिरात्रो वा षोडशिमान्" ला॰ श्रौ॰ सू॰ 8. 12. 9. अनेन षोडशिरहितः ज्योतिष्टोमातिरात्रः अतिरात्ररहितो वा षोडशिमान् क्रतुरिति ।

8. 12. 10. "तस्य बृहत्सप्तदशँ स्तोत्रं स्यात् पञ्चदशस्तोमँ स्वासु प्राकृतं बृहस्तोत्रं शिपिविष्टवतीषु क्लुप्तं सप्तदशस्तोत्रं स्वासु पञ्चदशमित्याह । अग्निष्टोमो वा अग्निष्टोमो वा स्याज्ज्योतिः । अनेन ज्योतिरतिरात्रस्य विकल्पतया ज्योतिरग्निष्टोमः प्रदर्शितः । एवञ्च लाट्यायनमते तिस्रस्संस्था इति तिस्रूणां संस्थानां प्रथमाहारे विकल्प इति, एतदतिरिक्तानां अनित्यत्वमिति चावगम्यते ।

द्राह्यायणेनापि एवमेव उक्तम्— "स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाविकल्पाः" "अग्निष्टोम्यं मुख्यतातिरात्रं" इति सूत्रद्वयरूपेण उक्तं "अग्निष्टोमो वा अग्निष्टोमो वा स्याज्ज्योतिः" इति सूत्रद्वयं एकसूत्रेण प्रणिहितं न ह्यन्यो विशेषः । अनेन द्राह्यायणमतेऽपि तिस्रस्संस्था इति ज्योतिष्टोमस्य प्रथमाहारे अग्निष्टोमसंस्थायाः अतिरात्रसंस्थायाश्च विकल्पश्च प्रदर्शितः । "एष ज्योतिः"द्रा॰ श्रौ॰ सू॰ 6. 4. 20.एषः सर्वक्रतूनां

प्रकृतिभूतो ज्योतिष्टोमः अस्माभिरुपक्रान्तः "सर्वे कामाः सर्वे कामाः" द्रा श्रौ सू. 21.

"षोडशिसाम्नास्तोष्यमाणः यथासनमुपविश्य हविर्धानं गत्वा षोडशिग्रहमवेक्षेत उद्गाता यस्मादन्य इति" द्रा. श्रौ. सू. 7. 1. 1. भाष्यम्। अग्निष्टोमानन्तरं उक्थ्ये वक्तव्ये कथ षोडशिनः प्रस्ताव इत्याशङ्क्य उक्थ्ये विशेषतः वक्तव्याभावात्, षोडशिनः तद्भावाच्च प्रस्तावः। केचिदाहुः- अत्यग्निष्टोमो नाम द्वितीया संस्था। सा च ब्राह्मणस्य नित्या। तत्र यज्ञायज्ञीयस्तोत्रानन्तरं षोडशिस्तोत्रमिति। अग्निष्टोमस्तोत्रानन्तरं उक्थ्यमकृत्वा षोडशिस्तोत्रं क्रियते सा अत्यग्निष्टोमसंस्थेति। अत एष प्रस्ताव इति। तदयुक्तं षोडशिनः उक्थ्यानन्तरभावित्वात् प्रस्तावः। किञ्च न वयं अत्यग्निष्टोमं कल्पब्राह्मणैरधीमहे। येन तदभिप्रायेण प्रस्तावस्स्यात्। न चासौ ब्राह्मणस्य नित्यः। कुतः? स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाविकल्पाः "अग्निष्टोम्यमुक्थ्यतातिरात्रमिति" नित्यसस्थानुक्रमणे तस्यानुपादानात्। "तयोः वर्णविकल्पा" इत्यत्र कल्पकारेणापि नित्येषु अनुपादानात् इत्युक्तम्।

अनेन द्राह्यायणस्य, कल्पकारस्यापि तिस्रस्संस्था इति तिसृणां संस्थानां विकल्प इति, एतदतिरिक्तानां अनित्यत्वमिति च स्पष्टं प्रतीयते।

आर्षेयकल्पकारमतम्

आर्षेयकल्पे 58 पुटे एवमुक्तम् ज्योतिष्टोमस्य संस्थाविकल्पाः। तथा हि- एवं ज्योतिष्टोमस्य तिस्रः संस्था उक्ताः। तत्र सूत्रं "स्वतन्त्रस्य ज्योतिष्टोमस्य संस्थाविकल्पाः" "अग्निष्टोम मुक्थ्यमतिरात्रमि"ति सत्याषाढश्रौतसूत्रे 1-8-17 स्वतन्त्रस्येति। ऋत्वन्तरस्यानङ्गभूतस्य नित्यतया काम्यतया वा? प्रयोज्यस्य इत्यर्थः।

तिसृणामपि संस्थानां मन्त्रभेदेन प्रथमत्वं सर्वाभिप्रायं च उपपादितं निदाने। अथ प्रथमा का संस्था? निदानसूत्रे 3-1-1 इत्यादि खण्डद्वयेन इति।

अनेन लाट्यायनसूत्रकारमते, द्राह्यायणसूत्रकारमते, कात्यायनसूत्रकारमते, आर्षेयकल्पकारमते च तिस्रः संस्था इति उक्तं भवति ।

ताण्ड्यब्राह्मणे नवमाध्याये तृतीयखण्डे एवमुक्तः, "ज्योतिष्टोमस्सर्वप्रकृतिभूतः" । स च यद्यपि चतुस्संस्थ तथापि "न वै षोडशी नाम यज्ञोऽस्ति" इत्यादि तैत्तिरीयश्रुतौ षोडश्यपृथक्त्वात् अत्र ब्राह्मणे अग्निष्टोमादिसंस्थात्रयात्मक एवोक्तः इति वेदभाष्ये भाष्यकारैः अवतारिकया उक्तः । अनेन ताण्ड्यब्राह्मणेऽपि तिस्र एव संस्थाः इत्युक्तं भवति । अत्र किञ्चित् विचारणीयं वर्तते । "न वै षोडशी नाम यज्ञोऽस्ति" इति तै. सं. 6-6-11.

"प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् । स रिरिचानो मन्यत। स यज्ञानाँ षोडशधेन्द्रियं वीर्यमात्मनामभिसमस्खिदत् । तत् षोडश्यभवत्" न वै षोडशी नाम यज्ञोस्ति अत्र वेदभाष्यम् । देवेभ्यः यज्ञान् विभज्य दत्वा स्वार्थस्य कस्यापि अभावात् रिक्तोहमिति मन्यमानः स्वात्मानमभिलक्ष्य सर्वयज्ञसम्बन्धिनं इन्द्रियसामर्थ्यप्रदं अंशं षोडशिभेदभिन्नं समस्खिदत्= समुपादाय श्रान्तः अभवत् । तच्च सामर्थ्यं षोडशीनामकः क्रतुरभवत् । स च सोमयागव्यतिरिक्तः यज्ञः कश्चित् न नूतनः ।

क्रतोः षोडशी नाम कथं सम्पन्नमितिचेत् तदेवोच्यते । "यद्वाव षोडशँ स्तोत्रँ षोडशँ शस्त्रं तेन षोडशी तत् षोडशिनष्षोडशित्वं यत्षोडशी गृह्यत इन्द्रियमेव तद्वीर्यं यजमान आत्मन्धत्ते" । इति—

यतः अस्मिन्क्रतौ षोडशिग्रहणं, षोडशिनामकं स्तोत्रं षोडशिनामकं शस्त्रं च विद्यते । अतः षोडशिनामकक्रतोः षोडशीति नाम सम्पन्नम् । अनेन षोडशिनामकक्रतुः वर्तत इति स च सोमयागातिरिक्तः न नूतनो यज्ञो भवति इत्येवं भाष्ये उक्तम् । अस्यायमाशयः । न च षोडशिनामकः क्रतुर्नास्तीति, किन्तु सोमयागातिरिक्तः न नूतनः क्रतुरित्येव ।

ताण्ड्यब्राह्मणे 9-3 "न वै षोडशी नाम यज्ञोऽस्ति" इति श्रुत्या षोडशिनामकः क्रतुः पृथक् नास्तीति त्रिस्र एव संस्था इत्युक्तम् । तथापि

परस्परविरोधपरिहारार्थं तैत्तिरीयभाष्योक्तरीत्या षोडशिनामकः क्रतुः न नूतनो यज्ञ इत्यभिप्रायेणैव तथा उक्त इति ज्ञेयः। अन्यथा परस्पर-विरोधापत्तेः।

सत्याषाढमतम्

स. श्रौ. सू. 9-7. "उक्थ्यः षोडशी अतिरात्र अप्तोर्यामश्च अग्निष्टोमस्य गुणविकारा भवन्ति।" इति "तस्य व्याख्याने एवं तावत् "सर्वो ज्योतिष्टोम" इति सूत्रकृत्प्रदर्शित ज्योतिष्टोमत्वरूप व्यापकधर्मा-वच्छिन्नज्योतिष्टोमान्तर्गत अग्निष्टोमत्वरूप व्याप्यधर्मावच्छिन्नाक्रान्ता "सर्वो ज्योतिष्टोमः" इत्यादिना सूत्रकारेण, अग्निष्टोम शब्देन व्यवहृता "सर्व एकाह अहीन सत्रमूलप्रकृतिभूता अग्निष्टोमसंस्था व्याख्याता। इदानीं संस्थान्तराणि व्याख्यायन्ते" इति। संस्थानां मतभेदमुपन्यस्य स्वमतेन आचार्यः प्रकृतिसंस्थाः दर्शयति। "उक्थ्यः षोडशी" इत्यनेन सूत्रेण। आपस्तम्बेनाप्येवम्।

उक्थ्यषोडश्यतिरात्रः अप्तोर्यामश्च गुणविकाराः भवन्ति। अपस्तम्बसूत्रं-14-1-1.

अनेन किमायातम्? सत्याषाढमते आपस्तम्बमते च अग्निष्टोमेन साकं पञ्च संस्था इति। अग्निष्टोमस्य उक्थ्यादयः चतस्रः संस्थाः गुण-विकारा इति च।

भारद्वाजमतम्

"उक्थ्यषोडश्यतिरात्र" इति स. श्रौ. सू. 9-7 व्याख्याने एवं विवृतम्। "भारद्वाजोऽपी"ति। अत्र ज्योतिष्टोमं प्रकृत्य पञ्च एताः प्रकृतिसंस्थाः। 1 अग्निष्टोमः 2 उक्थ्यः 3 षोडशी 4 अतिरात्रः 5 अप्तोर्याम इत्युक्त्वा यज्ञपुच्छमभिधाय उपसंहृतं "सन्तिष्ठते ज्योतिष्टोमः" इति पञ्चशाखात्मकः, ज्योतिष्टोमोऽग्निष्टोम एव सर्वसोमानां प्रकृतिरिति। एतेन अग्निष्टोमस्यैव शाखान्तरत्वमुक्थ्यादीनां संस्थानां, न तु स्वतन्त्ररूप-

क्रत्वन्तरत्वम्, तासां फलार्थत्वेन अभिहितत्वात् अनेन ग्रन्थेनाग्निष्टोमेन साकं पञ्च संस्था इति । उक्थ्यादीनां चतसृणां अग्निष्टोमस्यैव गुणविकारत्वं च भारद्वाजमतेऽपि सिद्धम् ।

संस्थानां नित्यकाम्यविचारः

इदानीमग्निष्टोमातिरिक्तास्संस्थाः नित्या उत काम्या इति विचारणीयाः । तथा हि — सर्वज्ञमाधवाचार्यैः मीमांसा जैमिनीय न्यायमालायां पञ्चमाध्याये तृतीयपादे त्रयोदशाधिकरणे, "एतेनानिष्ट्वे"ति सर्वसंस्थो ज्योतिष्टोमः उत अग्निष्टोम एव वा । अविशेषात्सर्वसंस्थो ज्योतिष्टोम अत्र वर्ण्यताम् ।

"अग्निष्टोमप्रक्रियात्वात्तस्य प्रथमयज्ञतः ।
तेनेष्ट्वान्येन यष्टव्यं संस्था आगन्तवोऽपराः ॥"

इति । ज्योतिष्टोमे श्रूयते "एष वाव प्रथमो यज्ञो यज्ञानां य ज्योतिष्टोमः य एतेनानिष्ट्वा अथान्येन यजेत गर्तपतितमेव हि भवति, प्रमीयते च ।" यथा गर्तपतितं बल्यादिकं न पुनः क्वाप्युपयुज्यते । केवलं जीर्यते तथा प्रथमतः अनुष्ठितं यज्ञान्तरं फलाय नोपयुक्तम् । यजमानश्च तेनापराधेन अप्रमृत्युभाग्भवतीत्यर्थः । अग्निष्टोम इत्यादि ज्योतिष्टोमस्य सप्तसंस्थाः, भेदाः । तत्र संस्था विशेषमनुपन्यस्य ज्योतिष्टोम इत्येव प्रकृतत्वात् एतेनानिष्ट्वेत्येतच्छब्देन सर्वसंस्थोपेतः ज्योतिष्टोमोऽत्र परामृश्यते । अतः सप्तसंस्था अनुष्ठाय पश्चाद्यज्ञान्तरमनुष्ठेयमिति प्राप्ते ब्रूमः। ज्योतिष्टोमस्य अग्निष्टोमसंस्थैव नैजं रूपम् अग्निष्टोमस्य नित्यत्वात् अत्यग्निष्टोमादिसंस्थानां काम्यत्वेनानित्यत्वात् । अत एव एतत्प्रकरणं अग्निष्टोमस्येति एतच्छब्देन परामृश्यते । तेन परामर्शेन नित्यज्योतिष्टोमस्वरूपत्वं सर्वसंस्थानामयुक्तमिति, षट्संस्था आगन्तुकाः प्रकारविशेषाः । तस्मादग्निष्टोमस्यैव प्रथमयज्ञत्वात्तेनेष्ट्वा यज्ञान्तरमनुष्ठातुं शक्यत इति सिद्धम् । किञ्च तृतीयाध्याये षष्ठपादे षोडशाधिकरणे अग्निष्टोम एव नित्यः, न तु उक्थ्यादयः" इत्युक्तम् । तथा हि—

"उक्थ्यादिषु समो दीक्षणीयाद्यागविधिर्न वा ।
एकप्रकरणत्वेन फलवत्वाच्च युज्यते ॥" इति ।

"उक्थ्यादयः कामयोगाद्विकाराः प्रक्रिया यतः ।
अग्निष्टोमात्मके ज्योतिष्टोममात्रे च तद्विधिः ॥"

ज्योतिष्टोमः— स्वयमेकोऽपि समाप्तिभेदात् भिद्यते । यज्ञायज्ञियस्तोत्रेण समाप्तावग्निष्टोम इत्युच्यते । तस्मादपि स्तोत्रादूर्ध्वं उक्थ्यस्तोत्रेण समाप्तौ उक्थ्य इत्युच्यते । एवं षोडश्यादयोऽपि तादृशस्य सप्तसंस्थावतो ज्योतिष्टोमस्य प्रकरणं दीक्षणीयेष्टि, प्रायणीयेष्ट्यादीनां अङ्गानां विधिराम्नातः । स च विधिः ज्योतिष्टोमस्य प्रथमसंस्थाविशेषे अग्निष्टोमे यथा प्रवृत्तः तथैव उक्थ्यादिष्वपि प्रवर्तते । कुतः ? प्रकरणसंबन्धस्य समानत्वात् । किञ्च यथा अग्निष्टोमः फलवत्वात् अङ्गविधिभिस्संयुज्यते, एवं उक्थ्यादयोऽपि तेषां च फलमेवमाम्नायते । "पशुकामः उक्थ्यं गृह्णीयात्" "षोडशिना वीर्यकामः स्तुवीत", "अतिरात्रेण प्रजाकामं याजयेत्," इति । तस्मात् सप्तस्वपि संस्थासु समानः अङ्गविधिरिति प्राप्ते ब्रूमः यदेतदुक्थ्यादीनां फलमुदाहृतं तत्तु तेषां गुणविकारत्वं गमयति । काम्यो गुणः श्रूयमाणः नित्यमर्थं विकृत्य निविशते इति न्यायात् । तथा गोदोहनेन पशुकामस्य प्रणयेत् इति गोदोहनगुणः अप्रणयनसाधनकं चमसं विकृत्य निविशते । एवमुक्थ्यो गुणः नित्यामग्निष्टोमसंस्थां विकृत्य संस्थान्तरत्वं गमयति । ततः अग्निष्टोमस्य गुणविकारा उक्थ्यादय इति न सर्वसंस्थासाधारणं प्रकरणं किन्त्वग्निष्टोमस्यैवासाधारणम् ।

ननु ज्योतिष्टोमेन यजेत इत्युक्तत्वात् ज्योतिष्टोमस्यैवेदं प्रकरणं न त्वग्निष्टोमसंस्थाया इति चेद्बाढम् । असौ ज्योतिष्टोमः न कदाचिदपि अग्निष्टोमं व्यभिचरति । उक्थ्यादीनामप्यन्तर्भावितामग्निष्टोमकत्वात् । उक्थ्यादींस्तु व्यभिचरति विनापि तैरग्निष्टोमदशायां ज्योतिष्टोमत्वसम्भवात् । अतः अग्निष्टोमसंस्थाकज्योतिष्टोमस्येदं प्रकरणं सत् तत्र

दीक्षणीयाद्यङ्गविधिं निवेशयति । उक्थ्यादिषु चोदकादङ्गान्यतिदिश्यन्ते इति-तत् सिद्धमग्निष्टोमो नित्यः तदतिरिक्ताः संस्थाः काम्या इति ।

ननु तत्तत्कामपदघटितानां अन्येषां यागानां काम्यत्वेऽपि सप्तानां संस्थानां ज्योतिष्टोमान्तर्गतत्वात् गौतममहर्षिणा सप्तानामपि नित्यत्वेन उक्तत्वात् तासां नित्यत्वं भवतु इति चेत् उच्यते । श्री गौतममहर्षिणा गौतमधर्मसूत्रे अष्टम अध्याये "लोके धृतव्रतो राजा ब्राह्मणश्च बहुश्रुतः" इति उपक्रम्य पृथिवीशासकयोः राजब्राह्मणयोर्मध्ये राजशासनं सफलीकर्तुं राज्ञः सहायत्वेन ब्राह्मणो बहुश्रुतो भवितुमर्हति । कः बहुश्रुत इति प्रश्ने स एष बहुश्रुतः "लोकवेदवेदाङ्गवित्" व्याख्यानम् यो लोकज्ञः वेदवेदाङ्गविच्च स बहुश्रुतः । किञ्च चत्वारिंशत्संस्कारसंस्कृत इति प्रसङ्गे संस्कारपरिगणनमात्रमेव कृतम् । न तु नित्यत्वमुक्तम् ।

ननु उभयवादिसिद्धानां नित्यानां कर्मणां चित्तशुद्धिरूपसंस्कारकत्वमिष्टमेव खलु । एवमेव "एते चत्वारिंशत्संस्काराः" इत्यनेन चत्वारिंशत्कर्मणां (उक्तप्रायमेव संस्कारकत्वाभिधानम्) । संस्कारकत्वं नाम चित्तशुद्ध्यापादकत्वमिति यावत्। तेन संस्कारा इत्यनेनैव नित्यपदाघटितत्वेऽपि नित्यत्वं सिद्धमित्युच्येत काम्यकर्मणामपि यत्किंचित् चित्तसंस्कारकत्वात् नित्यकर्मविशिष्टत्वापत्तिः। तदेवोक्तं- नित्यकर्मणां प्राधान्येन फलं चित्तशुद्धिः काम्यकर्मणां त्वार्थिकी चित्तशुद्धिः । तथा हि- सूतसंहितायां यज्ञवैभवखण्डे तृतीयाध्याये कर्मयज्ञवैभवनिरूपणम्—

"अथातस्संप्रवक्ष्यामि कर्मयज्ञस्य वैभवम् ।
कर्मयज्ञस्त्रिधा प्रोक्तो मुनिभिस्सूक्ष्मदर्शिभिः ।।

एकः काम्योऽपरो नित्यः तथा नैमित्तिकोऽपरः ।
प्राधान्येन फलं शुद्धिरार्थिकी काम्यकर्मणः ।।

प्राधान्येनात्मनः शुद्धिर्नित्यस्य फलमार्थिकम् ।
केवलं प्रत्यवायस्य निवृत्तिरितरस्य तु ।
काम्यरूपेषु यज्ञेषु यतन्ते श्रद्धया सह ।।

मन्दभाग्या नरा विप्रा नित्यनैमित्तिकात्मके ।
महाभाग्या प्रवर्तन्ते तेषामुक्तिरयत्नतः ॥"

इति कर्म त्रिविधं वर्तते । नित्यं, नैमित्तिकं, काम्यञ्चेति । नित्यस्य तु सत्त्वशुद्धिरेव प्राधान्येन बलम् । नैमित्तिकस्य तु प्रायश्चित्तादेरुपात्तदुरितक्षयः फलम् । काम्यस्य तु फलप्राप्तिः प्रधानम् । चित्तशुद्धिरार्थिकीति यावत् ।

ननु तथापि काम्यकर्मणामपि यथाकथञ्चित् चित्तशुद्धिसम्पादकत्वस्याङ्गीकृतत्वात् नित्यकर्मवत् तान्यप्यनुष्ठेयानीति चेदुच्यते । "काम्यरूपेष्विति" काम्ययज्ञेषु ये विप्राः श्रद्धया प्रवर्तन्ते, ते तावत् मन्दभाग्याः । कदाचिदपि मुक्तेरसिद्धत्वात् । अतो न तान्यनुष्ठेयानि । नित्यनैमित्तिकात्मके कर्मणि ये प्रवर्तन्ते ते तावन्महाभाग्याः पुण्यशालिनः । तेषां मुक्तेरयत्नसिद्धत्वात् । अतः तानि नित्यानि कर्माणि अनुष्ठेयानि न तु काम्यानीत्यर्थः ।

किञ्च यदि संस्कारान्तर्गतत्वमेव नित्यत्वमिति स्यात् । सन्ध्यावन्दनादीनां तदन्तर्गतत्वाभावान्नित्यत्वं न स्यात् । संस्कारान्तर्गतानां नित्यत्वरक्षायै अवश्यानुष्ठेयानां सन्ध्यावन्दनादीनां अननुष्ठानापत्तिश्च स्यात् । किञ्चैकविंशति संस्कारेषु एक, द्वि, त्रि संस्काराचरणेऽपि पर्याप्तसंस्कारानाचरणरूपदोषाऽप्राप्तेः मुनिना आगूरणात्, मस्करभाष्ये एकविंशतिसंस्काराणां पर्याप्त्यनुष्ठाननैयत्यस्यानङ्गीकाराच्च । अत्र गर्भाधानादयः उपनयनान्ता एव संस्कारास्सर्वेषां द्विजादीनां नियताः न पुनः स्नातकादयः इत्यादिना स्मृतिमुक्ताफलादि धर्मशास्त्रेषु प्रतिपादनाच्च । अन्यथा स्नातकाद्यकरणे उपनयनपर्यन्त-संस्काराकरणादिव प्रत्यवायापत्तिश्च स्यात् । अतः संस्कारान्तर्गतत्वेनाग्निष्टोमातिरिक्तानां संस्थानां नित्यत्वं नाभ्युपेयम् । किञ्चाग्निष्टोमातिरिक्तसंस्थानां नित्यत्वे मीमांसासिद्धान्तविरोधापत्तिश्च स्यात् ।

ननु सप्तसोमसंस्थानां यदि नित्यत्वं गौतमस्य नाभिप्रेतं स्यात् । सूत्रकारेणाश्वलायनेन 6-10-1 संस्थाः सोमसंस्थाः इत्यर्थः । एते च चत्वारिंशत् संस्कारान्तर्गताः । अत एव नित्या इत्युक्तम् । आश्वलायन-सूत्रवृत्तिकारेण गार्ग्यनारायणेन, एवमेव वाहिनी पती ये च सोमव्याख्याने आ. श्रौ. सू. 14-1-1 प्रश्नस्य आदावाश्वलायनेनोक्तम् अग्निष्टोमादि-संस्थानां क्रतूनां चत्वारिंशत्संस्काराणां मध्ये गौतमादिभिः स्मृतिकारैः परि-गणितत्वान्नित्यत्वं लभ्यतेत्यादि । एवमेव धूर्तस्वामि, रामाग्निचिदादिभि-रप्युक्तम् । अग्निष्टोमादिसंस्थानां नित्यत्वमिति-तदसङ्गतं स्यादिति चेदुच्यते । यद्यपि गौतममहर्षिणा "यस्यैते चत्वारिंशत्संस्कारा" इत्येता-वन्मात्रं परिगणितानां कर्मणामभिहितम् । न तु एते नित्या इति । तथापि बहूनां काम्यानां कर्मणामुपसर्जनतया चित्तशुद्धिरूपः संस्कारः अभ्युपगतेऽपि पुनरस्मिन्सूत्रे प्रातिस्विकतयैतेषामुक्थ्यादीनां संस्थानां नामानि उपादाय यतः "एते चत्वारिंशत्संस्कारा" इत्युच्यन्ते अतस्तद्वचनबलादेव यथा काम्य-कर्मसु संकल्पानन्तरं मुख्यद्रव्यस्य नाशो प्रतिनिधिना "तदेव यादृक्कीदृक्च होतव्यम् इति श्रुत्युक्तरीत्या एषु कर्मसु समापनीयेष्वपि तेषां कर्मणां किं वा फलमिति विचार्य नित्यकर्मवत्पापक्षयः फलम् । तत्रापि तारतम्यमिति केचिदिति भाट्टदीपिकायामुक्तं, तथैवात्रापि परिगणितसंस्कार सूत्रघटितत्व-बलात् इतरकाम्यकर्मापेक्षयैतेषामतिशयसंस्काराधायकत्वमभ्युपेयम् ।

किञ्च सन्ध्यावन्दनज्योतिष्टोमादेरिव वीप्सायाः यावज्जीवादिचोदि-ताग्निहोत्रादेरिव जीवनरूपनिमित्तस्य वा उपनयनादेरिव अकरणे प्रत्यवा-यस्य वा अश्रवणात्, अपि तु "उक्थ्येन पशुकामो यजेत" "अतिरात्रेण प्रजाकामं याजयेत् इत्यादि काम्यपदघटित तत्तत्फलसाधनत्वबोधकवाक्याना-मेव श्रवणाच्च नित्यकर्मणामग्निहोत्रादीनामिव तादृशमुख्यनित्यत्वं नाभ्यु-पेयम् । किन्तु यथा गवानयनाख्यसत्रयागे प्रायणीयातिरात्रेणाग्निष्टोम-प्राथम्यस्य भङ्गापत्तिः इत्याशङ्क्योक्थ्यातिरात्रादीनामग्निष्टोमस्यान्त-र्गभितत्वात् अग्निष्टोमप्राथम्यं न परित्यक्तमिति समाहितम् । तथा हि-ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात्तं प्रथममुपयन्तीति

7-4-10 तै. सं. अत्र सायणाचार्यैः भाष्ये एवं विवृतम्। योऽयमतिरात्राख्यः क्रतुः सोऽयं यज्ञक्रतूनां परमः, सोमयागरूपाः ये क्रतवः तेषां मध्ये चरमोऽग्निष्टोम उक्थ्यः, षोडशी, अतिरात्रः इत्येतस्य तदीयक्रमत्वात् अग्निष्टोमस्य प्राथम्यं "प्रजननं ज्योतिः" इत्यनुवाके 7-1-1 तै. सं. "तस्मादाहुः ज्जेष्ठयज्ञः" इत्याम्नातम्। एवं सत्यग्निष्टोमं परित्यज्य चरमभाविनमतिरात्रं कस्मात्कारणात् सत्रे प्रथममनुतिष्ठन्तीति ब्रह्मवादिनां प्रश्नः। तत्राभिज्ञा एवमुत्तरमाहुः। नात्राग्निष्टोमः परित्यक्तः यतः अग्निष्टोमोक्थ्यषोडश्यतिरात्राणां उत्तरोत्तरस्य पूर्वपूर्वगर्भितत्वात्। द्वादशस्तोत्रमग्निष्टोममन्तर्भाव्य पुनः स्तोत्रत्रयाधिक्येनोक्थ्यस्सम्पद्यते। एवमेव उत्तरक्रतुष्वपि। अतः सत्रिणः अतिरात्रमनुतिष्ठन्तीति यत् एतद्वा एतस्मिन्सोमानुष्ठाने अग्निष्टोमं प्रथममनुतिष्ठन्ति। तस्मादग्निष्टोमपरित्यागाभावात् अतिरात्ररूपं ज्योतिष्टोमं प्रथममनुतिष्ठेयु"रिति। अस्यायमाशयः-अग्निष्टोममपरित्यज्य तदाश्रयेणैव अतिरात्रस्यानुष्ठेयत्वात् अग्निष्टोमप्राथम्यवचनस्य विरोधो नास्तीत्युक्तम्। तथैवोक्थ्यादिसंस्थानां काम्यत्वेऽपि नित्याग्निष्टोम अपरित्यागेन उक्थ्यादिसंस्थाभिरग्निष्टोमसंस्थायाः बाधितत्वेऽपि अग्निष्टोमस्याबाधितत्वात्तदाश्रयणेनोक्थ्यादीनामपि नित्यत्वमुक्तमिति प्रतीयते।

किञ्च एतदुपष्टम्भकतयाऽन्यत्र यज्ञशब्दव्यवहारः केवलमग्निष्टोमस्यैव नान्येषामुक्थ्यादीनामित्युक्तम्। तथा हि अग्निचयनप्रकरणे तै. सं. 5-4-10 "यज्ञायज्ञियस्य स्तोत्रे द्वाभ्यामभिमृशतीति" तृतीयसवने यज्ञायज्ञियस्तोत्रे प्रवर्तमाने सति नमस्तेऽस्तु ममाहिंसीर्विश्वस्य मूर्धन्नधितिष्ठति श्रित" इति द्वाभ्यां मन्त्राभ्यामग्निमभिमृशे"दिति अग्न्यभिमर्शनं विहितम्। तस्मिन्प्रसङ्गे श्रुतिरेवं विशदयति — "एतावान् वै यज्ञो यावानग्निष्टोमो भूमा त्वा अस्यात ऊर्ध्वः क्रियते यावानेव यज्ञस्तमन्ततोऽन्वारोहति" इति तै. सं. 5-4-10 सा- भा- यज्ञायज्ञियस्तोत्रान्तो हि प्रकृतिभूतोऽग्निष्टोमः स च यावान् तावानेव उक्थ्यातिरात्रादिः सर्वोऽपि यज्ञः एतदेव हि सर्वस्यापि यज्ञस्य मुख्यं शरीरं अतोक्थ्यादिक्रतोर्यज्ञायज्ञियस्य स्तोत्रादूर्ध्वस्तु

स्तोत्रसमूहः यः क्रियते स तु नैव क्रियते । तेनातिरिक्तेन पूर्वं विद्यमानस्य यज्ञायज्ञियस्य बाहुल्यमेव भवति । न तु किञ्चिन्नूतनं शरीरम् । एवं सति यज्ञायज्ञिस्तोत्रकालीनाभिमर्शनेन अतिरिक्तोक्थ्यातिरात्रादिरूपो यज्ञो यावानस्ति सर्वमप्यन्तराले अन्वारोहति सर्वमपि यज्ञं प्राप्नोतीत्यर्थः । अयं तात्पर्यार्थः यावतां संस्थाक्रतूनां सत्त्वेऽपि अग्निष्टोमस्यैव यज्ञशब्दव्यवहारः तस्य यज्ञस्य द्वादशस्तोत्रान्तमेव मुख्यं शरीरम् । अतः उक्थ्यादीनां न प्रत्येकयज्ञशब्दव्यवहारोऽस्ति उक्थ्यादि स्तोत्रादि न नूतनं शरीरम् । किन्तु पूर्वं विद्यमानस्य शरीरस्यैव विस्तारः इत्यनेन अग्निष्टोमात्मकयज्ञं विना उक्थ्यादीनां यज्ञशब्दव्यवहारः उक्थ्यादिस्तोत्राणां नूतनशरीरव्यवहारो वा नास्ति ।

अत्राग्निष्टोमात्मकयज्ञस्यैव विस्तारः उक्थ्यादिसंस्थास्वरूपः न नूतनं स्वरूपमित्यत्र लौकदृष्टान्तोऽपि वर्तते । तथा हि-लोके प्रासादनिर्माणकाले केचित् प्रासादस्यादौ अधस्तान्निर्मितप्रथमभागेनैव समाप्तिं कुर्वन्ति । केचित्तदपेक्षयाधिकसुखं कामयमानाः, तदुपरि द्वितीयाट्टकं निर्मिमीते । अत्र प्रथमभागः अग्निष्टोमसंस्थासदृशः, द्वितीयाट्टकः अत्यग्निष्टोमसंस्थासदृशः, तृतीयाट्टकः उक्थ्यसंस्थासदृशः, एवमेव सप्तसंस्थात्मकः सप्ताट्टकप्रासादसदृशोऽयं प्रासादः येन केनाप्यट्टकेन समाप्तिं कर्तुं शक्यत एव । यथा प्रासादस्य द्वितीयाट्टके प्रथमभागः अनुस्यूतः, द्वितीयाट्टकः तृतीये, तृतीयश्चतुर्थे अनुस्यूतोऽपि सर्वेषु प्रथमभागः अनुस्यूत एव । एवमेव सप्त संस्थासु मध्ये उत्तरोत्तरसंस्थायां पूर्वपूर्वसंस्था अनुस्यूताः । सर्वास्वपि अग्निष्टोमः अनुस्यूतः । यथा गृहाणां परिगणनावसरे यावत्संख्याकाट्टकयुक्तोऽपि प्रासादः अधोनिर्मितगृहभागमभिलक्ष्य एकगृहत्वेन व्यपदिश्यते । एवमेवात्रापि "एतावान् वै यज्ञो यावानग्निष्टोमः" इति श्रुत्याऽग्निष्टोमस्यैव यज्ञशब्दव्यवहारः उक्थ्यादीनां न नूतनतया यज्ञशब्दव्यपदेशः किन्तु अग्निष्टोमस्यैव विस्तार इत्युक्तम् । अयमेव अभिप्रायः वार्तिककारैरप्याविष्कृतः तथा हि-अग्निष्टोमसंस्थाकज्योतिष्टोमस्योक्थ्यस्तोत्रादिना समाप्तिभेदस्य सत्त्वेऽपि सर्वास्वपि संस्थासु ज्योतिष्टोमरूपं अनुस्यूतम् । यथैव देवदत्तस्य स्थान

उपवेशनगमनशयनाद्यवस्थाभेदेऽपि देवदत्तत्वं नापैति तथा संस्थान्तर उपजनापाये तत्त्वं नापैति। संस्थानां च विरोधादन्योन्यसमावेशो नास्ति। ज्योतिष्टोमरूपं तु सर्वत्र अविरुद्धमनुवर्तते इति। तत्त्वं ज्योतिष्टोमात्मकअग्निष्टोमत्वम्। संस्थानां=समाप्तिरूपाणां यद्यपि नैमित्तिकः काम्यो वा गुणः नित्यमर्थं विकृत्य उक्थ्यादिसंस्थारूपो गुणः निवेशनीयः। अत एवोक्तं शा-भाष्ये 3-6-16 "गुणादेवंजातीयके काम्ये फलनिर्वृत्तिः"। अत्र वार्तिकं- "इह च यथा गुणात्फलं भवति यथा च काम्यो गुणः नित्यमर्थं विकरोति तदिन्द्रियकामाधिकरणगोदोहनाधिकरणाभ्यां उपसंहर्तव्यमिति पुनस्तस्मिन्नेवाधिकरणे "काम्यत्वादस्ति गोदोहनन्यायेन विकारत्व"मित्युक्तम्। तन्न्यायसाम्याय अत्र ज्योतिष्टोमशब्देन अग्निष्टोम उच्यते।

अग्निष्टोमस्तोत्रं तन्निष्ठसंस्थां च बाधित्वा उक्थ्यस्तोत्रतन्निष्ठसंस्थारूपगुणः निवेशनीयः न तथा निविशते। अयमत्र भेदोऽवगन्तव्यः। 3-6-3 गोदोहनादिकरणं दर्शपूर्णमासयोः श्रूयते। "गोदोहने पशुकामस्य प्रणयेत्।" तथा अग्नीषोमीये पशौ श्रूयते यूपं प्रकृत्य "बैल्वो ब्रह्मवर्चसकामेन कर्तव्यः" इति अत्र सन्देहः- अत्र काम्यगोदोहनबैल्वादीनां प्रकृतौ निवेशः उत विकृताविति। काम्यस्य क्रत्वर्थाभावात्क्रत्वर्थचमसस्य भिन्नविषयत्वात् चमसं विना क्रतोः विगुणत्वात्, गोदोहस्य क्रियाश्रयमन्तरा फलसाधनत्वासंभवात् मधुदृष्टिन्यायेन क्रतोर्वैगुण्यापत्तिः, फलासिद्धिश्च। अतः गोदोहनस्य पुरुषार्थस्य विकृतौ निवेशः। अथवा क्रत्वर्थं चमसेन प्रणीय पुनः फलाय गोदोहनेन प्रणेतव्यम्। न तु काम्येन नित्यस्य बाधः इति पूर्वपक्षीकृत्य काम्यस्य नैमित्तिकवत् विशेषशास्त्रत्वात्, निरवकाशत्वात्, परशास्त्रत्वात् आसन्नपुरुषार्थरूपचतुर्थकारणस्यापि सत्त्वाच्च काम्यं बलीयः। पुरुषार्थप्रयुक्ता हि सर्वस्य प्रकृतिर्भवति काम्यफलप्रत्यासन्नं गोदोहनं शीघ्रं प्रयुज्यते। क्रत्वर्थस्तु चमसः चिरेणेति दुर्बलः। अनेन नित्यनैमित्तिकापेक्षया काम्यस्य बलीयस्त्वं भवति। अनेन नित्यनैमित्तिकयोः सामिधेनीगतपांचदश्यसाप्तदश्ययोः "एकविँशतिमनुब्रूयात्प्रतिष्ठाकामस्य" इति प्रतिष्ठारूपफलार्थं विधीयमान एकविँशतिसंख्यया "बैल्वेन ब्रह्मवर्चसकामस्ये"ति ब्रह्मवर्चस-

फलार्थं विधीयमानत्वेन नित्यपलाशस्य च बाध इत्यपि उक्तं भवति । यद्यपि गोदोहनं फलार्थं, तथापि अक्रियारूपस्य गोदोहनस्य स्वतः फलार्थत्वं न संभवति । "यत्र गुणः कारकतामापद्यते स आश्रयः" इत्याश्रयलक्षणनिर्वचनेन प्रणयनक्रियामाश्रित्येत्यनेन प्रणयनकारकीभूतस्यैव तस्य फलसाधनत्वं वाच्यम् । गोदोहनफले जननीये यथा प्रणयनं तथैव क्रत्वर्थचमसस्यापि प्रणयनमेव द्वारमित्यत्र न विवादः । अतः पश्वर्थगोदोहनेन नित्यक्रत्वर्थचमसस्य बाधसिद्धः ।

ननु पश्वर्थगोदोहनेन क्रत्वर्थचमसस्य बाधे क्रतोर्वैगुण्यापत्तिस्स्यादिति चेन्न । फलार्थमपि श्रुतेन गोदोहनेन सन्निधिलक्षणप्रमाणेन "चमसेनापः प्रणयेदि"ति प्राप्तस्य चमसस्य बाधेऽपि क्रत्वङ्गप्रणयनकार्यं सिध्यति । ततश्च पशुकामप्रयोगस्थलीयः क्रतुप्रयोगविधिः, स्वसिध्यर्थं प्रणयनसिद्धिं प्रतीक्षमाणः तस्य गोदोहनेन सिद्धिं दृष्ट्वा चमसं न गृह्णाति । तदुक्तं शास्त्रदीपिकायाम्—

"पशुकामप्रयोगे च क्रमेण चमसाङ्गता ।
श्रौताद्गोदोहनात्तत्र चमसस्य निराक्रिया ।।"

इति बाधितत्वादेव न तदानीं चमसादेरङ्गत्वमवघातादेरिव कृष्णलादौ । अतः तल्लोपेन, नास्ति वैगुण्यम् । येन क्रियाफलविनाशः । कुतः? तद्भूयाच्च प्रणयनाभ्यासः स्यात् ।

"गुणहानिर्हि वैगुण्यं न चास्य गुणता तदा ।
गोदोहनं च न गुणः क्रतोः कामाय चोदनात् ।।"

अनेन पशुकामप्रयोगे चमसस्य क्रत्वङ्गत्वमेव नास्तीति गुणहानिकृतवैगुण्यं क्रतोर्नास्ति । गोदोहनं तु कामाय चोद्यत इति तेनैव क्रतोरुपकारकं सत् अङ्गमिति व्यपदिश्यते । तेन काम्यो नैमित्तिको वा नित्यमर्थं विकृत्य निविशत इति न्यायात् अत्र नित्यचमसरूपगुणं बाधित्वा तत्स्थाने काम्यस्य गोदोहनरूपगुणस्य निवेश इति पिण्डितार्थः ।

इन्द्रियकामाधिकरणे "दध्नेन्द्रियकामस्य जुहुयादि"ति इन्द्रिय-फलार्थेन विहितेन दध्ना जुहोतीति क्रत्वर्थविहितदध्नः बाधो नास्ति। उभयत्रापि दधिस्वरूपस्य लौकिकस्य अविशिष्टात्। किञ्च एकस्यैव दध्नः क्रत्वर्थत्वेन फलार्थत्वेन विनियोजकवाक्ययोः पृथक्त्वात् नित्याग्निहोत्रे यथा दधिकारकीभूतः होमप्रयोगः तथैवेन्द्रियकामार्थप्रयोगस्याप्यविशेषात्।

ननु नित्याग्निहोत्रे दधिकारकीभूतस्य होमप्रयोगस्य इन्द्रियरूप-फलार्थे दधिकारकीभूतस्य होमप्रयोगस्य अविशिष्टत्वेऽपि क्रत्वर्थप्रयोगे दधि होमं प्रति करणत्वेन विधीयते। पुरुषार्थप्रयोगे तु फलं प्रति दधिकरणत्वेन विधीयत इत्यङ्गीकारे होमफलउभयसंबन्धविधाने वाक्याभेदः स्यादिति चेत् उच्यते। क्रत्वर्थप्रयोगे तु दध्नेति कारकस्य क्रियापेक्षायां वाक्यप्राप्तजुहोतिना होमसंबन्धः विधीयते। पुरुषार्थप्रयोगे तु न होमसंबद्धं दधिवाक्येन विधीयते। किन्तु दध्नेत्येतावन्मात्रं य इन्द्रियकामः स दध्नेति। तदानीं जुहोतेः न उद्देश्यतया न वा विधेयतया अन्वयः। किन्तु य इन्द्रियकामः स दध्नेति इन्द्रियकामोद्देश्येन दधिविशिष्टकारकं जुहोति परप्रत्ययेन विधीयते। तत्र च कारकस्य क्रियापेक्षत्वात् अपेक्षितक्रियासमर्पणार्थं केवलप्रत्ययप्रयोगस्य असंभवाच्च यस्मिन् कस्मिंश्चित् धातौ प्रयोक्तव्ये जुहोतीति प्रयुज्यते। अत एवोक्तं शास्त्रदीपिकायां, 2-2-11-152 पुटे "दध्नेति करणभूतं दधि-फलस्य विधीयते तृतीयानिर्देशात् क्रियापेक्षं च कारकमिति। क्रियाविशेषा-पेक्षायां सन्निधिलक्षण-प्रकरणप्राप्तः। होमसंबन्धः जुहोतिना अनूद्यते। सन्निधि-लक्षण-प्रकरण इत्यनेन उभयाकांक्षालक्षणप्रकरणं व्यावर्त्यते यद्यपि दधि फलाय विधीयत इत्युक्तं, तथापि सिद्धस्वभावस्य दध्नः फलं प्रति करणत्वं नोपपद्यते। करणत्वस्य कर्तृव्यापारविषयत्वनियमात् व्यापार अनाविष्टस्य दध्नः करणत्वं न संभवतीति जुहोतिना अनूदितहोमसंबद्धकरण-विशिष्टं दधि? दधिविशिष्टं वा करणत्वं फलाय विधीयत इति वक्तव्यम्। अत एवाह शास्त्रदीपिकायाम् अस्मिन्नेवाधिकरणे 153 पुटे "तस्मात् विभक्त्यभिहितकारकविशिष्टं दधि, दधिविशिष्टं वा कारकं प्रत्ययार्थ-प्राधान्यात् फलाय विधीयते" इति। एवञ्च कर्त्वर्थपुरुषार्थप्रयोगयो-

रुभयोः अविशिष्टत्वेऽपि उद्देश्यविधेयभावरूपभेदस्य सत्त्वात् क्रत्वर्थत्वेन-रूपेण पुरुषार्थत्वरूपेण भेदो वर्तत इत्यभ्युपेयम् एतादृशस्थले ।

एतादृशस्थले काम्यो गुणः नित्यमर्थं विकृत्य निविशत इति न्यायेन क्रत्वर्थतया प्राप्तदधिरूपगुणस्य स्वरूपमबाधित्वा नित्यस्य क्रत्वर्थस्य विधेः प्रयोजकत्वं बाधित्वा काम्यविधिः निविशत इति निविशमानमपि न नित्यमनित्ययति, तेनापि तत्सिद्धेरिति । अतः अस्य न्यायस्येदं स्वरूपम् । यत्र क्रत्वर्थं फलार्थं च विनियोजकवाक्यद्वयं श्रूयते, तत्र क्रत्वर्थस्य वस्तुनः स्वरूपबाधो नास्ति । किन्तु क्रत्वर्थविधेः प्रयोजकत्वबाधः इत्येव ।

एतावता गोदोहनाधिकरणइन्द्रियाधिकरणन्याययोः स्वरूपं प्रदर्शितम् । भाष्यवार्तिकयोः उक्थ्यादयः अग्निष्टोमस्य गुणविकारा इति विशदीकर्तुं गोदोहनाधिकरणइन्द्रियकामाधिकरणन्याययोः दृष्टान्ततया उक्तत्वेऽपि तन्न्याययोः अत्र अंशतः वैषम्यं, अंशतः साम्यमेव वक्तव्यम् । गोदोहनन्यायस्थले अप्रणयनं प्रति नित्यप्राप्तचमसं, तन्निष्ठसाधनत्वमपि बाधित्वा चमसस्थाने गोदोहनस्य निवेश उक्तः । इन्द्रियकामाधिकरणे दधि-स्वरूपस्य होमं प्रति कारकीभूतस्याबाधितत्वेऽपि क्रत्वर्थविधेः प्रयोजकत्व-बाध इत्युक्तम् । उक्थ्यादिस्थलेषु तु अग्निष्टोमस्तोत्रमपरित्यज्य अग्नि-ष्टोमस्तोत्रेण समाप्तिमकृत्वा तदुपरि उक्थ्यादिस्तोत्रं कृत्वा तेन समाप्तिः क्रियते । तत्समाप्तय एव फलवत्य इति समाप्तिरेव संस्थाशब्देनाभिधीयत इति । अत्रापि एतदधिकरणवार्तिकम् । तथा हि "विकारास्तु कामसंयोगे स नित्यस्य समत्वात्" इति जैमिनिसूत्रमवलंब्य विद्यमानभाष्योपरि वार्तिकग्रन्थे एवमुक्तम् । उक्थ्यषोडश्यादिशब्दाः । ग्रहणस्तोत्रवाचका वा उत समाप्तिवाचका इति विचार्य यदि ग्रहणस्तोत्रवाचका स्युः । तयोरेव फलसम्बन्धः स्यात् । ततस्तयो क्रियात्वात् आश्रयापेक्षा नास्तीति स्वतन्त्र-योरेव प्रयोगः प्राप्नोति । ततश्च प्रकरणाम्नातप्रयोजनमुक्थ्यादिशब्दप्रयो-गश्च न ज्ञायेत । तस्मादपि समाप्तयः फलवत्यः । उक्थ्यादयः समाप्ति-विशषाः । फलसाधनत्वेन चोद्यमानाः समाप्तिमन्तमाश्रयमपेक्षमाणाः प्र[illegible]

ज्योतिष्टोमं समाश्रयन्तः अग्निष्टोमसंस्थां विकृत्य निविशन्त इति विकार-शब्देनोच्यन्ते ।

ननु उक्थ्यादीनां समाप्तित्वे सिद्धे समाप्तमदपेक्षा भवति इत्यनेन किं प्रतीयत इति चेत् समाप्तेस्सापेक्षत्वात् आरम्भमध्यमयोस्सत्त्वे समाप्ति-र्भविष्यति । उक्थ्यादिशब्दाः केवलं समाप्तिवाचकाः आरम्भमध्यमावस्थे विद्येते एव । अतः अग्निष्टोमापेक्षा अवश्यमाश्रयणीयेत्यर्थः । अत एव अग्निष्टोममपरित्यज्य उक्थ्यादिसंस्थानां निवेश इति वक्तुं वार्तिककारैः मतान्तराणि प्रदर्शितानि । "तस्मादपि समाप्तयः फलवत्यः । कथं तु प्राक्क्रतुसम्बन्धात् समाप्तिमत्त्वमिति ? तत्र केचिदाहुः—अग्निष्टोमादि-सप्तसोमसंस्था इति स्मरणात् समाप्तिवचने सिद्धे कर्मान्तराण्यनादृत्य सोम-यागमात्रे अपेक्षिते प्रकरणात् ज्योतिष्टोममाश्रयत्वसिद्धिरिति ।

टिप्पणी—अस्यैव=ज्योतिष्टोमस्यैव; ज्योतिष्टोमस्य=अग्निष्टोम-संस्थाकज्योतिष्टोमस्येत्यर्थः ।

अन्ये तु मन्यन्ते । ज्योतिष्टोमस्य क्वचिदभ्यासविशेषे समाप्त्यन्तरं विज्ञायते यदुत्पद्यमानमेव उक्थ्यादिव्यपदेशं लभते । फलसम्बन्धं च । तत्र श्रुतेः बलीयस्त्वात् । उक्थ्येन पशुकामो यजतेति श्रुत्या प्रकरणलभ्यं ऋत्वर्थ-त्वं बाध्यते । यस्तु आश्रयाश्रयिसम्बन्धः सः अनुगुणत्वात्=प्रकरणे पाठात् आश्रीयते ।

अपरं दर्शनं उक्थ्यादिशब्दवाच्यं किमपि प्रथममेव "उक्थ्येन पशुकामो यजेते"ति वाक्यश्रवणानन्तरमेव फलेन सम्बध्यते । यद्वा अभ्यास-विशेष एवायम् । वचनान्तरात् ज्योतिष्टोमस्यान्त निविशमानः फलाय चोद्यते । तेन वा तस्मिन्वा क्रतुस्सन्तिष्ठते इति संस्थाशब्देनाभिधीयते । यतः उक्थ्यादिसंस्थाशब्दवाच्याः अग्निष्टोमस्यैव अभ्यासविशेषाः न क्रतवन्तर-मित्युक्तम्, अत एव "उक्थ्यषोडश्यतिरात्र" इति (स श्रौ)सूत्रस्य व्याख्याने "सर्वक्रतूनां प्रकृतिरग्निष्टोम" इति संस्थान्तराणि, दर्शपूर्णमासयो अभ्यास-विशेषाः दाक्षायणयज्ञादय इव, तस्यैव अग्निष्टोमस्य गुणविकारमात्राणि

भवन्ति न तु त्रिकद्रुकादय इव क्रत्वन्तराणि इत्युक्तम्। अनेनाग्निष्टोमस्यैव गुणविकृतप्रयोगभेद इति ज्ञायते। अत एव आह सोमनाथयज्वा दाक्षायणाधिकरणव्याख्यायां मयूखमालिकायां दाक्षायणयज्ञो नाम न कर्मान्तरम्, किन्तु गुणविकृतप्रयोगमात्रमिति। उक्थ्यादिषु साधारणज्योतिष्टोमांशः विशेषरूप- उक्थ्यांशश्च वर्तत इति वार्तिकम्। तेन ज्योतिष्टोमांशेन अग्निष्टोमानतिरिक्ताः उक्थ्यांशेन तदतिरिक्ताः काम्या विकृतयश्च। तेन नित्यस्याग्निष्टोमस्य गुणविकारमात्रा अपि गोदोहन- इन्द्रियकामाधिकरणन्यायापेक्षया च पूर्वोक्तप्रकारेण अंशभेदेन वैषम्यमपि वर्तते।

ननु अग्निष्टोमसंस्थापि ज्योतिष्टोमेन स्वर्गकामो यजेत इति काम्या श्रूयते। तदानीं सर्वसंस्थारूपो ज्योतिष्टोमः अनित्य इति न तु तद्व्यतिरिक्तं नित्यं ज्योतिष्टोमरूपं किञ्चिदस्ति तदा नित्यवदाम्नातानां दीक्षणीयादिधर्माणां नित्यं ज्योतिष्टोमार्थत्वं कथं सिद्ध्यतीत्याशङ्क्य अत्र द्वौ विधी वर्तेते। एकः क्रत्वर्थः, अपरः पुरुषार्थ इति "स नित्यस्य समत्वात्" इति सूत्रांशेन सूच्यते. यतः द्वौ विधी वर्तेते अतः तौ द्वौ विधी आलोच्य "एकस्य तूभयत्वे संयोगपृथक्त्वमि"ति अग्निष्टोमान्तस्य नित्यस्यैव कामसंयोग इति। इतरस्य तु उक्थ्यादेः केवलकामसंयोगात् अनित्यत्वमिति विशेष इत्युक्तम्। अनेन किं ज्ञायते ? अग्निष्टोमस्य नित्यत्वं काम्यत्वमपि उक्थ्यादीनां तु केवलकाम्यत्वादनित्यत्वमित्युक्त्वा अथवा उक्थ्यादिष्वपि प्राप्तिद्वये सति=उपदेश अतिदेशाभ्यां प्राप्तिद्वये सति ज्योतिष्टोमांशेन या प्राप्तिः सा उपदेशेन, या उक्थ्यांशेन प्राप्तिः सा अतिदेशेनेति विवेकः इति अधिकरणान्ते वार्तिककारैः उपसंहृतम्। अनेन किं ज्ञायत इति चेदुच्यते। यद्यपि संस्थाधिकरणवार्तिके अग्निष्टोमस्यापि फलकामपदघटितवाक्येन फलार्थतया श्रूयमाणत्वात् सर्वा अपि संस्था अनित्या एव भवन्ति। तदा को नित्य इत्यनवधारणात् नित्यवदाम्नातानां दीक्षादिधर्माणां कुत्र प्रवेश इत्याशङ्क्य अग्निष्टोमस्य नित्यत्वेन काम्यत्वेन विधिद्वयस्य सत्त्वात् सयोगपृथक्त्वन्यायेन अग्निष्टोमान्तस्य नित्यस्यैव कामसंयोग इति "अपि

वा द्विरुक्तत्वात् प्रकृतेः भविष्यन्तीति 3-6-16 सूत्रानुसारेण दीक्षणीयादि-धर्माणां नित्याग्निष्टोमे निवेश इति वक्तुं अग्निष्टोमस्य नित्यत्वं इतरस्य तु कामसंयोगात् अनित्यत्वमिति विशेषः इत्युक्तत्वात् मीमांसकसिद्धान्ते अग्निष्टोमस्यैव नित्यत्वं तदतिरिक्तानामुक्थ्यादीनामनित्यत्वमित्यत्र न विवादः। तथापि इतः पूर्वं "ब्रह्मवादिनो वदन्ति" इत्यत्र अतिरात्रादिषु अग्निष्टोमस्य अन्तर्भावितत्वेन अतिरात्रप्राधान्येनापि अग्निष्टोमप्राधान्यं सिद्धयतीत्युक्तत्वात्, "एतावान् वै यज्ञः" इत्यत्र अग्निष्टोमशब्दस्य यज्ञ-शब्दव्यवहारः तद्विस्तार एव संस्थासमुदायः न तदतिरिक्त इत्युक्तत्वात् संस्थाधिकरणभाष्यवार्तिकयोः गोदोहन- इन्द्रियकामाधिकरणन्यायाभ्यां उक्थ्यादिसंस्था अग्निष्टोमस्यैव गुणविकारा इत्युक्तत्वेऽपि यथा गोदोहन-स्थले चमसस्य ऋत्वर्थत्वेन चमसप्रयोगो नास्ति, इन्द्रियकामस्थले ऋत्वर्थ-दधिकरणकहोमस्याभ्यासो नास्ति न तथा उक्थ्यादिसंस्थास्विति वैलक्ष्य-ण्यस्य सत्वेऽपि अग्निष्टोमसंस्थां विकृत्य निविशन्त इत्यनेन अग्निष्टोम-स्तोत्रेण तस्य क्रतोः या समाप्तिः कर्तव्या तां समाप्तिमुपेक्ष्य अग्निष्टोम-स्तोत्रान्ते उक्थ्यादिस्तोत्राणां निवेश इत्युक्तत्वात् अग्निष्टोमस्तोत्रापरि-त्यागेनैव उक्थ्यादिस्तोत्राणां उक्थ्यादिसंस्थासु निवेशनीयत्वरूपवैलक्षण्यस्य सत्त्वात् सर्वास्वपि संस्थासु ज्योतिष्टोमः अविरुद्धतया अनुवर्तत इति ज्योतिष्टोमाग्निष्टोमस्यैव अभ्यासविशेष इत्युक्तत्वात् अग्निष्टोमवत् नित्यत्वं वक्तुं न शक्यते। किन्तु अग्निष्टोमस्य नित्यत्वात् तदाश्रयणेनैव एतेषामुक्थ्यादीनां गौणनित्यत्वं अग्निष्टोमगतद्वादशस्तोत्ररूपगुणयोगा-त्सम्पादितमिति बुद्ध्या एते उक्थ्यादयः न केवलं संस्काराः किन्तु नित्य इति बहूनां व्याख्यानकाराणां वचनस्य आशय इति वक्तुं युक्तमिति भाति।

ननु एते संस्कारा नित्या इति वचनस्य गौणनित्यत्वे तात्पर्यमिति भवदीयवचनस्य किं प्रमाणम् इति चेदुच्यते मी॰ शास्त्रदीपिकायां 7-3-अधिकरणे एवं विचारितं कौण्डपायिनामयने "मासमग्निहोत्रं जुहोति" इति श्रूयते। अत्र श्रूयमाणाग्निहोत्रपदस्य नित्याग्निहोत्रवत् कर्मनामधेयत्वं उत नित्याग्निहोत्रधर्माणामतिदेशकत्वं वा इति विचार्य अग्निहोत्रं जुहोतीति

विहितस्याग्निहोत्रस्य अग्निहोत्रपदं यथा नामधेयं तथैवात्रापीति पूर्वपक्षे प्राप्ते नित्याग्निहोत्रप्रकरणे "यदाहवनीये जुहोति" इति वाक्येन अग्निद्रव्यस्य अग्निर्ज्योतिर्ज्योतिरग्निस्वाहे"ति मन्त्रवर्णात् अग्निदेवतायाश्च प्राप्तत्वात् तत्प्रख्यशास्त्वात् नामधेयस्य उक्तत्वेपि अत्र तादृशसम्बन्धबोधकप्रमाणाभावात् तदत्र अग्निहोत्रपदं न मुख्यं नामधेयं किन्तु गौणं सत् नित्याग्निहोत्रधर्माणाम-तदेशप्रापकमित्युक्तम् । तेनैव न्यायेन तद्वदत्रापि अग्निष्टोमवत् अग्निष्टोम-तोक्तान्ते स्तोमान्तराभावाभावेऽपि उक्थ्यादीनां तस्यैव विस्तार इत्युक्तत्वात् तत्साध्यसादृश्यं मलापकर्षणगुणाधानलक्षणसंस्कारकत्वं काम्यकर्मापेक्षया अतिशयेन भविष्यतीति निश्चित्य एते संस्कारा इति प्रयुक्तवानाचार्यो गौतमः । अत्र श्रूयमाणसंस्कारपदं एतेषां गौणनित्यत्वप्रापकमित्यङ्गीकृत्य एते नित्या इति बहवः व्याचख्युः । ततिसद्धं व्याख्यातनित्यपदस्य गौणनित्यत्व-परमित्यभ्युपगन्तव्यम्, अन्यथा मीमांसासिद्धान्तविरोधापत्तिः ।

किञ्च आर्षेयकल्पकारमतेऽपि सप्त सोमसंस्था न नित्या इति स्पष्टं प्रतीयते । तथा हि- आर्षेयकल्पे ६० तमे पृष्टे सर्वाः ज्योतिष्टोम-संस्थाः नित्या इति केचित् ब्रुवते । चत्वारिंशत्संस्कारमध्यपातेन गौतमी-येन । तत्राग्निष्टोमेन विकारात् ब्राह्मणस्य सप्त एता ज्योतिष्टोमसंस्था नित्या इत्युक्तिः नोपपन्ना । यच्चात्र सोमसंस्था इति वचने सोमशब्दश्रुत्या संयुक्तस्य क्रतुमात्रस्य अभिधायको युक्तः । अत एव सूत्रकारः सर्वासां सोमसंस्थानां ब्रह्मत्वमुपदिदिक्षुः वदति । यथा गौतमेनोक्तम् । तस्मादेताः संस्थाः याः काश्चन सप्तसौमिक्यः नित्यतया कार्या इति निश्चिनुमः इति गौतमवाक्यार्थ इति । यत्तु कैश्चिदुक्थ्यादीनां फलकामनासंयुक्तत्वेऽपि गौतमेन नित्यत्वस्य उक्तत्वात् । "वसन्ते वसन्ते ज्योतिषा यजेत" "ज्योतिष्टो-मेन स्वर्गकामो यजेते"ति वाक्यद्वयेन सर्वसंस्थाकज्योतिष्टोमस्य नित्यत्वं काम्यत्वमपि संयोगपृथक्त्ववन्न्यायेन अभिधेयमित्युक्तम् तन्न । अत्र ज्योति-ष्टोमशब्देन अग्निष्टोमसंस्थाकज्योतिष्टोम एव वाच्य इति 5-3-14 "एषवाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम" इति वाक्यविचारे

सिद्धान्तितम् । अन्यथा ज्योतिष्टोमशब्देनैव सर्वेषामुपपादने सिद्धे सति त्रिकाण्डमण्डने ।

"द्विप्रकाराणि रूपाणि कर्माण्यन्यानि कानिचित् ।
ज्योतिष्टोमो निरूढश्च पशुसौत्रामणी तथा ।।

चातुर्मास्यानि दर्शश्च पौर्णमासोऽग्निहोत्रकम् ।
वाजपेय इति मे स्युः नित्याः काम्या इति द्विधा ।।"

इत्यत्र ज्योतिष्टोमशब्देनैव वाजपेयस्य ग्रहणसिद्धौ पृथक्त्वेन वाजपेयग्रहणमनर्थकं स्यात् । अतः ज्योतिष्टोमपदेन अग्निष्टोम एवोच्यते । स एव नित्यः संस्थान्तराणि काम्यानि अग्निष्टोमगुणविकारमात्राणि न तु क्रत्वन्तराणीति ।

ननु स-श्रौ 9-7 "उक्थ्येन पशुकामो यजेते"ति सूत्रव्याख्याने व्याख्यानकारैः गोपीनाथभट्टमहोदयैः "गुणविकारास्ते कामाः तेन सत्सु कामेष्वेव भवन्ति नासत्सु कामेषु ।" गौतमेन तु गर्भाधान, पुंसवन, सीमन्तोन्नयन, जातकर्म, नामकरणान्नप्राशनचौलोपनयनानि, चत्वारि वेदव्रतानि, स्नानं, सहधर्मचारिणीसंयोगः, पञ्चमहायज्ञाः अष्टका पार्वणश्राद्धं, श्रावणी, आग्रहायणी, चैत्री आश्वयुजीति सप्त पाकयज्ञसंस्थाः अग्न्याधेयम् अग्निहोत्रं दर्शपूर्णमासौ, चातुर्मास्यानि, आग्रयणेष्टिः, निरूढपशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्थाः, अग्निष्टोमः अत्यग्निष्टोमः उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः अप्तोर्याम इति सप्त सोमयज्ञसंस्था इत्येते चत्वारिंशत्संस्काराः, अष्टावात्मगुणाः दया सर्वभूतेषु, क्षान्तिः, अनसूया, शौचम् अनायासः माङ्गल्यम्, अकार्पण्यं, अस्पृहा, चेति । यस्यैते चत्वारिंशत्संस्काराः अष्टावप्यात्मगुणाश्च स ब्रह्मणस्सायुज्यमाप्नोतीति फलश्रवणात्काम्यता, "यो ह्येतान्संस्कारान्न करोति स पापीयान् भवती"ति दोषश्रवणान्नित्यतापि एषामुक्ता तेनैतेषां काम्यत्वं नित्यत्वं चेत्युक्तम् । अतः सप्तसोमसंस्थानां नित्यत्वं काम्यत्वं भवतीति चेदुच्यते । तावन्मात्रेण नित्यत्वकाम्यत्वं सप्तानामपि संस्थानां यदभ्युपेतं स्यात् । त्रिकाण्डमण्डने "द्विप्रकाराणि रूपाणि"

इत्यस्मिन्श्लोके ज्योतिष्टोमवाजपेययोरेव पृथक् कीर्तनमनुपपन्नं स्यात्-अत "यो ह्येतान् संस्कारान्न करोति" इति निन्दास्मृतिः, "नहिनिन्दान्यायेन" तानि कर्माणि स्तोतुमेव प्रवर्तत इति वक्तव्यम् । तत्सिद्धं ज्योतिष्टोमपदेन अग्निष्टोम एव उच्यते । स एव नित्यः । अन्याः संस्थास्तु काम्या एवेति ।

एतावता ग्रन्थेन मीमांसकमतेन, कल्पसूत्रकाराणां मतेन च संस्थासु मध्ये अग्निष्टोमस्यैव नित्यत्वं अन्यसंस्थानामनित्यत्वं काम्यत्वं चेति बहुभिः प्रमाणैरुपपादितम्– गौतमेन तु– "एते चत्वारिंशत्संस्काराः" इत्येतावन्मात्रस्य उक्तत्वेऽपि एते संस्काराः नित्या इति, "यो ह्येतान्संस्कारान्न करोतीति निन्दाश्रुत्या बहवो ग्रन्थकर्तारः व्याचख्युः । तस्य नित्यपदस्य पूर्वग्रन्थाविरोधेन गौणत्वं बहुभिः प्रमाणैः व्यवस्थापितम् । वस्तुतस्तु श्रुतिस्मृत्युदितानि कर्माणि बहूनि सन्ति । तेषां मध्य कानिचिदेव कर्माण्युपादाय श्रीगौतममहर्षिणा "एते चत्वारिंशत्संस्कारा" इत्युल्लिलिखुः । तेनैवं प्रतीयते तेषामयमाशय इति । एतेषां सर्वकर्मापेक्षया अतिशयेन मलापकर्षणगुणाधानलक्षणसंस्कारनियमः तैः विविदिषोत्पादनद्वारा अभ्युदयावाप्तिश्च चित्तसंस्कारमन्तरा न विविदिषा उत्पद्यते । तां विविदिषामन्तरा ज्ञानं नोत्पद्यते । "ज्ञानादेव हि कैवल्यमि" त्यादिश्रुतिभिः साक्षान्मोक्षसाधनत्वं ज्ञानस्यैवेति वेदान्तदर्शिनः । अतः परम्परया मोक्षसाधनत्वात् संस्कारकर्मणां मध्ये केषांचित् अकरणे प्रत्यवायबोधकवाक्यानां सत्त्वेपि केषांचित् तद्बोधकवाक्यानामभावात् तेषां अकरणे प्रत्यवायाजनकत्वेऽपि संस्कारत्वेन रूपेण अवश्यमनुष्ठेयत्वमापतति । तन्मध्यपतितत्वेन उक्थ्यादयोऽपि संस्थाः संस्कारत्वेन रूपेण अनुष्ठेया इति वचने न कापि क्षतिः । "यस्यैते" इति सूत्रोक्तरीत्या विद्यासहकारित्वेन विनियुज्यमानस्येव काम्यत्वेन श्रूयमाणस्यापि यागस्वरूपाभेदात् संस्कारकर्मत्वोक्तिः नानुपपन्ना, विनियोजकवचनद्वयस्य सत्त्वात् ।

संस्थापरिगणने प्रमाणानि

संस्थानां त्रित्वे चतुष्ट्वे च प्रमाणानि । तत्र संस्थानां त्रित्वे चतुष्ट्वे च तावत् लिङ्गानि दृश्यन्ते । तथा हि—

1. यद्यग्निष्टोमो जुहोति यद्युक्थ्यपरिधौ निमार्ष्टि यद्यतिरात्रौ यजुर्वदन् प्रपद्यते । यज्ञक्रतूनां व्यावृत्त्यै 6-4-3 तै. सं इति ।

2. यद्यग्निष्टोमस्सोमः परस्तात्स्यादुक्थ्यं कुर्वीति यद्युक्थ्यस्यादतिरात्र कुर्वीता" यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयान्भवति । तै.सं.3-1-6.

3. यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति य एवं विद्वान्पौर्णमासीं यजते यावदुक्थ्ये नोपाप्नोति तावदुपाप्नोति य एवं विद्वानमावास्यं यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति । तै. सं. कां 1-6-8. अग्निहोत्र-दर्शपूर्णमासयोः वेदनपूर्वकानुष्ठाने फलाधिक्यं द्योतयितुं अग्निष्टोमादिभिस्तुल्यता उदमसीत । अत्र एभिर्लिङ्गैः तिस्र एव संस्थाः प्रदर्शिताः । अथ चतुष्ट्वे लिङ्गानि दृश्यन्ते । तै. ब्रा. 1-2. वाजपेयप्रकरणे "ब्रह्मवादिनो वदन्ति" । नाग्निष्टोमेनोक्थ्यः । न षोडशी नातिरात्रः । अथ कस्माद्वाजपेये सर्वे यज्ञे क्रतवोऽवरुध्यन्त इति । पशुभिरिति ब्रूयात् । आग्नेयं पशुमालभते । अग्निष्टोममेव तेनावरुन्धे । ऐन्द्राग्नेनोक्थ्यं ऐन्द्रेण षोडशिनस्तोत्रं सारस्वत्या त्रिरात्रम् । मारुत्या बृहतस्तोत्रम् । एतावन्तो वै यज्ञक्रतवः तान्पशुभिरेवावरुन्धे इति वाजपेये सर्वयज्ञक्रत्ववरोधः आग्नेयादिपशुभिरेव सिध्यतीति वक्तुं तत्प्रसङ्गे अग्निष्टोमादीनां चतुर्णामेव, "एतावन्तो वै यज्ञक्रतव" इति श्रुत्या इयत्ता प्रदर्शिता ।। एवमेव तै– सं 7-4 ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात्तं प्रथममुपयन्तीत्यतद्वा अग्निष्टोमं प्रथममुपयन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रम्" इति ।

एवमेव तै. ब्रा. 1-5-3 "देवस्य सवितुः प्रातः प्रसवः प्राणः" इत्यस्मिन्ननुवाके शुभकालनिरूपणप्रस्तावे प्रातस्सङ्गवमध्याह्न अपराह्ण-ाायाह्ना इति दिवसस्य पञ्च काला निरूपिताः । तत्तत्सन्धिकालेषु देवाः

अग्निष्टोमादीन् निर्मितवन्त इति चत्वार एव अभिहिताः तथा हि "यत्प्रतीचीनं प्रातस्तनात्। प्राचीनँ संगवात्"। ततो देवा अग्निष्टोमं निरमिमत। यत्प्रतीचीनँ संगवात्, प्राचीनँ मध्यंदिनात्। ततो देवा उक्थ्यं निरमिमत। यत्प्रतीचीनं मध्यन्दिनात्। प्राचीनमपराह्णात्। ततो देवाः षोडशिनं निरमिमत। यत्प्राचीनमपराह्णात्, प्राचीनँ सायात् ततो देवा अतिरात्रं निरमिमत। इत्यादिवाक्यैः प्रातस्सङ्गवयोर्मध्ये अग्निष्टोमः, संगवमध्याह्नयोस्संधौ उक्थ्यः, माध्यन्दिनअपराह्णयोस्संधौ षोडशी, अपराह्णसायाह्नयोस्संधौ अतिरात्रश्च निर्मिता इत्युक्तम्।

एवमेव तै. ब्रा. 2-7 अप्तोर्यामनिर्वचनप्रसङ्गे "तानग्निष्टोमेन नाप्नोत्। तानुक्थ्येन नाप्नोत्। तान् षोडशिना नाप्नोत्। तान् रात्र्या नाप्नोत् इत्यादिश्रुतीना लिङ्गबलेन चतुष्ट्व प्रतीयते।

ननु एवं कैश्चित् तिस्रः संस्था इति। कैश्चित् चतस्रः संस्था उक्ताः। सत्याषाढादिभिरस्तु कुतः पञ्च संस्था उक्ताः इति चेदुच्यते। एवं मतभेदे प्रसक्ते सति स्वमत आचार्यः "उक्थ्यषोडश्यतिरात्रोऽप्तोर्यामश्च अग्निष्टोमस्य गुणविकारा भवन्ति इत्यनेन सूत्रेण या यास्सस्था अन्येषां क्रतूनां प्रकृतिभूताः भवन्ति तास्ताः प्रकृतिभूताः संस्थाः प्रदर्शयति। तत्र प्रकृतिर्द्विविधा। मूलप्रकृतिः अवान्तरप्रकृतिश्चेति। अग्निहोत्रं, इष्टिः, सोमश्चेति तिस्र मूलप्रकृतयः। तासु कस्याप्यङ्गस्य अन्यतः अतिदिष्टस्याभावात्। ननु अग्न्याधानेष्टकोपधानयोः अन्यतः अतिदेशो नास्तीति अतः तयोः कुतः मूलप्रकृतिषु उपन्यासो न कृत इति चेत्, तर्हि तादृशं सर्वमग्निहोत्रादिभिरुपलक्षणीयम्। अथ वा वह्निसस्कारमात्रया कर्मत्वानादरेण मूलप्रकृतिष्वनुपन्यासः। अग्निहोत्रं नाम प्रतिदिनं सायं प्रातश्च क्षीराज्यादिद्रव्येण होतव्यं कर्म, तद्विकृतिः कौण्डपायिनामयनगतं मासाग्निहोत्रम्। इष्टिर्नाम पुरोडाशादिद्रव्येण पक्षे पक्षे निष्पाद्यं दर्शपूर्णमासाख्यं कर्म। तद्विकृतयः ऐन्द्राग्न्यादि इष्टयः। सोमो नाम प्रति सन्तमनुष्ठेयसोमलतारूपद्रव्येण निष्पाद्यमग्निष्टोमाख्यं कर्म। तस्य साक्षाद्विकृतिः विश्वजिदाद्येकाहपरम्परया-

सहस्रसंवत्सरपर्यन्तकर्मसघ. । यद्यपि अग्नीषोमीयपशुः उक्तेभ्यः इष्ट्यग्निहोत्रसोमभ्यः विलक्षणः, तथापि नासौ काचिन्मूलप्रकृतिः। अस्मिन्पशौ इष्टिधर्माणां प्रयाजादीनां अतिदेशेन तस्य इष्टिविकृतित्वात् तस्य विकृतिरूपत्वेऽपि तदीयधर्माणां उपाकरणनियोजनादीनां सवनीयादिपशुषु अतिदेशात् प्रकृतित्वमप्यस्ति । ततः द्वयात्मकत्वात् अवान्तरप्रकृतिरित्युच्यते । सहस्रसंवत्सरसत्रगतधर्माणाम् अन्यत्र अतिदेशाभावेन तस्मिन्सत्रे द्विविधस्यापि प्रकृतित्वस्य अभावात् केवलविकृतित्वं गृहमेधीयेष्टिः उपसद्धोम इत्यादेः अप्रकृतिविकृतित्वात् अपूर्वकर्मत्वम् । न हि अन्यदीयस्य धर्मस्य तस्मिन्वा, तदीयस्य अन्यस्मिन्वा कश्चिदतिदेशः अस्ति । तस्मात् प्रकृतिः, विकृतिः उभयात्मकं अनुभयात्मकञ्चेति चतुर्विधं कर्म संपन्नं । तत्र उभयात्मकमेवम् । अवान्तरप्रकृतिरित्युच्यते । एवञ्च चतुर्विधानां मध्ये अवान्तरप्रकृत्यात्मककोटौ निवेशनीयाः उक्थ्यः षोडश्यग्निरात्र,अप्तोर्यामश्चेति सूत्रकारस्य आशयः। एवमेव आपस्तम्बेनापि। तत्रायमभिप्रायः सूत्रकारस्य । अग्निष्टोम एव तावत् सर्वसोमानां मौलिकी प्रकृतिरिति । तदेवोक्तं स. श्रौ. 9-7 पटले "सर्वक्रतूनां प्रकृतिरग्निष्टोम इति । संस्थान्तराणि तु दर्शपूर्णमासयोः दाक्षायणयज्ञादय इव 17–5 गुणविकारमात्राणि भवन्ति । न तु त्रिकदृकादय इव ऋत्वन्तराणीत्युक्तम्, तथा हि-दाक्षायणयज्ञेन "सुवर्गकामो यजेत" इति दर्शपूर्णमासप्रकरणे श्रूयते। अयं दाक्षायणयज्ञः दर्शपूर्णयागाद्भिन्नः न वा इति मी. 2-3-4 अधिकरणे विचार्य संज्ञाभेदात् अभ्यासाद्वा कर्मभेदः यथा पूर्वस्मिन्पादे"अथैष ज्योतिः, अथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजतेत्यत्र" एतद्वाक्यविहितानां ज्योतिरादीनां सज्ञाभेदात् ज्योतिष्टोमात्कर्मान्तरत्वमुक्तं तद्वदत्रापीति पूर्वपक्षीकृत्य "द्वे पौर्णमास्यौ, द्वे अमावास्ये यजेतेति"वाक्यान्तरेण पौर्णमास्यमावास्याययागयोः आवृत्तिविहिता । यत्र स्वर्गकामनया दर्शपूर्णयागमाश्रित्यावृत्तिः क्रियते स एव दर्शपूर्णमासयागः दाक्षायणयज्ञशब्देनोच्यते न तु कर्मान्तरमिति । दाक्षायणशब्दस्य व्युत्पत्तिरेवम् । दक्षस्य उत्साहिनः यजमानस्य इमे दाक्षाः-ऋत्विजः, तत्कर्तृकमयनं आवृत्तिर्यस्य यज्ञस्य स दाक्षायण यज्ञ इति । तैनैव न्यायेन संस्थान्तराणि तु

अग्निष्टोमस्यैव गुणविकारमात्राणि भवन्ति । न तु त्रिकद्रुकादय इव क्रत्वन्तराणि । तथा हि– त्रिकद्रुकाः तां॰ ब्रा॰ 20-1-1-23 अथैष ज्योतिः अथैष गौः, अथैष आयुः इत्यादिवाक्यैः ज्योतिराख्य-गवाख्य-आयुराख्याः विहिताः अग्निष्टोमात्क्रत्वन्तरभूताः यथा, न तथा क्रत्वन्तराणि उक्थ्यादीनि इत्याशयः ।

एताः उक्थ्यादिसंस्थाः प्रकृत्यधिकारे अनुक्रान्ताः । यथा अग्निष्टोमः उक्थ्यादीनां प्रकृतिः, तथा उक्थ्यादयः अपि अन्येषां क्रतूनां केषाञ्चित् प्रकृतिभूता अपि । यथा इष्टिः अग्नीषोमीयपशोः प्रकृतिः सः अग्नीषोमीयः सवनीयपशोः प्रकृतिः तस्य सवनीयस्य अग्नीषोमीयविकृतित्वेऽपि स पशुः ऐकादशिनानां प्रकृतिः । एवमेव अव्यक्तत्वसाम्यात् ज्योतिष्टोमोऽग्निष्टोमः सोमयागानां प्रकृतिः, द्वादशाहः अहीनसत्रादीनां (षड्रात्रादीनाम्) प्रकृतिरिति मी शा 8 1-3 उक्तम् । तथा हि —"इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात्" "पशौ च लिङ्गदर्शनात्" "दक्षस्य चेतरेषु" "ऐकादशनेषु सौत्यस्य द्वैरशन्यस्य च दर्शनात्" "प्रवृत्तिर्गणे स्यात्" । "प्रतिपशु यूपदर्शनात्" "अव्यक्तादिषु सोमस्य" "गणेषु द्वादशाहस्य" इत्यादि सूत्रैः जैमिनिना विकृतयोऽपि अन्येषां प्रकृतय इति स्पष्टमभिहिताः । एवमेव अत्रापि स॰श्रौ॰ 17-1. "सर्वक्रतूनां प्रकृतिरग्निष्टोमः" इति सूत्रानुसारेण उक्थ्यादीनां अग्निष्टोमविकृतित्वेऽपि ते उक्थ्यादयो अन्येषां प्रकृतिभूता अपीति प्रदर्शयितुं सूत्रयामास । इति तद्व्याख्यानकारैः गोपीनाथभट्टैः विवृतम् । तथा हि—अग्निष्टोमः ज्योतिरादेरग्निष्टोमस्य प्रकृतिः, उक्थ्यः गवादेरुक्थ्यस्य प्रकृतिः, षोडशी च वाजपेयादिषोडशिनः, अतिरात्रः विश्वजिदादेरतिरात्रस्य प्रकृतिः । अप्तोर्यामः सवात्मकोऽप्यस्तीति स॰श्रौ 13-13 खण्डे सवप्रकरणे "व्याख्यातः अप्तोर्यामः" इत्यनेन सूत्रेण उक्तं सवप्रकरणात् सवात्मकत्वमपि एतस्योक्तम् । एवं च ये सर्वपृष्टाः सर्वस्तोमाः विश्वजित्प्रकृतेरप्तोर्यामनाम्नः वैकृतातिरात्रविशेषा एव । अतः न अप्तोर्यामो नाम ज्योतिष्टोमः प्रकृतिभूतोऽस्तीति संगिरंते,

ते प्रत्युक्ता भवन्ति । तस्यापीह ज्योतिष्टोमसंस्थाधिकारवचनात् प्रकृत्यधिकाराच्च अस्त्येव प्रकृतिभूतत्वमिति ।

ज्योतिरादेरग्निष्टोमस्येत्यस्य विवरणम्

1. अत्र ज्योतिरादेः आदिपदेन बहवोऽग्निष्टोमा सन्तीति सूच्यन्ते । तथा हि- ज्योतिष्टोमोऽग्निष्टोमः प्रकृतिभूतः । अत्र त्रिवृत्पञ्चदश सप्तदश एकविँशः तै-ब्रा 1-5 इति स्मृत्या एते चत्वारः स्तोमाः यस्मिन्क्रतौ संपद्यन्ते सः क्रतुः ज्योतिष्टोमः । स एव अग्निष्टोमसाम्ना समाप्यत इत्यग्निष्टोमसंस्थाकः ज्योतिष्टोमोऽग्निष्टोमः ।

2. त्रिकद्रुकाणां मध्ये आद्यः ज्योतिराख्यः अग्निष्टोमः । अत्रापि प्रकृतिरूप-अग्निष्टोमे यावन्ति स्तोत्राणि ये ये स्तोमाश्च विद्यन्ते तावन्त्येव स्तोत्राणि, ते त एव स्तोमा इति अस्थूरिर्वा एष सन्ततो यज्ञः द्वौ द्वौ स्तोमौ सवनं वहतः त्रिवृत्पञ्चदशौ प्रातस्सवनं, पञ्चदशसप्तदशौ माध्यन्दिनँ सवनं, सप्तदशैकविँशौ तृतीयसवनं इति । ता॰ ब्रा॰ 16-1-6

3. यदभिजिद्भ्रुवत्यनभिजितस्याभिजित्यै इति तां॰ ब्रा. 16-4-7 अभिजिन्नामक अग्निष्टोमः विहितः सा॰ भा॰। एतद्विश्वजितोऽपि उपलक्षणम्। अयमर्थः अभिजिदाख्य एकाहो भवति । स चानभिजितस्य वस्तुनः अभिजित्यै=अभिजयाय भवति । जयेन यदप्राप्तं वस्तु तदभिजयाय भवत्यभिजिन्नामकः ।

4. अन्यः विश्वजिदाख्य एकाहो भवति । स च विश्वस्य जयाय भवति । विश्वस्य सर्वस्य वस्तुनः जयाय भवतीति "विश्वजिद्भ्रुवति विश्वस्य जित्यै" इति तै- सं 7-5-1 इति विश्वजिन्नामकः अग्निष्टोमः विहितः । एतौ उभावपि अग्निष्टोमाविति तै- ब्रा॰ विश्वजिदभिजितावग्निष्टोमौ" इत्यनेन अभिजिन्नामक-अग्निष्टोमः एकः विश्वजिन्नामकः अग्निष्टोमः अपर इति द्वावग्निष्टोमौ उक्तौ ।

5. सर्वजिन्नामकोऽग्निष्टोमः

सर्वजिता वै देवास्सर्वमयजन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति । सा॰ भा॰ सर्वजिता सर्वजिदाख्येन यज्ञेन खलु पुरा देवाः सर्वं जगदजयन् । तस्मात्सर्वस्य फलस्य प्राप्त्यै सर्वस्य जतव्यस्य जित्यै जयाय अनेन सर्वजिता यष्टव्यमिति विधिः अनेनार्थवादेन उन्नीयते । "यद्विधेयं तत्स्तुत्य"मिति न्यायः विधत्ते खलु । अस्य स्तोमसंस्थे दर्शयति पञ्चविँशोऽग्निटोमः तां॰ ब्रा 16-7-1 अनेन पञ्चविँशस्तोमसाध्य॰ अग्निष्टोमसामसंस्थाकः अयमग्निष्टोमः इत्युक्तम् ।

6. ज्योतिरग्निष्टोमः

सहस्रदक्षिणाः साहस्रानाम चत्वारः एकाहाः सन्ति । तत्र ज्योतिरग्निष्टोमः प्रथमः । तं दर्शयति । अथैष ज्योतिः तां॰ब्रा 16-8-1 इत्यादिना इदमत्र विवरणं॰तस्मिन् तस्मिन्क्रतौ अनुष्ठानकाले पुरुषस्य भ्रमप्रमादादीनां स्वाभाविकत्वात् तेन भ्रमप्रमादादिना शास्त्रविधिमुल्लङ्घ्य क्वचिदतिरिक्तानुष्ठानं क्वचिन्न्यूनानुष्ठानं क्वचित्कस्यचिदङ्गस्य लोप एव नासंभवति । तदानीं सः क्रतुः विगुणो भवति । तद्वैगुण्यपरिहारार्थं तदुक्तप्रायश्चित्तमपि कर्तव्यं यदाग्निष्टोमे भ्रंशस्सम्भवति । तत्समाधातुं विहितः अत्र तावत् तदपेक्षया केचिद्विशेषास्सन्ति । "उपसदि सहस्रं प्रातरनुवाकमन्वाह तदसौ लोकः सहस्रं दक्षिणा तदन्तरिक्षँ,सहस्रं एतान्यक्षराणि तदयं लोक एषु लोकेषु प्रतितिष्ठति य एवं वेद तां॰ ब्रा—16-8-3 अस्मिन्नेकाहे सहस्रसंख्याभिः ऋग्भिः परिमितं प्रातरनुवाकं उपसद्दिवसे होता अनुब्रूयात् । अत्र सहस्रसंख्या गावः दक्षिणात्वेन दातव्याः ।

अत्र वक्ष्यमाण॰ ब्रह्मसामसम्बन्धीन्यक्षराणि सहस्रसंख्याकानि । एतत्सहस्रत्रयेण लोकत्रयेषु प्रतितिष्ठतीति प्रतिष्ठाहेतुत्वेन स्तोतुं प्रवृत्तयाऽनया श्रुत्या एते विशेषाः उक्ताः । ब्रह्मसाम्नि कथं सहस्राक्षरसंपादनं इत्यस्मिन्नेव खण्डे "यत्सहस्राक्षरासु" इत्यनया ऋचा विवृतम् ।

अत्र स्तोत्रीया सम्मतिरेवमुक्ता सायणभाष्ये । स्तोत्रीयाणामियत्ता-परिज्ञानाय कल्पकारेण कृता स्तोमकल्पितिः प्रदर्श्यते । त्रिवृद्बहिष्पवमानं पञ्चदश त्रिवृत्याज्यानि सप्तदशो माध्यन्दिनः पवमानः, होतुश्च पृष्ठं पञ्चदशं, मैत्रावरुणस्य एकविँशं, आर्भवपवमानं एकविँशः एकविँशो अग्निष्टोम इति त्रिवृत्याज्यानीति अनेनाज्यस्तोत्रेषु चतुर्षु मध्ये स्तोत्रद्वयं त्रिवृत्स्तोमेन, स्तोत्रद्वयं पञ्चदशस्तोमेन कार्यमित्यर्थः । यतः अयमग्निष्टोमसंस्थाकः अतो ज्योतिरग्निष्टोमः अग्निष्टोमप्रकृतिकः ।

7. सर्वज्योतिरग्निष्टोमः "अथैष सर्वज्योतिः" तां॰ ब्रा. 16-9-1 सर्वज्योतिर्नाम यज्ञः साहस्रेषु द्वितीयः अयमपि अग्निष्टोमसंस्थाक इति एकविँशोऽग्निष्टोमो भवति। प्रतिष्ठा वा एकविँशः। अन्तत एव यज्ञस्य प्रतितिष्ठति" तां॰ ब्रा॰ 16-9-6 यतोऽयमग्निष्टोमसाम्ना समाप्यते अतः सर्वज्योतीरूपोऽग्निष्टोमः । प्रतिष्ठाकामेन "सर्वज्योतीरूपाग्निष्टोमेन यजेते"ति विधिरुन्नेयः । अत्रापि स्तोमकल्पितिः कल्पसूत्रकारेण प्रदर्श्यते ।

त्रिवृद्बहिष्पवमानं, पञ्चदशान्याद्यानि, सप्तदशो माध्यन्दिनपवमानः, पृष्ठे स्तोत्रेषु त्रीणि पृष्ठानि च, पञ्चविँशं ब्राह्मणाच्छंसिनः सप्तदश आर्भवपवमानः, एकविँशोऽग्निष्टोमः" इति । अत्र प्रकृत्यग्निष्टोमापेक्षया ब्राह्मणाच्छंसिनः पृष्ठं पञ्चदशस्तोमेन गेयमित्येव विशेषः अयमप्यग्निष्टोमप्रकृतिकः । अत्रापि सहस्रसंख्याका गावः दक्षिणा ।

8. चतुर्थसाहस्राख्य–अग्निष्टोमः

"यो वा अग्निष्टोमे त्रिरात्रं प्रोतं विद्यात् सोऽग्निष्टोमे सहस्रं दद्यात् त्रिरायतनं हि सहस्रम्" तां.ब्रा 16–12–1, सा. भा. यः अग्निष्टोमक्रतौ गर्गत्रिरात्रक्रतुमारोप्य अनुतिष्ठेत् तेन सहस्रदक्षिणा देया।" एवञ्चाग्निष्टोमसंस्थेन सहस्रदक्षिणेन यजेतेति विधिरुन्नेय इति भाष्ये उक्तम् । तस्य क्रतोरत्रारोपप्रकारः एवम् । तत्र त्रिरात्रक्रतौ एकैकस्मिन्नहनि स्तोत्रेषु प्रतिपद्रूपा या ऋग्विद्यते सा अत्रैव एकैकस्मिन्नेवाऽहनि ताः प्रतिपद्रूपा ऋचस्संपादनीयाः । तत्र एकैकस्मिन्नहनि यद्यत्पृष्ठसाम गीयते तानि सर्वाणि

पृष्ठसामानि अत्र एकस्मिन्नेवाहनि गेयानि । स्तोमकल्पितिरप्याह कल्पसूत्रकारः । तत्सर्वमेतच्छ्रुतिव्याख्याने द्रष्टव्यम् । यतोऽयमग्निष्टोमसंस्थाकः अतोऽयमग्निष्टोमशब्दवाच्यः ज्योतिष्टोमोऽग्निष्टोमप्रकृतिकः ।

9. **उपहव्यनामकः अग्निष्टोमः**

सप्तदशोऽग्निष्टोमः तां. ब्रा. 18-1-1 उपहव्यनामकः एकाहः सप्तदश स्तोमसाध्य सर्वस्तोत्रयुक्तो विहितः ।

10. **ऋतपेयनामक अग्निष्टोमः**

सप्तदशोऽग्निष्टोमः तां. ब्रा. 18-2-1 सप्तदशस्तोमसाध्यसर्वस्तोत्रयुक्तः ऋतपेयनामकः अग्निष्टोमः विहितः ।

11. **वैश्यस्तोमाख्य अग्निष्टोमः**

सप्तदशोऽग्निष्टोमः तां. ब्रा 18.3-1 सप्तदशस्तोमसाध्यसर्वस्तोत्रयुक्तः वैश्यस्तोमाख्याग्निष्टोमो विहितः ।

12. **ज्योतिष्टोमोऽग्निष्टुत्**

अग्निष्टुन्नामककतुषु अयं द्वितीयोऽग्निष्टुत् । तत्र पापनिवारणकामोऽधिकारी । ज्योतिष्टोम एव कार्यः तां. ब्रा. 17-5-5.

13. त्रिवृदग्निष्टुदग्निष्टोमः तस्य वायव्यास्वेकविँशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामेन यजेत । ता. ब्रा. 17-6-1 अत्र ब्रह्मवर्चसकामोऽधिकारी ।

14. ज्योतिष्टोमेनाग्निष्टुता यज्ञविभ्रष्टो यजेत तां. ब्रा 17-8-1 अत्र यज्ञविभ्रष्टवानधिकारी ।

15. बृहस्पतिसवाख्यः त्रिवृदग्निष्टोमः तां. ब्रा 17-8.1 त्रिवृत्स्तोमकः अग्निष्टोमसंस्थः बृहस्पतिसवाख्यः एकाहः विहितः । अत्र पुरोधाकामोऽधिकारी । अयमेव तै ब्रा 2-7-1 त्रिवृत्स्तोमो भवति

ब्रह्मवर्चसं वै त्रिवृत् ब्रह्मवर्चसमेवावरुन्धे । अग्निष्टोमस्सोमो भवति इति बृहस्पतिसवाख्य अग्निष्टोमः विहितः ।

16. सर्वस्वारनामकोऽग्निष्टोमः-त्रिवृदग्निष्टोमः स सर्वस्वारः यः कामयेत अनामयता अमुं लोकमियामिति स एतेन यजेत" तां.ब्रा. 17-12.1 यः व्याध्यादिराहित्येन सुखन अवस्थितादेव देहान्निष्क्रम्य स्वर्गलोकं प्राप्नुयामिति यः कामयेत स सर्वस्वाराग्निष्टोमेन यजेत इति ।

17. वैश्वदेवाग्निष्टोमः

तां. ब्रा. 17-13.1 त्रिवृदग्निष्टोमो वैश्वदेवस्य लोकः । चातुर्मास्यानि ऐष्टिकानि सौमिकानि चेति द्विविधानि वर्तन्ते । सौमिकचातुर्मास्यपक्षे वैश्वदेवाख्यस्य पर्वणः स्थाने त्रिवृत्स्तोमयुक्तः अग्निष्टोमः कर्तव्यतया विहितः यतः वैश्वदेवपर्वस्थाने विहितः अतः वैश्वदेवाग्निष्टोम इति व्यपदिश्यते ।

18. प्रजापतेरपूर्वनामक अग्निष्टोमः

"त्रिवृदग्निष्टोमः तस्य अनिरुक्तं प्रातस्सवनं" तां. ब्रा. 17.10-1 त्रयस्त्रिवृत एकाहाः एतेषु त्रिवृत् स्तोमकः अग्निष्टोमसंस्थः प्रथमः प्रजापतेरपूर्वाख्योऽनेन विहितः ।

19. शुनासीरीय ज्योतिष्टोमोऽग्निष्टोमः

सौमिकचातुर्मास्येषु साकमेधपर्वानन्तरं चतुर्षु मासेषु शुनाशीरी यस्य स्थाने ज्योतिष्टोमोऽग्निष्टोमस्सोमः कार्यः । त्रिवृत्पञ्चदश स्सप्तदश एकविँशस्तोमकः अग्निष्टोमसंस्थः प्राकृताग्निष्टोमसदृशः अन्यस्सोमयागः कर्तव्य इत्यर्थः ।

एतावता ग्रन्थेन ताण्ड्यब्राह्मणे स्वतन्त्रतया तत्फलकामनया विहिताः ज्योतिष्टोमोऽग्निष्टोमसंस्था विकृतयः अग्निष्टोमरूपाः बहवः कथिताः । यद्यप्यन्येऽपि मया अकथिताः अवशिष्टा भवन्तु नाम । अतः

एतावन्त एवेत्यपि वक्तुं न पार्यते । तथापि अग्निष्टोमपदघटितवाक्य-विहिताः विकृतिरूपाग्निष्टोमा एव प्रदर्शिताः । इतःपरं तै॰ सं सप्तमकाण्डे विहित षड्रात्र सप्तरात्रादि-क्रतुषु तत्तदहर्विशेषतया विहिताः । अग्निष्टोमा अपि परम्परया ज्योतिष्टोमोऽग्निष्टोमप्रकृतिका एवेति तेऽप्यत्र प्रदर्श्यन्ते । यद्यपि "गणेषु द्वादशाहस्य" इति जैमिनिसूत्रानुसारेण पञ्चरात्र-षड्रात्र-अहीनसत्रात्मकाः उभयविधा अपि क्रतवः द्वादशाहप्रकृतिकाः । तथापि द्वादशाहान्तर्गत अग्निष्टोम उक्थ्यादयः संस्थारूप॰ अग्निष्टोम -उक्थ्यादीनां विकृतयः । अतः परम्परया पञ्चरात्र-षड्रात्राद्यन्तर्गत अग्निष्टोम उक्थ्यादयः संस्थारूप अग्निष्टोम उक्थ्यादिप्रकृतिका इति वचनमुपपन्नमेव ।

ननु द्वादशाहः अहीनात्मकः सत्रात्मकश्चेति द्विरात्रप्रभृति एकादशरात्रपर्यन्तं सर्वे क्रतवः अहीनात्मकाः द्वादशरात्रप्रभृति सहस्रसंवत्सरपर्यन्तं क्रतवः सत्रात्मका इत्यपि मीमांसाशास्त्रे सिद्धान्तः कृतः खलु । कुतः पञ्चरात्रषड्रात्रादि अहीनसत्रात्मकेषु इति वचनं कथं सुसम्पन्नम् एकादशरात्रपर्यन्तम् ? "य एवं विद्वाँस षड्रात्रमासते" इति श्रुतौ आसत इति पदलिङ्गात् अयं षड्रात्रः सत्रात्मकः इति वेदभाष्ये स्पष्टमभिहितम् । अतः क्वचित् षड्रात्रादीनामपि सत्रात्मकत्वमस्तीत्युररीकर्तव्यम् ।

ननु कैश्चित्त्रिस्रः संस्था॰ कैश्चिच्चतस्रः संस्था इत्युक्ते सति स प्रकारः सत्याषाढः कुतः अग्निष्टोम "उक्थ्यषोडशी" इत्यादिसूत्रेण पञ्चसंस्था जग्राह ? इत्याशङ्क्य व्याख्याकारेण गोपीनाथभट्टमहोदयेन एताः संस्थाः प्रकृतिसंस्था इत्यभिप्रायेणेति समाधानं वक्तुमग्निष्टोमः ज्योतिरादेरग्निष्टोमस्येत्यादिना विवृतम् । यथा प्रकृतिरूपः अग्निष्टोम एकाहः विकृतिरूपा ज्योतिरादयः एकाहाः अतस्तेषां स प्रकृतिर्भवतु । अहर्गणेषु विद्यमानानां अग्निष्टोम उक्थ्यादीनां गणेषु द्वादशाहस्य इत्यनेन सूत्रेण द्वादशाहाद्यहर्गण एव प्रकृतिर्भवति । न तु एकाहरूप अग्निष्टोमादय इति चेदुच्यते । तत्तद्गणेषु गणत्वेन तत्तद्गणधर्माणाम् अतिदिष्टानामपि राजसूयान्तर्गत अभिषेचनीयादिषु ज्योतिष्टोमादि धर्माणामिव तत्तद्गणान्तर्गता-

ग्निष्टोम-उक्थ्यादीनां प्रातिस्विकतया कथंभावाकांक्षायां सत्यां नाम्ना अग्निष्टोम उक्थ्यादिसंस्थाधर्माणामतिदेशस्सिध्यति। तथा हि- मी· शास्त्र-दीपिकायाम् 7 4-3 अधिकरणे एवं विचारितम्। गवामयनाख्यसत्रयागे ज्योतिर्गौरायुराख्या रात्रिसंज्ञकाः त्रयो यागा विहिताः। तेषु गणेषु द्वादशाहस्येति द्वादशाहिकाः कर्तव्याः चोदकं बलवानिति उत नामबलीयस्त्वात् ऐकाहिका वा इति संशये गवामयनं हि द्वादशाहप्रकृतिरिति वक्ष्यति। अतः तत्सम्बन्धिलिङ्गेन तदीयधर्मप्रापकः चोदकः अनुमीयत इति प्राप्ते अभिधीयते। प्रत्यक्षं श्रूयते नाम, चोदकस्तु आनुमानिकः। यद्यपि फलसंबन्धोत्तरकाले इतिकर्तव्यताकांक्षा, तथापि गवामयनत्वेन रूपेण इतिकर्तव्यताकांक्षायां गणधर्मा अतिदिष्टा अपि तत्तद्यागोत्पत्तिवाक्येषु भावनास्वाभाव्यात् इतिकर्तव्यताकांक्षायां नाम्नः आनुमानिकचोदकात्प्रबलत्वात् प्रत्यक्षेण नाम्ना एतेषु ज्योतिरादिषु ऐकाहिकी इतिकर्तव्यता ग्राह्येत्युक्तम्। तेनैव न्यायेनेदानीं संस्थारूप अग्निष्टोमादयः प्रकृतय इति युक्तमेवेति तद्विवरणं कृतम्।

त्रिवृदग्निष्टोमः

19. प्रकृतमनुसरामः पञ्चरात्राद्यन्तर्गत अग्निष्टोमादयोऽपि अग्निष्टोमत्वेन रूपेण अस्यां पट्टिकायां निर्दिश्यन्ते। तथाहि त्रिवृदग्निष्टोमः अयमग्निष्टोमः तै· सं· 7-1-10, संवत्सरो वा इदमेक आसीत्सोऽकामयत इत्यस्मिन्ननुवाके पञ्चरात्रयागः अहीनाख्ये विहितः। "य एवं विद्वान् पञ्चरात्रेण यजते प्रैव जायते" इति फलश्रुत्या प्रजाकामेन अयं पञ्चरात्रयागः कर्तव्य इति। "य एवं विद्वान् पञ्चरात्रेण यजते विपाप्मना भ्रातृव्येणावर्तते" इति फलश्रुत्या पापव्यावृत्तिकामेनाप्ययं यागः कर्तव्य इति।

"य एवं विद्वान्पञ्चरात्रेण यजते प्रवदितैव वाचो भवति" इति फलश्रुत्या सभायां प्रकर्षेण वक्तुकामेनाप्ययं यागः कर्तव्य इत्युक्तम्। अस्मिन्यागे तत्तदहर्विशेषवचनप्रसङ्गे "त्रिवृदग्निष्टोमो भवति" इति प्रथमेऽह्नि त्रिवृदग्निष्टोमः कर्तव्यतया विहितोऽग्निष्टोमसंस्थाकः प्रकृतौ हि त्रिवृत् पञ्चदश सप्तदश एकविँशश्चतुर्भिस्तोमैः द्वादश स्तोत्राणि ष्पद्यन्ते। अत्र तु एकेनैव त्रिवृत्स्तोमेन सर्वस्तोत्रनिष्पत्तिः कर्तव्या। त एवायं त्रिवृदग्निष्टोम इत्युच्यते। अयमप्यग्निष्टोमप्रकृतिकः।

20. पञ्चविँशोऽग्निष्टोमः

अयमपि पूर्वोक्तं पञ्चरात्रयागे चतुर्थेऽह्नि केवलं पञ्चदशस्तोमेनैव सर्वस्तोत्रनिष्पत्तिपूर्वक अग्निष्टोमसंस्थाकः कर्तव्यः । अत्र तु पूर्वोक्तयागापेक्षया कश्चन विशेषोऽस्तीति ज्ञापयितुं महाव्रतवानन्नाद्यस्यावरुध्यै इत्युक्तम्। महाव्रताख्ये कर्मणि केचित्सामविशेषाः प्रयोगविशेषाश्च तै॰ सं॰ 7-5-8 "देवा वा अन्तं जग्मुषां" इत्यस्मिन्ननुवाके उक्ताः तत्रैव द्रष्टव्याः ।

21. त्रिणवोऽग्निष्टोमः

"त्रिणवावग्निष्टोमौ" इत्यनेन दशरात्रक्रतौ सप्तमनवमयोरह्नोः त्रिणवस्तोमसाध्यः अग्निष्टोमसंस्थः विहितः । तै॰ सं॰ 7-2-5.

ननु षड्रात्रसप्तरात्रादि क्रतुष्वपि पञ्चदश सप्तदश एकविँशत्रिणवादिशब्दैः तत्तत्क्रतव एव उच्यन्ते॰ न त्वग्निष्टोमादिरूपेण ।

त्रिवृदग्निष्टोमः सप्तदशोग्निष्टोमः एकविँशोऽग्निष्टोमः पञ्चविँशोऽग्निष्टोमः त्रिणवावग्निष्टोमौ भवतः, इत्यादिवाक्यगृहीता एव अग्निष्टोमादयः विशेषाकारेण गृह्यन्त इति चेदुच्यते । अहीनसत्रयागादिप्रकरणेषु पञ्चदश सप्तदश पदान्येव श्रूयन्ते । तथापि तत्तत्पदश्रवणमात्रेण तत्तत्पदवाच्योऽग्निष्टोम इति वा उक्थ्य इति वा निर्णेतुं न शक्यते किन्तु पञ्चरात्रादीनां प्रकृतिभूतद्वादशाहे एवं श्रूयते ज्योतिः पक्षां वेद ज्योतिषा भासा सुवर्गं लोकमेति यावग्निष्टोमौ तौ पक्षौ योऽन्तरेष्टावुक्थ्यास्स आत्मा" इत्यनेन प्रायणीयातिरात्र-उदयनीयातिरात्रद्वयं विहाय मध्ये विद्यमानदशरात्रस्य पक्षिरूपत्वं वक्तुं तस्य पक्षिण उभयतः विद्यमानावग्निष्टोमौ पक्षाविति मध्ये विद्यमानाः अष्टावुक्थ्या इति स्पष्टतया "अष्टावुक्थ्या" इत्यनया श्रुत्या कथ्यन्ते । अपि च अग्निष्टोमसहित अतिरात्रमुभयतः "यावतिरात्रौ तौ पक्षौ" इत्यनेन स्वीकृत्य "योऽन्तरेष्टावुक्थ्यास्स आत्मा" इत्यनेनापि मध्ये विद्यमाना अष्टावुक्थ्या इति स्पष्टीकृतम् ।

एवमेव तां॰ ब्रा॰ "अथ ज्योतिरथ गौरथायुः" इत्येकाहाः॰ "अथैष ज्योतिरथैष सर्वज्योतिरथैष विश्वज्योतिः" इति साहस्राः विहिताः ते आग्न-

ष्टोमसंस्था इति वा उक्थ्यसंस्था इति वा किमपि नोक्ताः । तथापि तत्तत्प्रकरणेषु श्रुत्यैव प्रदर्शितस्तोमकल्पप्तिप्रकारं तत्र तत्र सूत्रकारप्रोक्तस्तोमकल्पप्तिप्रकारं चाश्रित्य श्रीसायणाचार्यैः अग्निष्टोमसंस्थाकः उक्थ्यसंस्थाकः अतिरात्रसंस्थाक इति व्याख्यातमिति यत्र विधिवाक्य एव "त्रिवृदग्निष्टोमः सप्तदशोऽग्निष्टोमः पञ्चविंशोऽग्निष्टोमः, त्रिणवावग्निष्टोमौ" इति स्पष्टतया तत्तत्संख्यावाचकपदानि श्रूयन्ते । तत्र तथैवेत्यवगन्तव्यम् । अस्मिन्प्रसङ्गे अयमपि विशेषः तत्र तत्र श्रुत्या बोधितत्वेन सायणभाष्यपर्यालोचनया च अस्माभिरवगन्तव्यः । यथा दशरात्रप्रकरणे तै. सं 7.2–5 "प्रजापतिरकामयत प्रजायेयेति स एतं दशहोतारमपश्यत्" इत्यस्मिन्ननुवाके तत्तदर्हविशेषोक्तप्रसङ्गे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमः "सप्तदशोऽग्निष्टोमः प्रजापत्यासूपहव्यः" इत्यादिष्वग्निष्टोमपदस्य श्रूयमाणत्वेऽपि एतदर्हविशेषाः प्रकृतितः प्राप्ताः, तत्र एते उक्थ्यसंस्थाका इति, अतोऽत्रापि यद्यपि उक्थ्या एव, तथाप्यत्राग्निष्टोम उच्यत इति सोऽयमवान्तरविशेषः उक्थ्ये विद्यमान अग्निष्टोमातिरिक्तस्तोत्रत्रयं परित्यज्य तद्रहितद्वादशस्तोत्रैः अग्निष्टोमता सम्पादनीयेति सूचयितुमेव अग्निष्टोमपदं प्रयुक्तवान् ।

भगवत्स्वरूपो वेदः

किञ्च तां. ब्रा. भगवत्स्वरूपो वेदः तीव्रसोम उक्थ्यसंस्थ इति, उपहव्यः अग्निष्टोमसंस्थ इत्युक्तत्वात् स्वतन्त्रतया तत्तत्क्रत्वनुष्ठानसमये तदुक्तरीत्या अनुष्ठेयं इति व्यवस्थापनीयम् । एतावता अग्निष्टोमः ज्योतिरादेरग्निष्टोमस्य प्रकृतिरिति गोपनीथभट्टव्याख्यानपङ्क्तेः विवरणावसरे आदिशब्देन सूचिताः बहवः अग्निष्टोमाः सप्रमाणं निरूपिताः, इतःपरं उक्थ्यः गवादेरुक्थ्यस्य प्रकृतिरिति वाक्यं विव्रियते ।

गवाख्य उक्थ्यः

ताण्ड्यब्राह्मणे "अथ एकाहाः उच्यन्ते" इति प्रथमतः ज्योतिर्नामक एकाहः अग्निष्टोमसंस्थाक इत्युक्त्वा, अथैष गौः इति गव्यनामक एकाहः उक्तः ।

एष एव गोष्टोम इत्युच्यते 16-2-1 अत्र स्तोमकल्पिरेवमुक्ता। यत्पञ्चदशं बहिष्पवमानं भवन्ति त्रिवृन्त्याज्यानि,सप्तदशं माध्यन्दिनं सवनं एकविंश तृतीयसवनं, उक्थ्यसंस्थोह्ययम् 16-2-7 प्रकृते बहिष्पवामनं त्रिवृत्स्तोमकं अत्र पञ्चदशस्तोमकं अनेन पञ्चदश स्तोत्रीया भवन्ति। आज्यस्तोत्राणि प्रकृते पञ्चदशस्तोमकानि अत्र त्रिवृत्स्तोमकानि। अनेन चत्वार्याज्यानि त्रिवृत्स्तोमेन षट्त्रिंशस्तोत्रीया भवन्ति। माध्यन्दिनपवमानं प्रकृते पञ्चदशस्तोमकं अत्र सप्तदशस्तोमेन सप्तदशस्तोत्रीया भवन्ति। चत्वारि पृष्ठानि प्रकृतावत्रापि सप्तदशस्तोमकानि।

अनेन आहृत्य सप्तदशस्तोमेन- अष्टषष्टिस्तोत्रीया भवन्ति। तृतीयसवने आर्भवपवमानं प्रकृतौ सप्तदश स्तोमकं अत्र एकविंशस्तोमकं एकविंश अग्निष्टोमस्तोत्रं प्रकृतावत्रापि तुल्यमेव। अनेन एकविंशस्तोत्रीया भवन्ति। उक्थ्यस्तोत्रं प्रकृतौ पञ्चदशस्तोमकम्। अत्र एकविंशस्तोमकमित्यनेन आहृत्य त्रिषष्टिस्तोत्रीया भवन्ति।

आहृत्य एकचत्वारिंशदूनरद्विशतस्तोत्रीया भवन्ति। "दशाक्षरा विराडिति" विराट्संख्यया विभाज्यमाने सति एका स्तोत्रीया अतिरिक्ता भवति।

"एकया गौरतिरिक्तः" इति श्रुत्या गोष्टोमलक्षणमुपपन्नं भवति। एतं मनसि निधाय उक्तोऽयं गवाख्यः उक्थ्यसंस्थः इति।

अथैष आयुः उक्थ्यसंस्थो ह्ययमिति आयुरुक्थ्यः"आयुष्काम्येन यज्ञेन सुवर्गकामो यजेते"ति स्वर्गकामोऽत्र अधिकारी। अत्र स्तोमकल्पिमाह- ऊर्ध्वा स्तोमायन्त्यनपभ्रंशाय इति (16-3-4) [अत्र गवाख्य एकाहापेक्षया ऊर्ध्वाः ऊर्ध्वगामिन त्रिवृत्पञ्चदशादिक्रमेण तत्तत्स्तोत्रोत्तरमधिकसंख्यां प्राप्ताः स्तोमाः यान्ति गच्छन्ति। सवनत्रये संबध्यन्ते पूर्वत्र हि पञ्चदशस्तोमः बहिष्पवमाने आज्येषु त्रिवृत् इत्युक्तम्। अत्र आयुराख्ये एको हि बहिष्पवमाने त्रिवृत्स्तोमः आज्येषु पञ्चदश, शिष्टं गोष्टोमवत्। एवमूर्ध्वा

अभिमुखा एव स्तोमा भवेयुः । तच्च अनपभ्रंशाय अपभ्रंशाभावाय च भवति । अत्र बहिष्पवमानं त्रिवृत्स्तोमं इत्यनेन नवस्तोत्रीयाः, आज्येषु पञ्चदशस्तोत्र इत्यनेन षष्टिस्तोत्रीयाः, माध्यन्दिनपवमानं सप्तदशस्तोम इति सप्तदशस्तोत्रीयाः, अग्निष्टोमस्तोत्रमप्येकविँशस्तोत्रीयाः, चतुर्षु पृष्ठस्तोत्रेषु सप्तदशस्तोम इति अष्टोत्तरषष्टिस्तोत्रीया ।

आर्भवपवमानं एकविँशस्तोम इति एकविंशस्तोत्रीया अग्निष्टोमस्तोत्रमप्येकविंशस्तोम इति एकविंशस्तोत्रीया उक्थ्यस्तोत्राण्यपि एकविंशस्तोम इति त्रिषष्टिस्तोत्रीयाः आहृत्य नवपञ्चाशदुत्तरद्विशतस्तोत्रीया भवन्ति ।

"दशाक्षरा विराडिति विराट्संख्यया विभज्यमाने सम्पूर्णविराट्सम्पत्तेः एका स्तोत्रीया न्यूना भवति "एकयायुरूनः""आयुर्लक्षणं सम्पन्नम् ।

3. सप्तदश उक्थ्यः इत्यनेन तीव्रसोमनामकः ।

4. "अथैष विश्वज्योतिरुक्थ्यः" इत्यनेन चत्वारः ये साहस्रनामका एकाहा उक्तास्तेषां मध्येऽयं तृतीयसाहस्र एकाहः उक्थ्यसंस्थ उक्तः । 6-10-1.

5. तां. बा. 19-16-1 "अथैष इन्द्रस्तोम उक्थ्यः" इति सोऽयं क्रतुः सर्वेष्वपि स्तोत्रेषु पञ्चदशस्तोमयुक्तः । उक्थ्यस्तोत्रैरुपेतत्वात् उक्थ्यरूपसंस्थः इन्द्रस्य इष्टत्वात् इन्द्रस्तोमनामक इति ।

एतावता तां ब्राह्मणे स्वतन्त्रतया विहिता उक्थ्याः एकाहाः काम्याः निरूपिताः । इतःपरं पञ्चरात्रषड्रात्राद्यहर्गणेषु विहिताः पञ्चदशोक्थ्यः सप्तदशोक्थ्यः इत्यादयः विधीयन्ते । तथा हि- तै. स 7,2-1,2. 3, अनुवाकेषु षड्रात्र-सप्तरात्र-अष्टरात्र क्रतुसम्बन्धिन अहर्विशषा उक्ताः । तत्र द्वितीयमहः ।

पञ्चदशोक्थ्यः

6. "पञ्चदशो भवति" इत्यनेन पञ्चदशस्तोमसाध्यसर्वस्तोत्रयुक्तः उक्थ्यसंस्थो ह्ययम् । अतः पञ्चदश उक्थ्य इत्युच्यते ।

7. "अत्यग्निः सप्तदशो भवति" इत्यनेन सप्तदशोक्थ्य-स्सर्वोऽपि सप्तदशस्तोमयुक्तः। द्वादशाहविकृतित्वात्तदन्तर्गत-उक्थ्यस्संस्थो ह्ययम्। अतः सप्तदश उक्थ्य इत्युच्यते। "एकविँशः षोडशीति षोडशि संस्थो ह्ययम्। द्वादशाहान्तर्गतपृष्ठ्यषडहक्रमः एवम्। त्रिवृदग्निष्टोमो रथन्तरसामा एक.। पञ्चदश उक्थ्यो बृहत्सामा द्वितीयः। सप्तदश उक्थ्यो वैरूपसामा तृतीयः। एकविँशष्षोडशो वैराजसामा चतुर्थः। त्रिणव उक्थ्यः शाक्वरसामा पञ्चमः। त्रयस्त्रिँश उक्थ्यो रैवतसामा षष्ठः। तेन क्रमेण पञ्चदश उक्थ्यो बृहत्सामा।

8. "त्रिणवो भवति विजित्यै" इत्यनेन केवलत्रिणवस्तोमयुक्तः पञ्चममहः। द्वादशाहविकृतित्वात् उक्थ्योऽयं त्रिणवोक्थ्य इत्युच्यते।

9. षष्ठमहः "त्रयोस्त्रिँशो भवति प्रतिष्ठित्यै" इत्यनेन केवल-त्रयस्त्रिँशस्तोमयुक्तः। द्वादशाहविकृतित्वात् उक्थ्यः। अतः त्रयस्त्रिँशो उक्थ्य इत्युच्यते। एवमेव तै. सं 7.2-6 ऋतवो वै प्रजाकामाः इत्यस्मिन्ननुवाके एकादशरात्र उक्तः।

10. तस्मिन्प्रसङ्गे अष्टममहः चतुर्विँशो भवति इति।

"चतुर्विशत्यक्षरा गायत्री गायत्रं ब्रह्मवर्चसम्" इत्यनेन चतुर्विंश-स्तोमयुक्तः उक्थ्य इत्युच्यते।

11. नवममहः "चतुश्चत्वारिंशो भवति" इत्यनेन चतुश्चत्वारिँश स्तोमसाध्यः चतुश्चत्वारिंशोक्थ्य इत्युच्यते।

12. "दशममहः अष्टाचत्वारिँशो भवति" इत्यनेन अष्टाचत्वा-रिंशस्तोमसाध्यः अष्टाचत्वारिंशोक्थ्य इत्युच्यते।

नन्वत्र चतुर्विंशो भवति। चतुश्चत्वारिंशो भवति अष्टाचत्वारिंशो भवतीत्येवोक्तम्। उक्थ्यस्तोत्राणि त्रीणि तथा भवन्तु। सर्वाण्यपि स्तोत्राणि तेनैव स्तोमेनेति कथमुच्यत इति चेत् गवामयनप्रसङ्गे 5-1

"गावो वा एतत्सत्रमासत" इत्यस्मिन्ननुवाके "चतुर्विंशः प्रायणीयो भवती" त्यत्र सायणाचार्यैरेवं व्याख्यातम् ।

"यदेतदारम्भणीयमहः तदेतत्पूर्वोक्तात् ज्योतिष्टोमो वैश्वानरो त्रिरात्रो भवति ।" इत्युक्तातिरात्रादुत्तरभावित्वेऽपि वक्ष्यमाणेभ्यः अभिप्लवषडह्नावृत्तिरूपेभ्यः मासेभ्यः प्रथमभावित्वात् प्रायणीय इत्युच्यते । स च अहर्विशेषः चतुर्विंशस्तोमयुक्तः कार्यः तथा सति संख्यासाम्यात् अर्थमासद्वारा संवत्सरस्संपद्यते । तत्सम्पत्तौ सत्यां प्रारम्भमाणा एव यजमानाः संवत्सरसत्रानुष्ठाने स्थिरा भवन्ति ।

किञ्च एतस्याह्नः उक्थ्यरूपत्वात् उक्थ्यस्य च पञ्चदशस्तोत्रयुक्तत्वात् एकैकस्मिन् स्तोत्रे चतुर्विंशतिसंख्याकास्वृक्षु स्तोत्रीयासु सतीषु मिलित्वा षष्ठ्युत्तरशतपरिमिताः स्तोत्रीया भवन्ति ।

एवं सति संवत्सरस्य यदिदं चतुर्विंशत्यर्धमासात्मकं रूपं यच्च षष्ठ्युत्तरशतत्रयं रात्र्यात्मकं रूपं ते उभेऽपि रूपे सख्यासाम्येन प्राप्नुवन्ति इत्यनेन चतुर्विंशो भवतीत्यत्र केवलचतुर्विंशस्तोमसाध्यः उक्थ्यः इति, तेनैव न्यायेन चतुश्चत्वारिंशः अष्टचत्वारिंशो भवतीत्यत्रापि तथैवेत्यवगन्तव्यम् ।

एकविंशोक्थ्यः

13. दशरात्रक्रतुप्रसङ्गे "प्रजापतिरकामयत प्रजायेयेति स एतं दशहोतारमपश्यत्" तै. सं. 7-2-5 इत्यस्मिन्ननुवाके । त्रिककुद्वा एष यज्ञो यद्दशरात्रः इति" अस्य क्रतोः त्रिककुत्वमेवमुपपादितम् । ककुत्पञ्चदशः, ककुदेकविंशः ककुत्त्रयस्त्रिंश इत्यनेन ककुत्स्थानीयाः पञ्चदश सप्तदश एकविंशोक्थ्या इत्युक्ताः । अनेन एकविंशोक्थ्या इत्यपि विद्यत इति स्पष्टं प्रतीयते ।

ज्योतिरुक्थ्यः

14. तथा हि गवामयने षष्ठे मासि सप्तविंशति दिवसे विश्वजिदग्निष्टोममनुष्ठाय तन्मासपूरणार्थं परस्सामाख्या उक्थ्याः सप्तदशस्तोम-

साध्यसर्वस्तोत्रयुक्ताः तिस्रः कर्तव्याः तदनन्तरं विषुवन्नामकाहः तदुत्तरं सप्तममासस्यादौ दिवसत्रये परस्सामाख्या उक्थ्या सप्तदशस्तोमसाध्यसर्वस्तोत्रयुक्ताः तिस्रः कर्तव्याः । ततः अभिजिदग्निष्टोमः इत्येवं क्रम इति "विश्वजिदभिजितावग्निष्टोमौ उक्थ्यास्सप्तदशाः परस्सामानः" इति श्रुत्या कथिताः ।

यद्यपि संस्थारूप उक्थ्ये अग्निष्टोमान्तं त्रिवृत् पञ्चदश-सप्तदश-एकविंशस्तोमसाध्यानि द्वादशस्तोत्राणि सम्पाद्य तत उक्थ्यस्तोत्राणि त्रीणि पञ्चदशस्तोमेन साध्यानि । तथापि अत्र सर्वाण्यपि स्तोत्राणि सप्तदशस्तोमसाध्यानि । अत एव "उक्थ्यास्सप्तदशाः परस्सामानः" इत्युक्तम् ।

किञ्च अभिप्लवषडहाः पृष्ठ्यषडहत्वेन सम्पद्यन्ते । यद्यपि गवामयने अभिप्लव षडहविधानप्रसङ्ग "सँ स्थित्या अरिष्ठया उत्तरैरहोभिश्चरन्ति" तै. सं. 7-5-1 इत्यादिना अभिप्लवषडहविधानमुक्तम् । अभिप्लवषडहक्रमः एवमुक्तः । "ज्योतिर्गौरायुः" इति अनुलोमेन दिवसत्रयम् । "पुनरायुर्गौर्ज्योतिरिति प्रतिलोमेन दिवसत्रयमनुष्ठेयम् । तत्र सर्वेष्वहस्सु पृष्ठस्तोत्रे सामैक्यं विधत्ते । "समानँ साम भवति" इति पुनरस्मिन्नेव प्रपाठके तृतीयानुवाके अपवादतया अत्र विशेषाकारेण विधत्ते । "समुद्रं वा एनेऽनवारमपारं प्लवन्ते ये संवत्सरमुपयन्ति यद्बृहद्रथन्तरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक्तदनुत्सर्गं बृहद्रथन्तराभ्यामित्वा प्रतिष्ठां गच्छन्ति "तत्र एवं भाष्ये पारावारे=परावाचीतीरे । ये यजमानाः संवत्सरसत्रमनुतिष्ठन्ति एते तीरद्वयसहितं समुद्र बाहुभ्यां तरितुमिच्छान्त तच्चाशक्यम् । यदि तत्र बृहद्रथन्तरे सामनी अनुक्रमेण पृष्ठस्तोत्रे सम्पादयेयुः तदानीं यथा समुद्रस्य मध्ये तरणसाधनं प्लवं सम्पादयेयुः तादृक्तद्भवति तस्मादनुत्सर्गं कदाचिदपि अपरित्यज्य बृहद्रथन्तराभ्यामित्वा स्तोत्रं प्राप्य प्रतिष्ठां यज्ञसमाप्तिं गच्छतीति । एवं च उदाहृतश्रुतिभाष्याभ्यां अयमर्थः प्रतीयते । ज्योतिर्गौरायुः आयुर्गौर्ज्योतिरिति अनुलोम-प्रतिलोमाभ्यां अभिप्लवषडहस्सम्पादनीय इति । तेषु सर्वेष्वप्यहस्सु एकमेव पृष्ठस्तोत्रे बृहदेव वा

रथन्तरमेव वा गायेदिति "समानँ साम भवति" इति प्रथमतः उक्त्वा तदपवादतया बृहद्रथन्तरे सामनी अनुक्रमेण पृष्ठस्तोत्रे सम्पादयेयुरित्युक्तम् तत्र सामद्वयं एवं योजनीयम् । प्रथमदिवसे रथन्तरं द्वितीयदिवसे बृहत्साम-तृतीयदिवसे रथन्तरं, चतुर्थदिवसे बृहत्, पञ्चमदिवसे रथन्तरं, षष्ठदिवसे बृहत् इत्येवं अभिप्लवषडहानुष्ठानक्रमः । तथापि यदा अभिप्लवषडहा एव पृष्ठ्यषडहत्वेन सम्पाद्यन्ते तदा पृष्ठ्यषडहक्रमः अनुसरणीयः पृष्ठ्यषडहक्रमस्त्वेवं प्रथमतः रथन्तरं, ततो बृहत्, ततो वैरूपं, ततो वैराजं, ततः शाक्वरं, ततः रैवतं साम, यदा अभिप्लवषडहे पृष्ठ्यषडहक्रमेण पृष्ठ्यस्तोत्राणि क्रियन्ते तदा अभिप्लव-षडह एव पृष्ठ्यषडह इत्युच्यते । तदेवोक्तं श्रुतौ "यत्परँ राथन्तरं तत्प्रथमेऽह्नि कार्यम् । बृहद्द्वितीये । वैरूपं तृतीये । वैराजं चतुर्थे । शाक्वरं पञ्चमे । रैवतँ षष्ठे । तदु पृष्ठेभ्यो नयन्ति" इति । तदु=तेनैव प्रकारेणेत्यर्थः ।

किञ्च पृष्ठ्यषडहे अन्योऽपि विशेषोऽस्ति । प्रथमेऽह्नि त्रिवृदग्निष्टोमः, द्वितीये पञ्चदशोक्थ्यः, तृतीये सप्तदशोक्थ्यः । चतुर्थे एकविँशषोडशी, पञ्चमे त्रिणवोक्थ्यः, षष्ठे त्रयस्त्रिँशोक्थ्यः । रथन्तरादिक्रमेण षट्-पृष्ठस्तोत्राणि अयं पृष्ठ्यषडहः । अत्र तु ज्योतिर्गौरायुरिति, आयुर्गौर्ज्योतिरिति अनुलोमप्रतिलोमक्रमेण सम्पादितषषडहः सप्तदशस्तोमयुक्तः बृहद्रथन्तरादिपृष्ठसामषट्कसाध्य उक्थ्या एव कार्या इत्युक्तत्वात् ।

एत एव ज्योतिर्गौरायवः आनुलोम्येन त्रिकद्रुकत्वेन यद्यनुतिष्ठेयुः तदा ज्योतिरग्निष्टोमः गौरुक्थ्य आयुरुक्थ्य इत्युच्यन्ते । तदेवोक्तं तै. सं 7-2-4 प्रजापतिः प्रजा असृजत तास्सृष्टाः क्षुधन्यायन् स एतं नवरात्रमपश्यत् । इत्यस्मिन्ननुवाके नवरात्रक्रतुप्रसङ्गे "ज्योतिर्गौरायुरिति ज्ञातास्तोमा भवन्ति" इति । अत्र सा-भा. ज्योतिरादिशब्दत्रयपूर्वकाः स्तोमशब्देन अभिधीयमानाः सामगैस्सर्वैः ज्ञातास्त्रयः अहर्विशेषाः कर्तव्या इत्युक्तम् । अनेन प्रथमदिवसः अग्निष्टोमसाम्ना समापनीयः द्वितीयदिवसः तीयदिवसश्च उक्थ्यसंस्थाकः कार्य इत्युक्तं भवति । अयमेव क्रमः गवामयनप्रकरणे "ज्योतिष्टोमं प्रथममुपयन्ती" त्यस्मिन्ननुवाके उक्तम् । एतावता

ज्योतिरादीनां त्रिकद्रुकत्वेन गवामयने पृष्ठ्यषडहत्वेन च अनुष्ठानसमये तत्र अभिप्लव-षडहस्वरूपमेवम् । ज्योतिरायुर्गौरायुरिति आनुलोम्येन दिवसत्रयं आयुर्गौर्ज्योतिरिति प्रातिलोम्येन दिवसत्रयमनुष्ठेयमित्युक्तम् । तथा हि — ज्योतिष्टोमं प्रथममुपयन्ति गोष्टोमं द्वितीयमुपयन्ति, आयुष्टोमं तृतीयमुपयन्तीत्यनेन प्रथमे दिवसे ज्योतिष्टोमोऽग्निष्टोमः कार्य इति। एवमेव अभिप्लवषडहस्य उत्तमदिवसेऽपि ज्योतिष्टोमोऽग्निष्टोमः मध्ये चत्वारः गौरायुः आयुर्गौराख्या उक्थ्यसंस्थाका इति "अग्निष्टोमावभितः प्रधी तौ उक्थ्यामध्ये नभ्यमिति" श्रुत्या स्पष्टमुक्तम् । प्रधी-नभ्य-शब्दयोः विवरणम् । लोके रथचक्रं फलकत्रयेण निष्पाद्यते । तत्र पार्श्ववर्तिनी प्रधी इत्युच्येते । प्रकर्षेण धीयते धार्यते मध्यफलकमाभ्यामिति प्रधीः । मध्यफलकं तु नभ्यमित्युच्यते नाभिस्थानीयत्वात् । एवं च सति अत्र चक्ररूपस्य अभिप्लवषडहस्य अभितः वर्तमानौ आद्यन्तदिवसयोरनुष्ठेयौ ज्योतिश्शब्दाभिधेयौ यावग्निष्टोमौ तावुभौ प्रधी । ये च मध्यवर्तिनः गौरादयः चत्वार उक्थ्यरूपाः क्रतवः ते सर्वे मिलित्वा मध्ये स्थितं नभ्यं भवति । अनेन अभिप्लव-षडहस्य आद्यन्तौ ज्योतिश्शब्दाभिधेयौ अग्निष्टोमात्मकाविति सिद्धम् । तथाप्यत्र यद्यपि परस्सामाख्येष्वहस्सु ज्योतिरादय एव अनुष्ठीयन्ते । तथापि "उक्थ्या एव सप्तदशाः परस्सामानः कार्या" इत्युक्तत्वात् अत्राद्यन्तौ ज्योतिश्शब्दवाच्यौ उक्थ्यसंस्थाकावेव । प्रथमतः रथन्तरं, ततो बृहत्, ततो वैरूपं, ततो वैराजं, ततः शाक्वरं, ततो रैवतम् इति । तान्येव पृष्ठस्तोत्राणि परस्सामाख्येषु उक्थ्येषु प्रथमे परस्साम्नि ज्योतिराख्ये पर्वणि रथन्तरसाम्ना निष्पाद्यं पृष्ठस्तोत्रम् गवाख्ये द्वितीये पर्वणि बृहत्साम्ना, तृतीये अयुराख्ये पर्वणि वैरूपसाम्ना, चतुर्थे आयुराख्ये पर्वणि वैराजसाम्ना, पञ्चमे गवाख्ये पर्वणि शाक्वरसाम्ना, षष्ठे ज्योतिराख्ये पर्वणि रैवतसाम्ना च निष्पाद्यं पृष्ठस्तोत्रम् इति ।

"यत्परँ राथन्तरम् । तत्प्रथमेऽहन्कार्यम् । बृहद्द्वितीये, वैरूपं तृतीये, वैराजं चतुर्थे, शाक्वरं पञ्चमे, रैवतँ षष्ठे तदु पृष्ठेभ्यो नयन्ति ।" इति

श्रुतिवाक्यैर्विहितम्। तदु=तेनैव प्रकारेण अनुतिष्ठन्तः एतान्यहानि पृष्ठेभ्यः पृष्ठषडहगतेभ्यः अहोभ्य उपरि नयन्ति। यद्यतानि ज्योतिरादीन्यभिप्लवषडहगतान्यहानि तथापि रथन्तरादिपृष्ठस्तोत्रयोगात् अभिप्लवषडहगतानि पृष्ठ्यषडहगतान्येव सम्पद्यन्ते।

एतावता त्रिकद्रुकाणां स्वरूपं अभिप्लवषडहस्वरूपं, पृष्ठ्यषडहस्वरूपं परस्सामाख्येष्वहस्सु अभिप्लवषडहस्य पृष्ठ्य षडहस्वरूपत्वेन सम्पादनप्रकारं च उक्तम्। अस्मिन्नेव प्रसङ्गे "उक्थ्याः परस्सामानः" इत्यने नाद्यन्तौ ज्योतिराख्यावुक्थ्यावित्युक्तमिति तेन ज्योतिराख्योऽप्युक्थ्यः विद्यत इत्यलमतिप्रसङ्गेन।

15 गोसवोक्थ्यः

"एष गोसवः षट्त्रिँश उक्थ्यो बृहत्सामा" तै. ब्रा. 2-7-6. सवप्रकरणे गौसव उक्तः। स तावत् षट्त्रिंशस्तोमसाध्यसर्वस्तोत्रयुक्तः उक्थ्यसंस्थो ह्ययम्।

एवं बहव उक्थ्यक्रतवः ह्युक्ताः। एषु मध्ये केचित् तां. ब्रा. स्वतन्त्रेण कर्तव्यतया उक्ताः। अन्ये केचित् अहीनसत्रात्मकाहर्गणेषु तत्तदहनि कर्तव्यतया विहिताः, इति तेऽप्यस्यां पट्टिकायां प्रदर्शिताः। अहर्गणेषु विहिताग्निष्टोमउक्थ्यादीनां, संस्थाभूताग्निष्टोमादयः प्रकृतयः उत अन्ये इत्यग्रे विचारयिष्यन्ते।

1. अथ षोडशी

वाजपेयादिषोडशिनः प्रकृतिरित्युक्तम् गोपीनाथभट्टैः। तस्यायमाशयो भविष्यति। अतिरात्रविरूपणावसरे केचित् अतिरात्राः, "अतिरात्रे षोडशिनं गृह्णाति" इति वचनात् केचित् षोडशिकाः "नातिरात्रे षोडशिनं गृह्णाति" इति वचनात् केचिदतिरात्राः अषोडशिकाश्च वक्ष्यन्ते। षोडशिस्तोत्रोत्तरं यदि रात्रिपर्यायनामकस्तोत्राणि क्रियन्ते, तदा स क्रतुः अतिरात्र इति, षोडशिस्तोत्रोत्तरं रात्रिपर्यायानकृत्वा वाजपेयस्तोत्रं क्रियेत स वाजपेय

इत्युच्यते । तथा च अतिरात्रेषु षोडशी विकल्पतया उक्तः । अतः सषोडशिकातिरात्रे सषोडशिकवाजपेये च षोडशिप्रकृतिधर्मा अतिदिश्यन्त इत्यभिप्रायेण वाजपेयादिषोडशिन इत्युक्तम् । अत्र आदिपदेन वहवः षोडशिनः विद्यन्त इति सूच्यते । तथा हि-षट्षोडशीति कश्चन व्रात्यस्तोमः विहितः ।

2. अथ षट्षोडशी

"अथैष षट्षोडशी ये नृशँसा निन्दितास्सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् ।" तां. ब्रा. 17-2-1

सा. भा. अथ=अनन्तरं एष वक्ष्यमाणो यज्ञः षट्षोडशी षट्षोडशस्तोमाः यस्य सः । नृशंसाः=निन्दिताः मनुष्यैरभिशंसनेन = पापाद्यारोपेण गर्हितास्सन्तः ये पुरुषाः व्रात्यां व्रात्यत्वं प्राप्य प्रवसेयुः । त एतेन यजेरन् । व्रात्यतादोषनिर्हरणार्थं कर्तव्यः षट्षोडशीनामको याग इत्यर्थः ।

3 एकविँशष्षोडशी

"पृष्ठ्यषडहेतुचतुर्थेऽह्नि एकविँशष्षोडशी"इति विहितः । तत्रापि षोडशिसंस्थाधर्मा एवातिदिश्यन्ते । अतोऽयमपि षोडशिसंस्थाप्रकृतिकः ।

एवमेव सत्रात्मक एकोनपञ्चाशद्रात्रक्रतुः "वसिष्ठो हतपुत्रोऽकाम्यत" तै. सं. 7-4-7 इत्यस्मिन्ननुवाके विहितः । तस्मिन्क्रतौ प्रथमतः त्रयः त्रिवृत्स्तोमयुक्ता अग्निष्टोमाः कार्याः । ततः दश पञ्चदशा भवन्तीति पञ्चदशस्तोमयुक्ताः दशसंख्याका अहर्विशेषाः कार्या इत्युक्त्वा दशमदिवसः "षोडशिमद्दशममहर्भवती"ति श्रुत्या षोडशिस्तोत्रयुक्तः कार्य इत्युक्तम् ।

किञ्च अस्मिन्क्रतौ अन्ते "बहवष्षोडशिनो भवन्ति" इत्यनेन पूरणार्थं यावन्तः अपेक्षिताः तावन्तः कर्तव्या इति बहुशब्दार्थ इति । अतोऽत्र त्रयाणामेवापेक्षितत्वात् त्रयष्षोडशिनः कर्तव्या इति भाष्ये विवृतम् । अतः अत्रापि षोडशिषु प्रकृतिषोडशिसंस्थाधर्माः अतिदिश्यन्त इति षोडशिसंस्थः अन्येषां षोडशिनां प्रकृतिरित्युक्तम् ।

अथातिरात्राः

"अतिरात्राः बहवो विद्यन्ते" सषोडशिकाः, अषोडशिकाश्च परस्परं स्तोमभेदाश्च वर्तन्ते" तथा हि — तां. ब्राह्मणे 20- अ खण्ड

1. ज्योतिष्टोमातिरात्रः

"ज्योतिष्टोमेनातिरात्रेणर्थिकामो यजेत" इति विधिः । 20-1-2. अस्य यागस्य स्तोमकल्पिमाह ।

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि, पञ्चदशो माध्यन्दिनः पवमानः, सप्तदशानि पृष्ठानि, सप्तदश आर्भवः, एकविँशोऽग्निष्टोमः, सोक्थ्यः पञ्चदशी रात्रिः त्रिवृत्सन्धिः" 20-1-1. बहिष्पवमानस्तोत्रं त्रिवृत्स्तोमेन चत्वार्याज्यानीत्यन्यत्र उक्तत्वात् आज्यस्तोत्राणि चत्वार्यपि पञ्चदशस्तोमेन माध्यन्दिनपवमानस्तोत्रमपि पञ्चदशस्तोमेन "चत्वारि पृष्ठानीति वचनात्" पृष्ठस्तोत्राणि चत्वारि आर्भवपवमानञ्च सप्तदशस्तोमेन अग्निष्टोमस्तोत्रं यज्ञायज्ञियमिति साम एकविँशस्तोमेन ततः उक्थ्यस्तोत्राणि त्रीण्यपि एकविँशस्तोमेन ततः रात्रिपर्यायात्मकद्वादशस्तोत्राणि पञ्चदशस्तोमेन, सन्धिस्तोत्रं तत्त्रिवृत्स्तोमेनेति कल्पितविशेषः, विष्टुतिविशेषः स्वतन्त्रः अग्निष्टोमादिसंस्थासु उक्त एव, अतोऽत्र नोच्यते । अत्र षोडशी नास्ति ।

2. सर्वस्तोमोऽतिरात्रः

"सर्वस्तोमेनातिरात्रेण बुभूषन्यजेत" 20-2-2 । यः ऐश्वर्यं प्राप्तुमिच्छति तेनायं यागः कर्तव्य इति विहितः । अस्य स्तोमकल्पिरेवमुक्ता । त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशो माध्यन्दिनः पवमानः एकविँशानि पृष्ठानि त्रिणव आर्भवः त्रयस्त्रिँशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थ्यानि, त्रिणवं प्रथमं द्वे एकविँशे सषोडशिके पञ्चदशी रात्रिः त्रिवृत्सन्धिः" 20-2-1 ।

अत्र बहिष्पवमानं, आज्यस्तोत्राणि, पूर्ववदेव। माध्यन्दिन पवमानस्तोत्रं सप्तदशस्तोमेन, पृष्ठस्तोत्राणि चत्वार्यपि एकविँशस्तोमेन, आर्भवपवमानं त्रिणवस्तोमेन, अग्निष्टोमस्तोत्रं त्रयस्त्रिँशस्तोमेन, उक्थ्यस्तोत्रेषु त्रिषु मध्ये प्रथमं स्तोत्रं त्रिणवस्तोमेन, द्वितीयं तृतीयन्तु एकविँशस्तोमेन, षोडशिस्तोत्रं पूर्वस्मिन्नतिरात्रे नास्ति । अस्मिन्षोडशिस्तोत्रं एकविँशस्तोमेन, रात्रिपर्यायात्मकानि द्वादशस्तोत्राणि पञ्चदशस्तोमेन, सन्धिस्तोत्र त्रिवृत्स्तोमेनेति विशेषः उक्तः ।

3. अप्तोर्यामातिरात्रः

"यस्मात् पशवो भ्रँशेरन् स एतेन यजेत" तां. ब्रा. 3-3-3 । "यस्मात् पशवः प्रप्रेव भ्रँशेरन् स एतेन यजेत" तै. ब्रा. 2-6-14 । पशवः गवाश्वादयः यस्मात्पुरुषात् प्रप्रेव अत्यन्तप्रकर्षेणैव भ्रष्टा अभवन् स एतेन क्रतुना इष्ट्वा भ्रंशान्निवार्य पशुसमृद्धि प्राप्नोति । पशुभ्रंशनिवारणपूर्वकपशुसमृद्धिकामः अत्र अधिकारीत्यर्थः । अस्य यागस्य स्तोमकल्पितमाह ।

'त्रिवृद्बहिष्पवमानं, पञ्चदशान्याज्यानि, सप्तदशो माध्यंदिनः पवमानः एकविँशगँ् होतुः पृष्ठं, छन्दोमा इतराणि, त्रिणव आर्भवः त्रयस्त्रिँशोऽग्निष्टोमः, प्रत्यवरोहिणीण्युक्थ्यानि। त्रिणवं प्रथमं, अथैकविँशं, अथ सप्तदशं, एकविँशष्षोडशी, पञ्चदशी रात्रिः, त्रिवृत्सन्धिः, त्रिवृत्प्रथमं, अतिरिक्तस्तोत्रं, अथ पञ्चदशमथ सप्तदशमथैकविँशम् ।"

अत्र बहिष्पवमान आज्यस्तोत्र, माध्यंदिनपवमानस्तोत्रेषु च पूर्ववदेव स्तोमकल्पितः पृष्ठस्तोत्राणि । होतृका इति सप्त ऋत्विजां व्यवहारो वर्तते । तेषां नामान्येतानि । होता, मैत्रावरुण, ब्राह्मणच्छगं्सी अच्छावाकः, आग्नीध्रः, नेष्टा, पोता, इति । तेषां मध्ये पृष्ठविभागः एवं वर्तते । होतुः पृष्ठं मैत्रावरुणपृष्ठं, ब्राह्मणच्छगँ्सिपृष्ठं अच्छावाकपृष्ठमिति चत्वारि पृष्ठानि तत्र होतुःपृष्ठे एकविँशस्तोमः । ततः मैत्रावरुणपृष्ठे च्छन्दोमनाम्ना व्यपदिश्यमानचतुर्विँशस्तोमः, ब्राह्मणच्छँसिपृष्ठे चतुश्त्वारिँशस्तोमः, अच्छावाक-

पृष्ठे अष्टाचत्वारिँशस्तोमः। एते स्तोमाः छन्दोभिः गायत्रीत्रिष्टुप्जगतीभिः अक्षरसंख्याद्वारा मीयन्ते परिच्छिद्यन्त इति छन्दोमा इत्युच्यन्ते। ततः आर्भवपवमाने त्रिणवस्तोमः, अग्निष्टोमस्तोत्रे त्रयस्त्रिंशस्तोमः, उक्थ्यस्तोत्रेषु मध्ये प्रथमस्तोत्रे त्रिणवस्तोमः, द्वितीयस्तोत्रे एकविँशस्तोमः, तृतीयस्तोत्रे सप्तदशस्तोमः, एवं विपरीतक्रमः यतः उच्यते, अत एव प्रत्यवरोहीण्युक्थ्यानीत्युच्यन्ते। षोडशिस्तोत्रे एकविँशस्तोमः। रात्रिपर्यायात्मकद्वादशस्तोत्रेषु पञ्चदशस्तोमः, सन्धिस्तोत्रे त्रिवृत्स्तोमः ततः अतिरिक्तस्तोत्राणि चत्वारि वर्तन्ते। तत्र प्रथमे त्रिवृत्स्तोमः, द्वितीये पञ्चदशस्तोमः, तृतीये सप्तदशस्तोमः, चतुर्थे एकविँशस्तोमः इत्येतावान् विशेषः अप्तोर्यातिरात्रे अत्र षोडशी अस्ति। किञ्च अतिरिक्तस्तोत्राणि चत्वारि

नवसप्तदशनातरात्रण प्रजाकामो यजेत इति विधिः —20-4-2 अस्य यागस्य स्तोमकल्पिमाह। "त्रिवृद्वहिष्पवमानं, पञ्चदश होतुराज्यं नवसप्तदशानि स्तोत्राणि। एकविँशोऽग्निष्टोमः सोक्थ्यः, पञ्चदशी रात्रिः, त्रिवृत्सन्धिः 20-4-1 अत्र होतुराज्यस्तोत्रे प्रकृतिवत्पञ्चदशस्तोमः, इतरेषु त्रिषु आज्यस्तोत्रेषु, माध्यन्दिनपवमाने चतुर्षु पृष्ठस्तोत्रेषु "आर्भवपवमाने च मिलित्वा नवसंख्याकस्तोत्रेषु सप्तदशस्तोमः अग्निष्टोमस्तोत्रे एकविँशस्तोमः उक्थ्यस्तोत्रेष् एकविँशस्तोमः रात्रिपर्यायात्मकद्वादशस्तोत्रेषु पञ्चदशस्तोमः, सन्धिस्तोत्रे त्रिवृत्स्तोमः, इति अत्र नवस्तोत्रेषु यतः सप्तदशस्तोमः विद्यते। अत एव नवसप्तदशातिरात्र इति नाम अत्र षोडशी वर्तते। अत्र अन्योऽपि विशेषो वर्तते। तृतीयसवनगत-आर्भवपवमाने "पवस्व मधुमत्तम" इति ककुच्छन्दस्का ऋग्वर्तते। तां ऋचं स्वस्थानादुद्धृत्य माध्यदिनपवमानगतां कुर्यात्। "तस्यामृचि" साकमश्वनामकं साम गेयम्। आर्भवपवमाने या ऋक् उद्धृता, तस्याः स्थाने "परिप्रधन्व" इत्येतां ऋचं पठेत्। तेन यज्ञस्योदरे पुरुषगर्भं

स्थापितो भवतीति–अत एवोक्तं –तां. ब्राह्मणे "ककुभं प्राचीमुद्वहति पुरुषो वै ककुप् गर्भो वा एष मध्यतो धीयते" 20-4-3 "तस्याँ साकमश्वम्" 20-4-4 "द्विपदां ककुभां लोके करोति गर्भमेव तद्धितं मध्यतः प्रजनयति" 20-4-7 ।

5. विषुवदतिरात्रः

"विषुवतातिरात्रेण ज्येष्ठं ज्यैष्ठिनेयं याजयेत्" इति विधिः 20-5-2,

अत्र स्तोमकल्पितमाह— "त्रिवृद्बहिष्पवमानं, पञ्चदशान्याज्यानि, पञ्चदशो माध्यंदिन पवमानः, सप्तदशानि पृष्ठानि, सप्तदश आर्भवः, एक विँशोऽग्निष्टोमः, सप्तदशान्युक्थ्यानि, पञ्चदशी रात्रिः त्रिवृत्सन्धि ,20-5-1 अत्र बहिष्पवमाने त्रिवृत्स्तोमः, आज्यस्तोत्रेषु चतुर्षु पञ्चदशस्तोमः, माध्यंदिनपवमाने पञ्चदशस्तोमः, पृष्ठस्तोत्रेषु चतुर्षु सप्तदशस्तोमः आर्भवपवमाने अग्निष्टोमस्तोत्रे एकविँशस्तोमः, उक्थ्यस्तोत्रेषु सप्तदशस्तोमः, रात्रिपर्यायेषु पञ्चदशस्तोमः, सन्धिस्तोत्रे त्रिवृत्स्तोमः । अत्र त्रिवृदादिसप्तदशान्तं आरोहक्रमः । ततः मध्ये अग्निष्टोमः ततः सप्तदशादि त्रिवृत्पर्यन्तमवरेहक्रमः । एवमुभाभ्यां आरोहावरोहक्रमाभ्यामवस्थितैस्तोमैः मध्ये विद्यमानस्य अग्निष्टोमस्य व्याप्तत्वात् विषु=व्याप्ताविति धातोरुत्पन्नः विषुशब्दः, तद्वानयं क्रतुः विषुवान् । एतदनुष्ठातापि विषुवानेव भवति । अत्र पुरस्तात्पश्चाच्च बहुभिः सेवकैर्व्याप्तः, पुरुषः विषुः, तादृशस्य पुरुषस्य स्वामी पुरुषः विषुवानित्यर्थः ।

यस्याः योषितः ज्येष्ठो भ्राता विद्यते सा ज्येष्ठिनी तस्याः ज्येष्ठिनीयः । तादृशानां यः ज्येष्ठः स ज्येष्ठः, ज्येष्ठिनीयश्च अधिकारी । अत्रापि षोडशी नास्ति ।

6. गोष्टोमातिरात्रः

"गोष्टोमेनातिरात्रेण भ्रातृव्यवान् यजेत 20-6-1 अस्य स्तोमकल्पितमाह – पञ्चदशं बहिष्पवमानं, त्रिवृत्याज्यानि,

माध्यन्दिनसवनं, एकविँशं तृतीयसवनं सोक्थ्यं, पञ्चदशी रात्रिः, त्रिवृत्सन्धिः- इति । बहिष्पवमाने पञ्चदशस्तोमः, आज्यस्तोत्रेषु चतुर्षु त्रिवृत्स्तोमः, माध्यन्दिनपवमानं चत्वारि पृष्ठानि आहृत्य पञ्च-स्तोत्रेषु सप्तदशस्तोमः, आर्भवपवमाने, अग्निष्टोमस्तोत्रे त्रिषु उक्थ्यस्तोत्रेषु च मिलित्वा पञ्चस्तोत्रेषु एकविँशस्तोमः रात्रिपर्यायात्मकेषु द्वादशस्तोत्रेषु पञ्चदशस्तोमः सन्धिस्तोत्रे त्रिवृत्स्तोमः एभिः सर्वैः स्तोमैः गणनायां कृतायां त्रिँशदुत्तर त्रिंशतस्तोत्रीयास्सम्पद्यन्ते । विराट्छन्दसा विभज्यमाने अतिरिक्ता ऋक् न भवति । "एकया गौरतिरिक्तः" इति श्रुतिः विद्यते । अतः अस्य क्रतोरहनि प्रयुज्यमानः गोष्टोमभागः गोशब्देनाभिधीयते । तथा च रात्रिपर्याय सन्धिस्तोत्रीया विहाय एकचत्वारिँशदुत्तर द्विशतस्तोत्रीया-स्सम्पद्यन्ते । अत्र विराट्छन्दसा विभागे कृते एका ऋक् अतिरिक्ता भवति । "एकया गौरतिरिक्तः" इति श्रुत्यर्थोऽप्युपपन्नः । एतादृशगोष्टोममाश्रित्य क्रियमाणः अतिरात्र इति गोष्टोमातिरात्रः इति व्यपदिश्यते ।

7. आयुष्टोमातिरात्रः

"आयुष्टोमेनातिरात्रेण स्वर्गकामो यजेत" इति विधिः स्तोम-कल्पनमाह । अस्मिन् आयुरतिरात्रे त्रिवृत्पञ्चदश चत्वारि स्तोत्राणि, सप्तदश पञ्चस्तोत्राणि, सन्धिस्तोत्र, रात्रिकृदाहृत्य अष्टचत्वारिंशदधिकचतु-श्शतस्तोत्रीया भवन्ति । ताश्च गायत्रीसंख्यया विभज्यमानाः अष्टादश गायत्र्यः द्वो पादौ च भवतः गायत्री त्रिपदा प्राणाऽपानव्यानरूपेण प्राणः त्र्यात्मकः प्राण आयुषोस्संगतिर्भवति ।

"त्रिवृद्बहिष्पवमानं, पञ्चदशान्याज्यानि, सप्तदशँ माध्यंदिनँसवनं, एकविँशं तृतीयसवनं, सोक्थ्यं, पञ्चदशी रात्रिः, त्रिवृत्सन्धिः" इति ।

अत्र बहिष्पवमाने त्रिवृत्स्तोमः आज्यस्तोत्रेषु चतुर्ष्वपि पञ्चदश-स्तोमः, माध्यन्दिनपवमाने पृष्ठस्तोत्रेषु पञ्चस्वपि सप्तदशस्तोमः आर्भव-पवमाने, अग्निष्टोम स्तोत्रे-त्रिषु उक्थ्यस्तोत्रेषु च एकविँशस्तोमः, रात्रि-पर्यायात्मकद्वादशस्तोत्रेषु पञ्चदशस्तोमः, सन्धिस्तोत्रे त्रिवृत्स्तोमः, अत्रापि

"एकयायुरूनः" इति श्रुत्युपपत्त्यर्थं अहनि प्रयुज्यमानः आयुष्टोमभागः आयुश्शब्देनाभिधीयते । तथा गणनायां नवपञ्चाशदुत्तर द्विशतस्तोत्रीयास्सम्पद्यन्ते । तदाश्रित्य अतिरात्रप्रयोगः क्रियत इति आयुष्टोमातिरात्र इति व्यपदिश्यते ।

"एतेनैव आमयाविनं याजयेदि"ति अतिरात्रः कार्यः [20-3-5. तां. ब्रा. सा. भा. एतेनैव आयुराख्येन एकाहेन आमयाविनं दीर्घरोगिणं यजमानं याजयेत् तदानीमतिरात्रसंस्थः कार्यः । उक्थ्यो ह्यायुः इति ।

8. अभिजिदतिरात्रः

"अभिजितातिरात्रेण भ्रातृव्यवान् यजेत" इति विधीयते । 20-8-1

अस्य स्तोमकल्पिमाह— त्रिवृद्बहिष्पवमानं, पञ्चदशगं होतुराज्यं सप्तदशं मैत्रावरुणस्य, पञ्चदशं ब्राह्मणाच्छगँशिनः, सप्तदशमच्छावाकस्य, एकविँशो माध्यन्दिनः पवमानः, सप्तदशगं होतुः पृष्ठं एकविँशं मैत्रावरुणस्य त्रिणवं ब्राह्मणाच्छँशिनः एकविँशमच्छावाकस्य, त्रिणव आर्भवः, त्रयस्त्रिँशोऽग्निष्टोमः प्रत्यवरोहीण्युक्थ्यानि, त्रिणवं प्रथमं, द्वे एकविँशे सषोडशिके पञ्चदशी रात्रिः त्रिवृत्सन्धिरिति 20-8-1 स्तोमकल्पावयं विशेषः अवगन्तव्यः । अत्र आज्यस्तोत्रेषु चतुर्षु मध्ये पञ्चदशस्तोमः सप्तदशस्तोमः पञ्चदशस्तोमः सप्तदशस्तोम इति माध्यन्दिनपवमाने एकविँशस्तोमः पृष्ठस्तोत्रेषु चतुर्षु मध्ये प्रथमतः सप्तदशस्तोमः ततः एकविँशस्तोमः ततः त्रिणवस्तोमः ततः एकविँशस्तोमः आर्भवपवमाने त्रिणवस्तोमः अग्निष्टोमस्तोत्रे त्रयस्त्रिँशस्तोमः, उक्थस्तोत्रेषु त्रिषु मध्ये प्रथमतः त्रिणवस्तोमः द्वितीयतृतीययोः एकविँशस्तोमः सषोडशिकः अयमतिरात्रः । अत्र षोडशिस्तोत्रे एकविँशस्तोमः रात्रिपर्यायात्मकेषु द्वादशस्तोत्रेषु पञ्चदशस्तोमः सन्धिस्तोत्रे त्रिवृत्स्तोमः स्तोमविशेषा उक्ताः । अनेन क्रतुना देवाः इमान्लोकान्पृथिव्यन्तरिक्षद्युलोकानभिलक्ष्य असुरानजयन्, एभ्यो लोकेभ्यः असुरान्निस्सारितवन्तः अतः अभिजिदतिरात्र इत्युच्यते ।

9. **विश्वजिदतिरात्रः**

"विश्वजितातिरात्रेण पशुकामो यजेत" इति ।

अस्य स्तोमकल्पितमाह— त्रिवृद्बहिष्पवमानं पञ्चदशगं होतुराज्यं सप्तदशं मैत्रावरुणस्य एकविँशं ब्राह्मणाच्छगंशिनः पञ्चदशमच्छावाकस्य सप्तदशो माध्यन्दिनः पवमानः, एकविँशगं हातुपृष्ठ त्रिणवं मैत्रावरुणस्य, सप्तदशं ब्राह्मणाच्छंसिनः, एकविँशमच्छावाकस्य त्रिणव आर्भवः, त्रयस्त्रिँशोऽग्निष्टोमः, प्रत्यवरोहीण्युक्थ्यानि त्रिणवं प्रथमं, द्वे एकविँशे सपोडशिके, पञ्चदशी रात्रिः त्रिवृत्सन्धिः- इति । अत्र स्तोमकल्पौ मैत्रावरुण आज्यस्तोत्रपर्यन्तं अभिजिदतिरात्रवत् । ब्राह्मणाच्छंसि आज्यस्तोत्रे एकविँशस्तोमः अच्छावाक आज्यस्तोत्रे पञ्चदशस्तोमः, माध्यन्दिनपवमाने सप्तदशस्तोमः पृष्ठस्तोत्रेषु प्रथमे एकविँशस्तोमः, द्वितीये त्रिणवस्तोमः, तृतीय सप्तदशस्तोमः,चतुर्थे एकविँशस्तोमः आर्भवपवमानप्रभृति सन्धिस्तोत्रपर्यन्तं पूर्ववदेव-

10. "त्रिवृतातिरात्रेण ब्रह्मवर्चसकामो यजेत" इति ।

11. "पञ्चदशेनातिरात्रेण वीर्यकामो यजेत"

12. "सप्तदशेनातिरात्रेण अन्नाद्यकामो यजेत"

13. "एकविँशेनातिरात्रेण प्रतिष्ठाकामो यजेत"

एते एकैकस्तोमकाः चत्वारः अतिरात्राः त्रिवृतातिरात्रे "बहिष्पवमानप्रभृति रात्रिपर्यायान्तं त्रिवृत्स्तोमः एक एव विनियोक्तव्यः ।

एवमेव पञ्चदश, सप्तदश, एकविँशातिरात्रेषु योजनीयः । यतः एकैकस्तोमः विनियुज्यते, अतः तत्तत्स्तोमनामविशेषेण विशिष्टा अतिरात्रा इति व्यपदिश्यन्ते । 20-10 1.

14. "आयुष्टोमातिरात्रेण आमयावी यजेते"ति रोगनिवारणार्थमपि ।

15. तै॰ सं॰ 7 काण्डे विश्वजित्सर्वपृष्ठोऽतिरात्रः विहितः । तत्र एवं भाष्यं विश्वजिन्नाम अग्निष्टोमविकार एकाहः । अतिरात्रविकृतित्वमापादितः पञ्चममहर्भवति । स पुनः सर्वपृष्ठैर्युक्तः ।

16 द्वादशाहप्रसङ्गे वैश्वानरातिरात्रः द्वादशदिवसे कर्तव्यतया विहितः ।

17. प्रायणीयातिरात्रः ।

18. उदयनीयातिरात्रः इत्यपि च विद्यते एतत्त्रयाणां अतिरात्राणां प्रयोगभेदो नास्तीति गम्यते ।

अथाप्तोर्यामः

इदानीमप्तोर्यामस्य प्रकृतित्वं निरूपणीयम् । "अप्तोर्यामः पशुकामस्ये"ति विहितः "यस्मात्पशवः प्रप्रेवभ्रँशेरन् स एतेन यजेत" तै. ब्रा. 2-7-14. अस्य सर्वात्मकत्वमप्युक्तं सवप्रकरणे पाठात् । तथा हि तै. ब्रा. 2-7 प्रपाठके "त्रिवृत्स्तोमो भवति" इत्युपक्रम्य बृहस्पतीसवः, सोमसवः, पृथिसवः, गोसवः इत्यादयः बहवो विहिताः । तस्मिन्नेव प्रसङ्गे चतुर्दशानुवाके "प्रजापतिः पशूनसृजत" इत्यत्र अप्तोर्यामः विहितः । अतः सवप्रकरणे उक्तत्वात् सव इत्यपि वक्ष्यते । तां ब्राह्मणे तावत् अतिरात्रविशेषनिरूपणावसरे अप्तोर्यामः प्रस्तुतः ।

शाङ्खायनश्रौतसूत्रे तु "प्रजापतिर्हि देवान् सृष्ट्वा तेभ्य एतदन्नपाने ससृजौ । "एतान् यज्ञान् अग्निष्टोमं प्रथमं स एतान्नान्वभवत् । अथात्यग्निष्टोमं स एतान्नान्वभवत् । अथोक्थ्यं स एतान्नान्वभवत् । अथ षोडशिनं स एतान्नान्वभवत् । अथ वाजपेयं स एतान्नान्वभवत् । अथातिरात्रं स एतान्नान्वभवत् । अथाऽप्तोर्यामम् स एतानन्वभवत् । अनेन किमुक्तमिति चेत् प्रजापतिना सृष्टानां देवानां अन्नपानसमृद्ध्यर्थं तदनु एते अग्निष्टोमादयः सृष्टाः । तदा अग्निष्टोमादिभिः ते देवाः अन्नपानसमृद्धिं न प्राप्ताः । अप्तोर्यामेन तु अन्नपानसमृद्धिस्सञ्जाता । अतः अप्तोर्यामः प्रशस्त इत्युक्तम् । तस्य त्रयस्त्रिँशत्स्तोत्राणि त्रयस्त्रिँशच्छस्त्राणि, त्रयस्त्रिँशत् उक्थ्याहुतयः, त्रयस्त्रिँशद्वै सर्वे देवाः । तदेनान् स्तोत्रैश्शस्त्रैः, उक्थ्याहुतिभिश्च प्रत्येकं सर्वान्प्रीणाति । तस्य नव स्तोमाः नव पृष्ठानि, षट् संस्थाः परिग्रहणेन तानि चतुर्विँशतिः चतुर्विँशतिर्वै संवत्सरस्य अर्धमासाः संवत्सर-

स्यैवाप्त्यै । अप्तो वै वत अयं यामो यो देवांश्च संवत्सरञ्च अनुभवतीति तस्मादप्तोर्यामः । स. श्रौ. 17-12 खण्डे एवमुक्तम् । अप्तोर्यामेन पशुकामः यस्मात्पशव प्रप्रेव भ्रँशेरन् इत्यैकादशिनः पशवो भवन्तीति । एतस्यैव सवात्मकत्वं 13-13 खण्डे सवप्रकरणे व्याख्यातः "अप्तोर्याम" इत्यनेन सूत्रेण । सवप्रकरणात् सवात्मकत्वमपि एतस्य नामातिदेशमात्रमत्र ।

एवं स्थिते अप्तोर्यामो नाम न कश्चन ज्योतिष्टोमसंस्थः । किन्तु वैकृतातिरात्रविशेष एवेति केचित् । गोपीनाथभट्टमहोदयेन तु उक्थ्यषोडशीति व्याख्यानग्रन्थे तन्निरस्तमिति पूर्वमेवोक्तम् । एतावता ग्रन्थेन अग्निष्टोमः ज्योतिरादेरग्निष्टोमस्य प्रकृतिः । उक्थ्यः गवादेरुक्थ्यस्य प्रकृतिः । षोडशी वाजपेयादिषोडशिनः, अतिरात्रः विश्वजिदादेरतिरात्रस्य, अप्तोर्यामः सवात्मकाप्तोर्यामस्य प्रकृतिरिति "ज्योतिष्टोम" इति चेत्यादि वाक्यानि विवृतानि । अनेन विवरणेन अग्निष्टोमाः, उक्थ्याः षोडशिनः अतिरात्राश्च, अप्तोर्यामाश्च, बहवः तत्तद्वेदशाखासु तत्तच्छ्रौतसूत्रेषु च विहिता इति ज्ञातुं अस्मिन्नेव प्रसङ्गे ते सर्वेऽपि विस्तृताः । सर्वेऽपि इत्यनेन एतावन्त एवेत्यपि वक्तुं न शक्यते । वेदशाखानां तत्तच्छाखानुसारि सूत्रग्रन्थानाञ्च बहुत्वात् । सर्वासां शाखानां सर्वसूत्रग्रन्थानाञ्च बहुत्वात् । सर्वासां शाखानां सर्वसूत्रग्रन्थानाञ्च दर्शनमशक्यम् । अतः यथाशक्ति यथामति निरूपितम् । प्रकृतमनुसरामः ।

यद्यपि सोमसंस्थानां त्रित्वे चतुष्ट्वे च बहूनि प्रमाणानि विद्यन्ते सूत्रकारेण सत्याषाढेन "उक्थ्यः षोडश्यतिरात्राप्तोर्यामश्च अग्निष्टोमस्य गुणविकारा भवन्ति" इत्यस्मिन्सूत्रे कुतः पञ्चसंस्थाः उपादीयन्त इत्याशङ्क्य समाधातुं एते अग्निष्टोम उक्थ्यादयः पञ्चापि अन्येषां प्रकृतिभूता इति सूत्रकारस्याशय इति ज्ञापयितुं तत्सूत्रव्याख्याने "अग्निष्टोमः ज्योतिरादेरग्निष्टोमस्य इत्यादिना विवृतम् । तत्सिद्धम् । अग्निष्टोम उक्थ्यादयः पञ्च संस्थाः अन्येषां प्रकृतय इत्यलमतिप्रसङ्गेन । तस्मात् ज्योतिष्टोससंस्थाधिकारवचनात् प्रकृत्यधिकाराच्च अग्निष्टोमादिपञ्च-

संस्थानां ग्रहणम्। इदमेव स.श्रौ.सू 9-7 प्रश्नव्याख्याने आशङ्क्य समाहितम्। "ननु गौतमाद्याः आचार्याः सप्तसंस्थाः सोमस्योपदिशन्ति। 1. अग्निष्टोमः, 2. अत्यग्निष्टोमः, 3. उक्थ्यः, 4. षोडशी. 5. अतिरात्रः, 6. वाजपेयः, 7. अप्तोर्याम इति, सप्तसोमसंस्थाः। तासु च उत्तराः षडपि आद्यस्याग्निष्टोमस्य गुणविकारा इति। सत्याषाढापस्तम्बभरद्वाजैः कात्यायनेन, शांखायनसूत्रकारेण च पञ्च संस्था इत्युक्ताः, कुतः अत्यग्निष्टोमवाजपेययोरनुपादानमिति चेत् न। प्रकृतिभूतानामेव ज्योतिष्टोमसंस्थानामत्रानुक्रमणीयत्वस्याभिप्रेतत्वात्। न तु सोमसंस्थामात्रस्य अग्निष्टोमगुणविकारमात्रस्य वा। तत्र न तावदत्यग्निष्टोमः। कस्यचित् क्रतोः प्रकृतिः, वाजपेयस्तु न प्रकृतिः। नापि ज्योतिष्टोमः। सर्वसप्तदशत्वात् वाजपेयस्य। अतो युक्तमेवानयोरनुपादानम्। तस्मादेवं सिद्धम्। पञ्चशाखः अग्निष्टोमः ज्योतिष्टोम एव सर्वसोमानां प्रकृतिरिति। एवमेवापस्तम्बभरद्वाजादिभिरप्युक्तम्। गौतममते तावत् सप्तसोमसंस्था इत्युक्तं भवति। एवं तत्तन्मतभेदेन संस्थाभेदः प्रदर्शितः। इतः परं संस्थापदलक्षणपरिष्कारः क्रियते।

संस्थालक्षणपरिष्कारः

संस्था नाम तत्तत्प्रयोगवृत्तिस्तोत्रोपरम इत्युक्तम् भाट्टदीपिकायाम् 3-6-16. स्तोत्रेण क्रतुप्रयोगवृत्युपरम इत्यर्थः। तथाविधस्तोत्रानन्तरं कतिपयोत्तराङ्गानुष्ठानेन प्रयोगोपरमाभावात् असम्भव इति दोषे प्राप्ते तद्वारणाय क्रतुपदनिवेशः। अग्निष्टोमादिस्तोत्रानन्तरमपि प्रधानभूतहारियोजनग्रहाभ्याससत्त्वेन तदन्त एव क्रतुप्रयोगसमाप्तेः। तस्यास्समाप्तेः संस्थात्ववारणाय स्तोत्रपदनिवेशः। हारियोजनग्रहयागाभ्यासानन्तरं क्रतुप्रयोगसमाप्तेः सत्त्वेऽपि तद्ग्रहयागस्य स्तोत्रसम्बन्धाभावेन तस्य क्रतुप्रयोगवृत्तिस्तोत्रोपरम इति नोच्यते। अतश्च यत्स्तोत्रानन्तरं क्रत्वभ्याससमाप्तौ सत्यां उत्तरत्र स्तोत्रेण प्रधानयागाभ्यासो नास्ति। तत्स्तोत्रकालीना तत्क्रतुसमाप्तिः सैवाग्निष्टोमादिपदैः संस्थात्वेनोच्यते। अत एव

सप्तसोमसंस्था इति स्मृतौ व्यवहारः अथवा स्तोत्रसम्बन्ध्युपरम इत्यर्थः। उभयथापि वार्तिकादिग्रन्थेषु तदर्थप्रतीतेः सर्वथा समाप्तिवाचित्वे, न विवादः। सम्पूर्वस्य तिष्ठतेस्समाप्तिवाचित्वादित्यर्थः। एवमग्निष्टोमस्तोत्रेण यत्र समाप्तिः क्रियते साऽग्निष्टोमसस्था एका। यत्र अग्निष्टोमस्तोत्रोत्तरं "एह्यूषु" इत्यस्यामृचि साकमश्वसाम्ना क्रियमाणमेकं "वचमुत्वे" त्यस्यां सौभरनामकं द्वितीयम्। "अयाहीन्द्र" इत्यस्यां नार्मेधनामक साम तृतीयमित्येवं त्रीणि अन्यानि स्तोत्राणि क्रियन्ते। सा उक्थ्यसंस्था द्वितीया। तदुत्तरं उक्थ्यस्तोत्रोत्तरं "इन्द्र जुषस्वे"त्यृचि गौर्वीतनामक, षोडशिनामकसाम्ना क्रियमाण षोडशिस्तोत्रेण उपरमः क्रियते इति सा षोडशिसंस्थेऽप्युच्यते। अत्र षोडशिग्रहं प्रातस्सवन एव गृहीत्वा शकरे आसादयेत्। तृतीयसवने उक्थ्यग्रहप्रचारानन्तरं षोडश्यर्थं चमसानुन्नीय "समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपकरोती"ति श्रुतेः सूर्यस्यार्धास्तमयसमये षोडशस्तोत्रं कुर्यात्। अनेन स्तोत्रेण यतः क्रतुप्रयोगवृत्तिस्तोत्रोपरमः, अतः षोडशिसंस्थेत्युच्यते। सैव तृतीया। एवमेवातिरात्रक्रतौ षोडशिग्रहप्रचारानन्तरं षोडशिवदिवानुष्ठाय ततो होतृचमसमुख्यान् दश चमसानुन्नीय एकैकस्मिन् पर्याये चत्वारि चत्वारि स्तोत्राणीति पर्यायत्रये आहृत्य द्वादश स्तोत्राणि कुर्यात्। अतः एतेषां रात्रिपर्यायाणां रात्रावेव स्तूयमानत्वात् रात्रिसत्राणीति चोच्यन्ते। अत्र यद्यपि षोडशिग्रहणानन्तरं अतिरात्रार्थं पृथक्त्वेन ग्रहो नास्ति। तथापि यतो रात्रिस्तोत्रैः क्रतुस्समाप्यते, अतोऽतिरात्रसंस्थेऽप्युच्यते। इयं चतुर्थी। एवं ज्योतिष्टोमप्रकरणे चतस्रसंस्था इति यच्छ्रुतिः तद्विवरणं कृतम्।

अन्यासु संस्थासु अन्यासां संस्थानां प्रवेश विचारः

ननु "सप्त संस्थात्मको ज्योतिष्टोम" इति स्मृतिषु परिगण्यते तत् कथमिति चेत् उच्यते। अत्यग्निष्टोमवाजपेयाप्तोर्यामा इति तिस्रः संस्था एतासु चतसृषु अन्तर्भूता इत्युच्यते।

तथा हि — अग्निष्टोमसंस्थायां अग्निष्टोमस्तोत्रानन्तरं उक्थ्यस्तोत्राण्यकृत्वा यदि षोडशिस्तोत्रं क्रियेत सैव अग्निष्टोमसंस्था अत्यग्निष्टोम

संस्था इत्युच्यते। षोडशिसंस्थायां षोडशिक्रमवदेव अग्निष्टोमस्तोत्रं तदुत्तरं उक्थ्यस्तोत्राणि तदुत्तरं वाजपेयस्तोत्रं यदि क्रियेत सा षोडशिसंस्थैव वाजपेयसंस्थेत्युच्यते ।

एवमेव अतिरात्रक्रतौ त्रीन् रात्रिपर्यायान् सन्धिस्तोत्रं चानुष्ठाय चतुर्थरात्रिपर्यायात्मकानि चत्वारि स्तोत्राणि यत्राधिकतया अनुष्ठीयन्ते सा अतिरात्रसंस्थैव अप्तोर्यामसंस्थेत्युच्यते । अत्र तावदयं विशेषः— अत्यग्निष्टोमे अग्निष्टोमस्तोत्रानन्तरमुक्थ्यग्रह-उक्थ्यस्तोत्राणां वचनात् लोपेऽपि षोडशिग्रहषोडशिस्तोत्रे भवतः। वाजपेये तु षोडशिग्रह षोडशिस्तोत्रानन्तरं होतृचमसमुख्यदशचमसोन्नयनमेव वर्तते । न तु वाजपेयार्थमतिरिक्तग्रहोऽस्ति । किन्तु वाजपेयसाममन्त्रं बृहत्साम "किमित्ते विष्णो" इत्यस्यामृचि गीयते। एतत्साम सप्तदशस्तोमकमिति केचित् । एवमेवाप्तोर्यामेऽपि षोडशिग्रहणानन्तरं अतिरात्रक्रतोरिव अतिरिक्तग्रहो नास्ति । किन्तु चमसोन्नयनमात्रम् । तद्वत् अतिरात्रसम्बन्धिरात्रिपर्यायत्रयानन्तरं अप्तोर्यामस्य पुनः चमसोन्नयनमेव कार्यम् । ततश्चतुर्थो रात्रिपर्यायः चतुष्टोमात्मको वर्धते । तेनातिरात्रसंस्थैव अप्तोर्यामसंस्थेत्युच्यते । ननु अग्निष्टोमादि संस्थानामेव अत्यग्निष्टोमादिसंस्थान्तरप्राप्तिरित्युक्तम् । पूर्वपूर्वसंस्थायां सत्यामपरसंस्थान्तरस्य प्रवेशो न सम्भवति । यद्यपरा संस्था तदा पूर्वसंस्थाया व्यवहार एव न संगच्छते। कथं सैव अग्निष्टोमादिसंस्था अत्यग्निष्टोमसंस्थेति सैव षोडशिसंस्था वाजपेयसंस्थेति व्यपदिश्यते, इत्याशङ्का जायेत । अत एव भाट्टदीपिकायां 10_5_12 एवमेव विचार्य सिद्धान्तः कृतः । स एव सिद्धान्तोऽस्या आशङ्कायास्समाधानमित्यवगन्तव्यम् ।

तथाहि- "षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात्" 9 अधिकरण इति । अत्यग्निष्टोमे राजन्यस्य गृह्णीयात् । इत्यादिवाक्यैः षोडशिसंस्थायाः प्रकृत्यङ्गत्वमित्युक्तम् । अग्निष्टोमादिपदानां तत्तत्संस्थावाचित्वेनाभ्युपगमात् अग्निष्टोमादिसंस्थायां षोडशिसंस्थानिवेशायोगेन तदिह आक्षिप्यते । एकसंस्थायामपरसंस्थाऽसम्भवादिति । संस्था हि तत्तत्स्तोत्रोत्तरं तस्मिन्क्रतुप्रयोगे स्तोत्रान्तराभावः । एतेन षोडशिस्तोत्रोत्तरं कतिपयपदार्थानुष्ठानेऽपि

न संस्थात्वहानिः । स्तोत्रान्तराभावप्रयुक्तत्वेनैव संस्थात्वाङ्गीकारात् । न चाग्निष्टोमादिस्तोत्रादेरन्तिमत्वे षोडशिस्तोत्रस्य अन्तिमता सम्भवति । किञ्च पूर्वसंस्थोपमर्देऽपि षोडशिनि, "तं परञ्चमुक्थ्येभ्यो गृह्णातीति" वाक्येन उक्थ्यपरभावविधानात् अग्निष्टोमाभ्यासोत्तरत्वसिद्धान्तासिद्ध्यनापत्तेश्च । अतः "अत्यग्निष्टोमे राजन्यस्य गृह्णीयात्" इति वाक्ये जघन्ये अनुषक्ते षोडशिपद एव ग्रहणमात्रं षोडशिसंस्थाङ्गभूतं लक्षयित्वा तदेवाग्निष्टोमादिसंस्थोद्देश्येन तद्विशिष्टक्रतूद्देशेन वा विधीयते । तत्र च देवतासंयोगात् संस्कृतस्य द्रव्यस्य उपयामगृहीतोऽसि इन्द्राय त्वा षोडशिने" इति मन्त्रवर्णात् यागाभ्यासोऽप्यार्थिकः—तस्य ग्रहणप्राप्तदेवतासंयोगात् द्रव्यदेवतासंयोगान्यथानुपपत्त्या "सौर्यं चरुं निर्वपेत्" इतिवत् यागो लक्ष्यते । अतोऽर्थासिद्धो यागाभ्यास एव कर्तव्य" इति न चैतावता तदङ्गभूतस्तोत्रस्यापि करणम् । तस्य प्रधानभूताग्निष्टोमादिसंस्थोपमर्दापत्त्या बाधादिति प्राप्ते अत्यग्निष्टोमे राजन्यस्य गृह्णीयादित्यत्र न तावत् संस्थाविशिष्टज्योतिष्टोमे ग्रहणविधिः । अग्निष्टोमादिपक्षेऽपि अग्निष्टोमसंस्थाविशिष्टज्योतिष्टोम इति लक्षणापत्तेः । नाऽपि संस्थामात्रोद्देशेन संस्थाङ्गत्वस्य प्रकरणादप्राप्ततया प्रतिप्रसवार्थक अपि शब्दानुपपत्तेः । अयमर्थ —

यदि प्रकरणात् संस्थाङ्गत्वं प्राप्तं "षोडशिना वीर्यकामस्तुवीत" इति कामश्रुत्या बाधितम् । अनेन "अप्यग्निष्टोमे"ति वाक्येन प्रतिप्रसूयेत । तदा अपिशब्दः न त्वेतदस्ति । संस्थायाः क्रतोरङ्गत्वेन स्वतः प्रकरणाभावेन तदङ्गत्वाप्राप्तेरिति । नापि संस्थायां निमित्तभूतायां ज्योतिष्टोमाङ्गत्वेन विधिः । राजन्यस्यापि निमित्तत्वेन उद्देश्यानेकत्वापत्तेः । अयमर्थः—यदि राजन्यस्य कर्तृत्वेन अन्वयस्य व्युत्पन्नत्वात् राजन्यकर्तृत्वं ग्रहण एव अग्निष्टोमादिसंस्थायां निमित्ते विधीयते तदा ब्राह्मणादिकर्तृकाग्निष्टोम एव राजन्यकर्तृकतद्ग्रहणस्याङ्गत्वापत्तिः । अतः राजन्यपदस्योद्देश्यपरत्वं निमित्तविशेषणत्वं वा अङ्गीकर्तव्यम् । तत्रापि आद्ये राजन्यपदस्योद्देश्यपरत्वे प्रकरणप्राप्तज्योतिष्टोमाङ्गत्वानुपपत्तिः । द्वितीये राजन्यस्येति षष्ठ्यन्तस्य अस्मन्मते इतरपदार्थे अन्वयासम्भवात् वाक्यभेदापत्तिः । अतः

पृथग्निमित्तत्वेनैवान्वयो वाच्यः। तद्विजातीयेन निमित्तद्वयेन विजातीयभाव्यरूपाक्षेपात् उद्देश्यानेकत्वप्रयुक्तवाक्यभेदापत्तिरित्यर्थः। अतः प्रथमोपस्थितेऽपि अग्निष्टोमपद एव स्तोत्रलक्षणा तदभ्यासलक्षणा वा। अग्निष्टोमे इति सति सप्तमी। तथा च अग्निष्टोमाभ्यासे कृते सतीत्यर्थाङ्गीकारात् तदभ्यासोत्तराग्निष्टोमयागाभ्यासोत्तरकालताविशिष्टषोडशिसंस्थैव राजन्ये निमित्ते ज्योतिष्टोमाङ्गत्वेन विधीयते। अर्थाच्च तस्य नित्याग्निष्टोमसँस्था। "षोडशिना वीर्यकामस्तुवीते"ति विहिता काम्या षोडशिसंस्था। सर्वेषामपि त्रैवर्णिकानां अग्निष्टोमस्तोत्रोत्तरोक्थ्यस्तोत्रोत्तरं षोडशिस्तोत्रं कर्तव्यम्। अत एव "तं पराञ्च मुख्येभ्यः" इत्युक्थ्यपरभावोऽपि षोडशिनः काम्यप्रयोगे अतिरात्रसंस्थायां च भवतीत्यर्थः। इयं हि अत्र स्थितिः प्रामाणिकी। अग्निष्टोमसंस्थायां न अग्निष्टोमस्तोत्रोत्तरं उक्थ्यादि किञ्चित् उक्थ्यसंस्थायां तु अग्निष्टोमस्तोत्रोत्तरं उक्थ्यस्तोत्राणि न तु तदुत्तरं षोडश्यादि। षोडशिसंस्थायां तु तदुत्तरं षोडशिस्तोत्रं न तु षोडशिस्तोत्रोत्तरं अतिरात्रादि। अतिरात्रसंस्थायां तु तेनैव समाप्तिः। इति चतसृणां संस्थानां नैजं स्वरूपं प्रतिपादितम्। तदिह काम्यायां षोडशिसंस्थायां अतिरात्रोत्तरषोडश्यभ्यासे च यथास्थित एव उक्थ्यपरभावः अग्निष्टोमसंस्थोपमर्दे तु "अत्यग्निष्टोमे राजन्यस्य गृह्णीयात्"इति षोडशिस्तोत्रस्य अग्निष्टोमस्तोत्रोत्तरत्वं वाचनिकमिति उक्थ्यस्तोत्राणां लोप एव। एवमत्र अवगन्तव्यम्। अग्निष्टोमस्तोत्रोत्तरं उक्थ्यस्तोत्राण्यकृत्वा षोडशिस्तोत्रेण समाप्तिः यदि क्रियेत तदा तस्यैवाग्निष्टोमस्य अत्यग्निष्टोम इति संज्ञा। "अत्यग्निष्टोमे राजन्यस्य गृह्णीयात्" इति राजन्यकर्तृकत्वे निमित्ते अग्निष्टोमे अग्निष्टोमसाम्ना समाप्तौ प्राप्तायां तां समाप्तिं बाधित्वा "तं परां च मुख्येभ्यो गृह्णातीति" वचनप्राप्तः यः षोडशिनः उक्थ्यपरभावः तमपि बाधित्वा षोडशिस्तोत्रेणैव समाप्तिः कार्येति विधीयते। यद्वा अग्निष्टोमस्तोत्रोत्तरं षोडशिनः उक्थ्यपरभाववाधे प्राप्ते "अप्युक्थ्ये गृह्णीयात्" इति वचनेन प्रतिप्रसवकारणात् राजन्यस्य अग्निष्टोमे अग्निष्टोमाभ्यासोत्तरं षोडशी। अथवा उक्थ्याभ्यासोत्तरं षोडशिस्तोत्रेण समाप्तिः

कार्या । नन्वत्रैव खलु इयं शङ्का "अग्निष्टोमे षोडशिसंस्था कार्या" इत्यत्र अग्निष्टोमपदस्य संस्थापरत्वेन पूर्वमेव निश्चितत्वात् अग्निष्टोमसंस्थायां निमित्तभूतायां यदि षोडशिसंस्था विधीयेत; अग्निष्टोमसाम्ना षोडशिसाम्ना च युगपत्समाप्तिः कर्तुमशक्येति, यस्मिन्निमित्ते यद्विधीयते तन्निमित्तस्यैव व्याघातप्रसक्तिरिति चेत् उच्यते — नात्र षोडशिसंस्थाविधाने अग्निष्टोमसंस्थायाः निमित्तत्वम् । यदि निमित्तत्वमुच्येत, भवदुक्तरीत्या निमित्तव्यव्याघातो भवेत् । अतः राजन्यकर्तृकत्वस्य निमित्तत्वमङ्गीकृत्य यस्मिन्कृते अग्निष्टोमसाम्ना वा उक्थ्यसाम्ना वा समाप्तिः प्राप्ता तदा तथा न समाप्तिः कार्या । किन्तु षोडशिसाम्ना समाप्तिः कर्तव्येति । तदेवोक्तं शास्त्रदीपिकाव्याख्यायां मयूखमालिकायाम् । इह अग्निष्टोमसंस्थां निमित्ततया उपादाय षोडशिसंस्था न विधीयते । किन्तु यः क्रतुः अग्निष्टोमसंस्थाकः उक्थ्यसंस्थाकश्च विहितः, सः क्रतुः राजन्यस्य न तत्संस्थाकः । किन्तु षोडशिसंस्थः कर्तव्यः इति राजन्यकर्तृकत्वमेव निमित्तीकृत्य पूर्वसंस्थोपमर्देन संस्थान्तरं विधीयते इति । अत्र अग्निष्टोमादिपदानां उद्देश्यत्वात् ग्रहैकत्वाधिकरणन्यायेन उद्देश्यविशेषणं अविवक्षितम् । सगोत्रविवाहनिषेधप्रङ्गे ज्ञानेन वाऽज्ञानेन वा यदि सगोत्रा परिणीता स्यात्तदानीं किं कार्यमित्यत्र विचारावसरे एवमुक्तं धर्मशास्त्रे । अत एव "भार्या मातृवत्पालनीया" इत्यत्र यदि भार्या स्यात् सा मातृवत् पालनीयेति न संभवति । यदि मातृवत्पालनीया सा भार्या न भवतीत्यशङ्क्य अत्र भार्यायाः उद्देश्यत्वात् भार्यात्वविशेषणम् अविवक्षितम् । या भार्यात्वेन अभिप्रेता सा न भार्या किन्तु मातृवत्पालनीयेति एवमेव । तथा च अग्निष्टोमसंस्थायाः निमित्तत्वाभावात् न निमित्तत्वव्याघातः इत्युक्तम् । अनेन पूर्वसंस्थायां अन्या संस्था कथं निविशत इति शङ्का समाहिता भवति । तत एवं निष्कर्षः । अग्निष्टोमस्तोत्रान्तं अग्निष्टोमवदनुष्ठाय अग्निष्टोमाश्रयत्वेन तद्विकारभूतं षोडशिस्तोत्रं यदि क्रियेत; सैव अग्निष्टोमसंस्थैव अत्यग्निष्टोमपदवाच्या । एवमेव षोडशिक्रतुमिव षोडश्यन्तं यथावदनुष्ठाय तदुत्तरं तदाश्रयत्वेन वाजपेयस्तोत्रं यदि क्रियेत सा षोडशिसंस्थैव वाजपेयसंस्थेत्युच्यते । एवमेव अप्तोर्याम-

अतिरात्रान्तं यथावदनुष्ठाय, तदुत्तरं तदाश्रयत्वेन चतुर्थो रात्रिपर्यायः यदि वर्धेत सैव अतिरात्रसंस्थैव अप्तोर्याम संस्थेत्युच्यते ।

ननु अत्यग्निष्टोमे षोडशिग्रहस्तोत्रादिकं विद्यते, तथैव षोडशिसंस्थायामपि । अनयोः को भेदः? इति चेत् उच्यते-अत्यग्निष्टोमे अग्निष्टोमात्परं षोडशिग्रहावेक्षणादिकं यद्विद्यते तदकृत्वैव कार्यम् । षोडशिक्रतौ स्तोत्रशस्त्रयोः उदयसन्धिकालः अस्तमयसन्धिकालश्च उक्तः । "यस्यास्विनेशस्यमाने सूर्यो नाविर्भवति । सौर्यं बहुरूपमालभेत" इति आश्विनशस्त्रस्य कालो उक्तः" समयाविषिते सूर्ये षोडशिनस्तोत्रमुपकरोति इति षोडशिस्तोत्रस्य सूर्यास्तमयकालः उक्तः । तादृशनियमः अत्यग्निष्टोमे षोडशियागाभ्यासे नास्ति । षोडशिक्रतौ तु षोडशिग्रहवीक्षणादिकं स्तोत्रशस्त्रयोः उदयास्तमयसन्धिकालनियमश्च विद्यते । तदेवोक्तं आर्षेयकल्पे :-

"अग्निष्टोमात्परं यत्र षोडशिग्रहवीक्षणम् ।
तन्निष्क्रमाद्यकृत्वैव कार्यमन्यत्र पूर्ववत् ।।"

"यश्चोक्तः कालनियमः सूर्याधोगमनादिकः ।
सोऽपेक्षणीयो नैवास्य न सन्धि स्तोत्रता यतः ।।"

"उक्तं निदाने सन्धित्वं उक्थ्यानन्तरजस्य च ।
उदयसन्धिरसौ अस्तमयसन्धिरयं त्विति ।।"

"अहस्तोत्रतया छन्नं तदनेन भवेत्स्तुतिः ।
उच्चैस्तु रात्रिमापन्ना यदि दैवादिहेतुना ।।"

"धूर्ज्योतिर्विश्वरूपा गानशेषं प्रकृतिवन्मतम् ।
उक्थ्यानन्तरसम्भूतषोडशिस्तोत्रसंस्थितिः ।।"

इति अत्यग्निष्टोमषोडशिसंस्थयोः भेदः प्रदर्शित । अत्यग्निष्टोमस्य क्षत्रिय एवाधिकारीत्युक्तम् आर्षेयकल्पे । तत्र अग्नि टोमचमसभक्षणानन्तरं यदा विधाय षोडशिस्तोत्रं ज्योतिष्टोमः समाप्यते स अत्यग्निष्टोम इत्युक्तम् । तदा क्षत्राधिकारः नित्यं च अस्य बृहत्पृष्ठम् । तत्र क्षत्रियः यतः श्रूयते हि

षोडशिनं प्रकृत्य तैत्तिरीयकम् "अत्यग्निष्टोमे राजन्यस्य गृह्णीयात्" इति। षड्विंशब्राह्मणं च ब्रह्मवै रथन्तरं क्षत्रं बृहत् ष॰ ब्रा॰ 4-2-3 इति बृहत्पृष्ठे च विशेषः पूर्वमेव दर्शितः ।

यज्ञतत्त्वप्रकाशेऽपि श्री चिन्नस्वामिशास्त्रिमहोदयैरेवमुक्तम् । "अग्निष्टोमस्तोत्रानन्तरं उक्थ्यस्तोत्राण्यकृत्वा षोडशिस्तोत्रादि प्रचारः यत्र क्रियते सा अत्यग्निष्टोमसंस्थेत्युच्यते । एवं च अग्निष्टोम एव तदुत्तरं षोडशिग्रहचमसस्तोत्रादीनामनुष्ठाने अग्निष्टोमसंस्थैव अत्यग्निष्टोमसंस्थेति संस्थान्तरं भजतेति फलितम् अस्यां अग्निष्टोमसंस्थायां क्षात्रय एवाधिकारी। न ब्राह्मणवैश्याविति केचिद्ब्रुवते । परमाश्वलायनादिभिः त्रैवर्गिककर्तृसंस्थामध्ये अस्याऽपि पाठात् तयोरप्यत्र अधिकारं मन्वानाः याज्ञिकास्तथैवानुतिष्ठन्ति इति।

ननु अग्निष्टोमः उक्थ्यः षोडशी॰ अतिरात्र इति चतस्रः संस्था इति यासां नामनिर्देशः कृतः, तत्र सप्तसोमसंस्थापरिगणनायां यथासंस्थाः संस्थान्तरं भजन्त इत्यत्र च पूर्वपूर्वसंस्थोपमर्देन अन्यान्यसंस्थाविधानमविशिष्टमेव। यथा अग्निष्टोमसाम कृत्वा तेन अनुपरम्य उक्थ्यसाम्ना यदि समाप्येत सा उक्थ्यसंस्थेत्युच्यते । एवमेव उक्थ्यसाम कृत्वा तेन अनुपरम्य षोडशिसाम्ना समाप्येत सा षोडशिसंस्थेत्युच्यते ।

एवमेव षोडशिसाम कृत्वा तेनाऽनुपरम्य रात्रिपर्यायात्मकस्तोत्रैः यदि समाप्येत अतिरात्रसंस्थेत्युच्यते । एवं स्थिते कासांचित् अग्निष्टोमउक्थ्यादिसंस्थानां पृथक्त्वेन व्यवहारः काश्चित् संस्था एव संस्थान्तरं भजन्त इति व्यवहारश्च विद्यते । अनयोः को भेदः इति चेत् उच्यते पृथक् संस्थात्वेन व्यवहृतस्थले पूर्वसंस्था सामगानोत्तरं द्वितीयसंस्थासामगानं क्रियते। द्वितीयसंस्थासामगानोत्तरं तृतीयसंस्थासामगानं क्रियते। एवं चतुर्थस्यापीति। अन्याः संस्थाः संस्थान्तरं भजन्त इत्यत्र संस्थासामस्तोत्राणां आनुपूर्वी नास्ति। किन्तु अग्निष्टोमसामगानोत्तरं द्वितीयसंस्थाकोक्थ्यसाम अकृत्वा तृतीयसंस्थाकषोडशिसाम क्रियत इति सा

अग्निष्टोमसंस्थैव अत्यग्निष्टोमसंस्थेति । तृतीयसंस्थाकषोडशिस्तोत्रोत्तरं चतुर्थसंस्थाकरात्रिपर्यायान् अकृत्वा वाजपेयस्तोत्रं क्रियत इति षोडशिसंस्थैव वाजपेयसंस्थेत्युच्यते । एवमेव सप्तसंस्थानां मध्ये पञ्चमत्वेन व्यवहृत अतिरात्रसम्बन्धि द्वादशस्तोत्रानन्तरं पृष्ठसंस्थात्वेन व्यवहृतवाजपेयसाम अकृत्वा सप्तमसंस्थासम्बन्ध्यतिरिक्तः चतुर्थपर्यायः वर्धत इति अतिरात्रसंस्थैव अप्तोर्यामसंस्थेत्युच्यते । अतः पूर्वपूर्वसंस्थोपमर्देन अन्यसंस्थानिवेशस्य अविशिष्टत्वेऽपि अयमेव भेदः ज्ञेयः । एतावता संस्थाविषये मतभेदं प्रदर्श्य पूर्वपूर्वसंस्थोपमर्देन अन्यान्यविधानं समर्थितम् ।

अनेन ग्रन्थेन मतभेदेन संस्थानां परिगणनाविचारः,

मतभेदेन नित्यकाम्यविचारः, अन्योऽपि संस्थासम्बन्धिविचारश्च कृतः । इतःपरं प्रत्येकतया वाजपेयविचारः कर्तव्यः ।

()

तृतीयोऽध्यायः

वाजपेयविचारः

पूर्वस्मिन्प्रकरणे नित्यनैमित्तिककाम्य-लक्षणपुरस्सरं अग्निष्टोमातिरिक्तानां संस्थानां मीमाम्सकमते काम्यत्वमिति "चत्वारिंशत्संस्कारा" इति गौतमीयेन वचनेन संस्था अपि नित्या इति बहवः अभिप्रयन्तीति प्रत्यपादि । कति संस्था इत्यत्र मतभेदमुपपाद्य प्रसङ्गानुप्रसङ्गेन अग्निष्टोमादयः यावद्भेदभिन्ना विद्यन्त इति सप्रमाणं निरूप्य—

अत्र कतिविधः वाजपेय इति विचारः क्रियते

गौतमेन तावत् अग्निष्टोमादि-सप्तसोमसंस्था अभिहिता इत्यनेन तदन्यतमः वाजपेय इति स्पष्टं प्रतीयते । इदानीं प्राचुर्येण अनुष्ठीयमानः आप्तवाजपेयः, संस्थासु अन्यतमः उत अन्यः संस्था-वाजपेयः वर्तते वा ? यदि स्यात् गौतमोक्तरीत्या सर्वा अपि संस्थाः चत्वारिंशत्संस्कारान्तर्गतत्वेन यतः परिगणिताः अतः नित्या इति ये अभिप्रयन्ति तैः नित्यत्वेन आप्तवाजपेयः अनुष्ठेयः उत संस्थावाजपेयः । संस्थावाजपेयाद्भिन्नः आप्तवाजपेयः इति मतेऽपि तस्यापि संस्थावाजपेयवत् नित्यत्वं उत काम्यत्वमिति विचारणीयम् । तथा हि—श्रीमहामहोपाध्यायैः चिन्नस्वामिशास्त्रिमहोदयैः य· त· प्रकाशे संस्थास्वन्तर्गतः संस्थावाजपेय इति व्यवहि्यते इत्युक्तम् । आर्षेयकल्पकारोऽपि तिस्रस्संस्था इत्युक्त्वा संस्थावाजपेयस्तु सूत्रकारेणोक्तः इत्यकथयत् । अतः तस्मिन्मते संस्थावाजपेयो नास्ति किन्तु आप्तवाजपेयः । तै· तां· ब्राह्मणयोरपि अयमेव वाजपेय उक्तः । मीमांसकमते तु यद्यपि चतस्रस्संस्था इत्युक्तं, तथापि सप्तसोमसस्थासु मध्ये अवशिष्टाः त्रिस्रः अन्तर्भूता इत्युक्तत्वात् संस्थावाजपेयः अस्तीति प्रतीयते । स· श्रौ· सूत्रकारैः पञ्चसंस्थाः प्रदर्शिताः । "अग्निष्टोम उक्थ्य" इत्यादि तत्सूत्रव्याख्याने

आपस्तम्ब-भरद्वाजादीनामपि एवमेवेति वाजपेयः न प्रकृतिः, नापि ज्योतिष्टोमः इत्युक्तत्वात् तेषां मतें संस्थावाजपेयः नोक्त इति प्रतीयते । अपि तु काम्यवाजपेयः उक्त इति । वैखानससूत्रे तावत् काम्यवाजपेयमुक्त्वा अन्ते संस्थावाजपेयः अस्तीति तत्प्रयोगः एवमिति कथितं तैः । शांखायनसूत्रेऽपि काम्यवाजपेय एवोक्तः यथाक्रमं अयमेव विन्रियते-तथा हि–तै· ब्रा· 1-3-2

"य एवं विद्वान्वाजपेयेन यजते" गच्छति स्वाराज्यम् । "अग्रँ समानानां पर्येति" इति श्रुत्या स्वाराज्यकामिनः वाजपेयः विहितः । एवमेव ग्रहग्रहणप्रसङ्गे "सप्तदश प्राजापत्या ग्रहा गृह्यन्ते । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै ।" 1-3-3. इति सप्तदशग्रहाः विहिताः ।

ग्रहेषु ग्रहद्रव्यं विधत्ते

"सोमग्रहाँश्च सुराग्रहाँश्च गृह्णाति एतद्वै देवानां परममन्नम् । यत्सोमः । एतन्मनुष्याणां । यत्सुरा । परमेणैवास्मा अन्नाद्येनावरमन्नाद्यवरुन्धे" ।

अत्र सोमरसग्रहणेन शाल्यन्न मुद्गान्नाद्यरूप, परमान्नप्राप्तिः । सुराग्रहणेन यावनाल, प्रियंग्वाद्यवरान्न, प्राप्तिश्च भवति । अत्र अध्वर्युः "अयाविष्ठा जनयन्कर्वराणि ।" इति सप्तदश प्राजापत्यान् ग्रहान् गृह्णाति "कुविदङ्गे"त्यपरस्मिन्नवरे प्रतिप्रस्थाता सप्तदशभिरुपयामैः । "सुराग्रहान् गृह्णातीति" द्विविधग्रहणं विधत्ते ।

एवं सोमग्रहाणां सुराग्रहाणां च व्यतिषङ्गः विहितः ।

"सोमग्रहाँश्च सुराग्रहाँश्च व्यतिषजति" इति व्यतिषङ्गम् व्यतिषज्येत्यर्थः । अध्वर्युणा प्रथमे सोमग्रहे गृहीते सति प्रतिप्रस्थ प्रथमं सुराग्रहं गृह्णीयात् । ततः द्वितीये द्वितीयम्=सोमव्यतिषङ्गः सोम ग्रहाणां प्रचारः सुराग्रहाणां वाजसृद्भ्यः दानं च उक्तम् । "प्रतितिष्ठन्ति सोमग्रहैः" प्रतितिष्ठन्ति—प्रचरन्ति=जुह्वतीत्यर्थः । "वाजसृद्भ्यस्सुरा

ग्रहान्हरन्ति" वाजसृतः अन्नस्य अर्जयितारः वैश्याः तेभ्यः सुराग्रहान् रहितान्दद्युः । इति सप्तदश पशवः विहिताः "सप्तदशेति" ।

"सप्तदश प्राजापत्यान्पशूनालभते" इति "एवमेव सप्तदश प्रव्याधानाजिं धावन्ति" सप्तदशँस्तोत्रं भवति । सप्तदश सप्तदश दीयन्ते । सप्तदशः प्रजापतिः प्रजापतेराप्त्यै" इति । भा॰ प्रकर्षेण वलाधिक्येन विध्यन्ते=मुच्यन्ते बाणाः यावत्परिमाणेषु देशविशेषेषु तावत्परिमाणदेशाः प्रव्याधाः । ते च सप्तदश संख्याकाः । तेषामन्ते अवधित्वद्योतनाय काचिदौदम्बरीशाखा निखन्यते ।

तत्पर्यन्तम् रथारूढा धावेयुः । अस्मिन्वाजपेये सामवेदप्रसिद्धं यत्स्तोत्रम् तत्सप्तदशसंख्यया आवृत्तियुक्तं भवेत् । तदावृत्तिप्रकारः तै॰ सं॰ 1-8-13 "समिधमातिष्ठे"त्यनुवाके विवृतः दक्षिणात्वेन दातव्यानां रथादीनां गोशतान्तानां द्रव्याणां मध्ये एकैकद्रव्यं सप्तदशसंख्यायुक्तं दद्यात् । तच्च आपस्तम्बो दर्शयति । दक्षिणाकाले सप्तदश रथान् ददाति, सप्तदश अनांसि । सप्तदशाश्वान्, सप्तदश हस्तिनः, सप्तदश निष्कान्, सप्तदश दासीः, सप्तदश अजाः, सप्तदश अवीः, सप्तदश वासांसि, सप्तदश गवां शतानि" इति ।

अस्मिन् तैत्तरीयब्राह्मणे वाजपेय-विशेषनाम्नः अनिर्दिष्टत्वेऽपि यतः आप्तवाजपेय कुरुवाजपेयसम्बन्धिनः विशेषा एवाभिहिताः । अतः अत्रोक्तः आप्तवाजपेय एवेति सुस्पष्टं जानीमः ।

अथ वाजपेय इति

य॰ त॰ प्रकाशे वाजपेयसंस्थायां प्रातर्माध्यन्दिनसवने अग्निष्टोमवदेव, तृतीयसवनेऽपि षोडशिग्रहस्तोत्रान्तं षोडशिवदेव । तदनन्तरं वाजपेयसंज्ञकं एकं स्तोत्रम् । एकश्चमसगणो होतृचमसगणो मुख्यः । स्तोत्रं च सप्तदशस्तोमकं, शस्त्रं होतुरेव । अयं संस्थान्तर्गतः संस्थास्वेव गण्यते । अतः संस्थावाजपेय इत्यपि व्यवहारोऽस्य । नायमापस्तम्ब-बोधायनादिभिर्विहितः ।

न वा याजुषीशाखासु विधानमस्य दृश्यते । छन्दोगसूत्रे च अयमेव विहित इति कृत्वा केचित् याज्ञिकाः अनुतिष्ठन्ति । तैत्तरीयाद्युक्तो वाजपेयः इतो भिन्नः । तत्र "सप्तदश दीक्षा" इत्यादि उक्तम् । अनेन सप्तदशदीक्षा, सप्तदश प्राजापत्यादि पशुयुक्तः इदानीम् अनुष्ठीयमानः वाजपेयः, संस्था-वाजपेयाद्भिन्न इति प्रतीयते इति ।

आर्षेयकल्पेऽपि सप्तदश दीक्षादीन् उक्त्वा उदवसानीयान्तं प्रकृतिवत् इत्यभिधाय संस्थावाजपेयस्तु सूत्रकारेणोक्तः इति संस्थावाजपेयः अन्यः विद्यत इति क्रत्व तरप्रसङ्गे अन्यः वाजपेयः अभिहितः । अतः स्वमते वाजपेयः न संस्थावाजपेयः । किन्तु क्रत्वन्तरभूत इति प्रतीयते । तथा हि-आर्षेय-कल्पे 'अथ वाजपेयः' इति, तीव्रस्तुदिति, क्रत्वन्तरनिरूपणानन्तरं षष्ठो वाजपेयः "सप्तदश उक्थ्यः षोडशिमान् सप्तदशी" तां. ब्रा. 1-18-6 इत्यनु-वाकद्वयेन उक्तः । तथा हि-तस्य सूत्रं- "यं ब्राह्मणास्सराजानः पुरस्कुर्वीरन् स वाजपेयेन यजेत" ला. श्रौ. 8-11-12 इत्यादि खण्डद्वये सुब्रह्मण्यायां 'शक्रागच्छ, विश्वे ब्राह्मण' इति विशेषः, अनिरुक्त्प्रातस्सवनत्वात् । स्तोत्र-क्लुप्तिमाहेति स्तोत्रक्लुप्तिमभिधाय अन्ते भक्ष आहृते- "श्येन" इति अवेक्ष्य "इन्द्रविन्द्रप्रीतस्येन्द्रियावतः त्रिष्टुप्च्छन्दसस्सर्वगणस्ये"ति भक्षणम "त्रिष्टुप्छन्दसा वाजपेयसाम्ना भक्षयेत्" इति वचनात् । अथ स्तोम-विमोचनादि उदवसानीयान्तं प्रकृतिवत् । इत्यभिधाय ततः "संस्था-वाजपेयस्तु सूत्रकारेणोक्तः अनतिरात्रो षोडशिमान् । तस्य बृहत्सप्तदश स्तोत्रं स्यात् पञ्चदशं वा श्रौ. सू. 8-12-6-10 इति तत्र षोडशि चमसि-भक्षणान्तं ज्योतिष्टोमवत् अविशेषेण कृत्वा निष्क्रमणादि यजमान उपह्वान्ते कृते स्वासु बृहत्या पञ्चदशस्तोमेन स्तवनम् । केचित् किमित्ते इति बृहत्या सप्तदशस्तोमेन स्तवनमिच्छन्ति । तत्र मूलं मृग्यम् । अन्यत्तु सर्वं सूत्रत एव अवधार्यम् "प्रत्यवरोहणीयेनैव अन्ततो यजेत" इत्युक्तम् । प्रत्यवरोहणीयमाह । क्लुप्तो ज्योतिष्टोमः प्रत्यवरोहणीय इति विश्वरूपाज्योतिर्गानयोः धूर्गानां च निवृत्तिः, शेषं प्रकृतिवत् इति वाजपेयः इति, आप्तवाजपेयः कुरुवाजपेयश्च प्रदर्शितौ ।

अयं वाजपेयः ताण्ड्यब्राह्मणे लाट्यायनश्रौतसूत्रे च उक्त इति यतः आर्षेयकल्पकारेण सूचितम् । अतः तदेव विव्रियते तां ब्रा॰ अष्टादशाध्याये वाजपेयाख्यमेकाहमाह ।

"सप्तदश उक्थ्यषोडशिमान्-सप्तदशी" अयं सप्तदशस्तोमकः उक्थ्यसंस्थः स च उक्थ्यः षोडशिमान् । षोडशिस्तोत्रयुक्तः । एवं सति सषोडशिक-उक्थ्यः षोडशिस्तोत्रवान् अतिरिक्तोक्थ्येन सह सप्तदशी सप्तदशस्तोत्रवान् कर्तव्यः । अनेन स्तोत्राणां साप्तदश्यं, प्रतिस्तोत्रं सप्तदशस्तोमत्वञ्च अस्याभिहितम्, अत एव अयं वाजपेयक्रतुः स्तोत्रसाप्तदश्येन स्तोमसाप्तदश्येन च "अन्यत्र" सप्तदशः प्रजापतिः इत्यनया श्रुत्या, प्रजापतिस्वरूपत्वेन अभिहितः ।

"तस्य नानावीर्याणि सवनानि" इत्यादि ग्रन्थे सवनानां वैचित्र्यं, नानावीर्यत्वञ्च, अभिहितम् । ततः "इयं वै रथन्तरं अस्यामेवाध्यभिषिच्यते ।" अनेन रथन्तरगानकाले अभिषेकः कर्तव्यः इत्युक्तं भवति । अभिषेकप्रसङ्गे "तस्माद्वाजपेययाज्यप्रत्यवरोही" इति वाजपेययाजिनः स्त्रापेक्षया अधिकमपि पुरुषं दृष्ट्वा नान्दोलिकादिभ्यः अवरोहेत्, इति व्रतविशेषमाह । एतद्व्रतं "यावज्जोविकमित्येके" "यावत्प्रत्यवरोहणीययागमित्यपरे" प्रत्यवरोहणीयश्च ज्योतिष्टोम इत्यार्षेयकल्पे उक्तम् । बृहस्पतिसवः प्रत्यवरोहणीय इति बह्वृचः । इति कल्पभेदेनोक्तः । एवमेव षष्ठखण्डात्मकग्रन्थेन वाजपेयविधिः । तस्मिन्वाजपेये प्रतिस्तोत्रं सप्तदश स्तोमत्वं स्तोत्राणां साप्तदश्यञ्च क्रतोः प्रजापतिरूपत्वं प्रातस्सवन-माध्यन्दिनसवन-तृतीयसवन-विशेषाः तत्तत्सामविधयः, तत्तत्साम्नां नैरन्तर्येण जामितादोषस्य आशङ्कापरिहारौ च, बृहत्साम्ना समाप्तिः कर्तव्येति च, इत्यादयो बहवो विशेषाः प्रतिपादिताः ।

अथ सप्तमखण्डे वाजपेयशब्दनिर्वचनप्रसङ्गे वाजपेययागे अधिकारी निरूपितः । ऋत्विजां हिरण्यमालित्वं, सर्वेषामाजिधावनं, यजमानस्य काष्टाग्रे आरोहणं, "बृहदन्त्यं भवति " इति श्रुत्यनुसारेण "विष्णो

शिपिविष्टवतीषु" इति मन्त्रे षोडशिनः परं बृहत्साम उत्तमं यथा भवति तथा गेयमित्यादि धर्मविशेषाणाम् उक्तत्वात् तीव्रस्तुन्नामक-ऋत्वन्तरप्रसङ्गे अस्य वाजपेयस्य अभिहितत्वाच्च अयं वाजपेयः काम्य-आप्तवाजपेय इति न तु संस्थासु मध्ये परिगणितः नित्यत्वेनाभिप्रेतः वाजपेय इति च सुस्पष्टं प्रतीयते । सत्याषाढश्रौतसूत्रेऽपि अयमेव वाजपेयः विवृतः । (13-प्र 1 प.) "एवं तावत् सर्वेज्योतिष्टोमः" (स॰ श्रौ. 1-1) इति सूत्रकृत् न्यायसूत्रे प्रदर्शितः । "सर्वकामो अग्निष्टोमः" इत्यादिना सूत्रकारेण अग्निष्टोमशब्देन वक्ष्यमाण-सर्वैकाह-अहीनसत्र-मूलप्रकृतिभूत-अग्निष्टोमसंस्थां व्याख्याय "उक्थ्यः, षोडशि, अतिरात्रः अप्तोर्यामश्च अग्निष्टोमस्य गुणविकाराः (स॰ श्रौ॰ 6-8) पञ्चसंस्थाश्च व्याख्याताः । अथेदानीं षोडशिगुणविकार-भूतां अवशिष्टामेकां वाजपेयसंस्थां व्याख्यातुं शिष्यावधानाय प्रतिजानीते । "शरदि वाजपेयेन यजेत" इति, वाजः देवान्नरूपः होमः पेयः यस्मिन्यागे स वाजपेयः इत्येकं निर्वचनम् । यस्मादेतेन यज्ञेन देवाः वाजं फलरूपं अन्नमाप्तुमैच्छन् तस्मादन्नरूपो वाजः पेयः प्राप्यः येन स वाजपेयः । अपरं नामधेयनिर्वचनम् ।

वाजपेय इति कर्मनामधेयम् । न हि द्रव्ये, गुणे वा प्रसिद्धिरस्य स च शरदि भवति । "शरदि वाजपेयेन यजेते"ति, सूत्रान्तरेऽपि वचनात् । अत्र संभारानाह बोधायनः । वाजपेयेन यक्ष्यमाणो भवति, स उपकल्पते कृष्णाजिनं, सुवर्णरजतौ च, रुक्मौ, बस्ताजिनम्, शतमानं हिरण्यम् । सप्तदश सुवर्णानि कृष्णलानि, हिरण्यपात्रं मधोः पूर्णं, औदुम्बरीं, रथचक्रं सप्तदशारं, सप्तदशफलकाञ्च, श्रितियूपं च, तूपरं चतुरश्रं, सप्तदशारत्निं, गोधूमकल्माषीं, उष्णीषं, नैवारं सप्तदश शरावं, सप्तदश ऊषपुटान्, सप्तदश वायव्यानि, सप्तदश पृथुबृध्नानुपयामान्, सतं च वालं च, सप्तदश रथान्, सप्तदश दुन्दुभीन्, सप्तदश हस्तिनः, सप्तदश दास्यः, सप्तदश अनांसि युक्तानि, सप्तदश गवां शतानि, वयसो वयसो वा सप्तदश सहस्रं वा तस्मिन्हि सर्वाणि वयाँसि भवन्ति, चतुर्विंशति पशून्,

एकपञ्चशतमश्वान् खादरीं वितृण्णीं वधैर्यताम्, "प्रज्ञाता अग्निष्टोमिका-स्संभाराः स ग्रीष्मस्य जघन्यहस्सु "पुरस्तादाषाढ्यै पौर्णमास्यै दीक्षेत" (बो.श्रौ. 11-1) इति वाजपेयौ द्विप्रकारौ । आप्तवाजपेयः कुरुवाजपेयश्च । अस्मिन्क्रतौ नाग्निचयनम् । चिन्वीत वाजपेये अग्निमिति बोधायनः । न चिन्वीतेति शालीकिः, बो श्रौ. सू. 22-12-1 इति प्रतिषेधवचनात् । केचिदत्रापीच्छन्तीति छन्दोगमतात्, चयनं कार्यमिति । ज्योतिष्टोम-संस्थाभूतोपि वाजपेय इति वैखानसोक्तेश्च आपस्तम्बेन तु क्रत्वन्तरत्वेन वाजपेयः उक्तः । क्रत्वन्तरत्वं वाजपेयस्य, द्विप्रकारत्वञ्च । तत्र आप्त-वाजपेयः प्रथमत उच्यते । तत्र वाजपेये अधिकारं उन्नयति । एतावदुक्त-विशेषैः स्वेन आप्तवाजपेय-कुरुवाजपेयावेव विब्रियेत । अस्मिन्वाजपेये अग्निचयनं कार्यम्, न वा, इत्यस्मिन्विषये मतभेदं प्रदर्श्य छन्दोगमतात् अग्निचयनं कार्यमिति उक्तम् । वैखानससूत्रे ज्योतिष्टोम-संस्थाभूतवाजपे-यस्य सत्वात्-अस्य वाजपेयस्य ज्योतिष्टोमात् क्रत्वन्तरोक्तावेव आपस्तम्ब-स्यापि सम्मतिं प्रदर्श्य, अत्र "ब्राह्मणो राजन्यो वा" इति सूत्रेण ब्राह्मण-राजन्ययोरधिकार इति उपपादितम् । देवानां मध्ये इन्द्राबृहस्पतिभ्यां अनुष्ठितत्वात् मनुष्येष्वपि ब्राह्मणराजन्ययोरेवाधिकारः, न तु वैश्यस्य । अत एव आपस्तम्ब आह— "शरदि वाजपेयेन यजेत ब्राह्मणो राजन्यो वर्धिकामः." आप. श्रो. 18 "तस्य षोडशिना कल्पो व्याख्यातः तस्य वाजपेयस्य षोडशिवत्कल्पो विधिः । अत्र षोडशिनो विद्यमानत्वात्" । प्रयोजनं सोमविक्रयणकाले "शुंठ्या अधीलोधकर्णया सोमं क्रीणाति ।" अथ वा सप्तदशदीक्षापक्षे शरदि दशम्यामुपक्रमः, त्रयोदशदीक्षापक्षे चतुर्दश्यामुपक्रमः । उभयोः पक्षयो पर्वणोः स्तुत्या भवति । अथ प्रातरग्नि-होत्रं हुत्वा आप्तेन वाजपेयेन यक्ष्ये इत्युक्त्वा प्रजापतिमवाप्नवानीति फल-निर्देशः ऋद्ध्यर्थमिति वा, नित्यो वा "नित्यवदेके समामनन्ति" इति वचनात् नित्ये च नित्यवत्फलनिर्देशः । अन्नार्थमिति वा, सप्तदशस्सर्वो भवति । सर्वस्तोमानि सप्तदशस्तोमानि भवन्ति । स्तोमादयस्सर्वेऽपि सप्तदश इत्यादि, इडोपह्वानान्तमुक्त्वा ततः एवं सूचितम् । सू- "षोडशि

चमसानुन्नयन् एकस्मै चमसगणाय राजानमतिरेचयति ।"तैः प्रचर्यातिरिक्त-स्तोत्रीय-होतृचमस-मुख्याँश्चमसानुन्नयति । स्तुतशस्त्रे भवतः शस्त्रं प्रतिगीर्य प्राजापत्यानां मुख्यग्रहमध्वर्युरादत्ते ऋत्विज इतरान् (28) सवनीय-पुरोडाशप्रचरणादि सौमिकं कर्म षोडशिचमसप्रक्षालनान्तम् ।

अथ होतृचमस-मुख्यान्दश चमसानुन्नयेत, ततस्संप्रैषः बृहत्स्तोत्र-मुपाकरोति इति आपस्तम्बः प्रचरणकाले होतृचमसमध्वर्युरादत्ते, चमसाँश्च-मसाध्वर्यवः, ऋत्विज इतरान् सोमग्रहान् । सू·"सुराग्रहणं मुख्यं प्रतिप्रस्ताता, वाजसृत इतरानादत्ते चमसाग्ँश्चमसाध्वर्यवः" इत्यादिना, सोमग्रहाणां अध्वर्युणा प्रचारः होमः, सुराग्रहाणां अनुकम्पनं, वाजसृद्भ्यः समर्पणं च, इत्यादिविशेषाः उक्ताः । ब्राह्मणतर्पणान्तं कृत्वा, उदवसानीयान्तं समाप्यते वाजपेयः ।

अथ कुरुवाजपेयस्य कर्म ।पूर्वोक्तकाले वाजपेयेन यक्ष्येति संकल्पः । दक्षिणाविभागः समष एव । "न यावदध्वर्यव" इति । एवं आप्तवाजपेय-कुरुवाजपेयौ उक्तौ । ततः वाजपेयेनेष्ट्वा सौत्रामण्या यजेत । न कञ्चन प्रत्युत्तिष्ठतीत्यापस्तम्बः । श्वेतच्छत्रो भवति इति विज्ञायते ।"

एष एव वाजपेयः आपस्तम्बसूत्रे, कात्यायनसूत्रे, द्राह्यायणादि-सूत्रेषु च उक्तः । तथा हि— कात्यायनश्रौतसूत्रे चतुर्दशाऽध्याये—

1. "वाजपेयः शरद्यवैश्यस्य ।" इति वाजपेये

2. नानदीक्षाः परियज्ञाः कालभदात् ।

3. सप्तदशदीक्षाः इत्यादिसूत्रैः आप्तवाजपेयधर्मा एवोक्ताः ।

लाट्यायनश्रौतसूत्रं "यं ब्राह्मणा राजानश्च पुरस्कुर्वीरन्–स एतेन वाजपेयेन यजेत" व्या=इतःपूर्वं तीव्रसुन्नामकक्रतुरुक्तः । सांप्रतं वाजपेयेनेति वाजपेयः आम्नातः । स उच्यते । यं ब्राह्मणाः= यमित्युद्देशः राजानश्च पुरस्कुर्वीरन्- स पुरस्कारो नाम पूजा– महस्थापनं पुरस्कृतस्सन् वाजपेयं यजेत यथोद्देशेन निर्देशः । किमर्थं ? यं स इति ब्राह्मणं राजभिः पुरस्कृ

वाजपेयेन यजेतेत्येवं वक्तव्यमासीत्। उच्यते। तैत्तरीयके। ब्राह्मण-क्षत्रिययोरेव वाजपेयः न तु वैश्यस्येति। यथा एतस्मिन्कल्पकारः आह। "शरद्यवैश्यस्यति" सोऽयमाचार्यः एतं विधिं उद्देशनिर्देशाभ्यामाह। तस्य पौर्णमास्यां दीक्षित्वा त्रयोदश दीक्षाः स्युः" "सप्तदश वा, अमावा-स्यायां दीक्षित्वा मासमिति गौतमः"। "सवत्सरमिति धानंजयः"षडुपसत्कश्च साग्निक्षित्यस्यादिति" पुरस्तादुपरिष्टाच्च ज्योतिष्टोमेनेति, बृहस्पतिसवेनैव पुरस्तादुपरिष्टाच्च परियजेतेति धानञ्जयः। एवमेव द्राह्यायणोऽपि—

"प्रत्यवरोहणीयेनैवान्ततो यजेत नेतरेषां केनचित् गौतमः" व्या= गौतमाचार्य आह प्रत्यवरोहणीयेनैवान्ततो यजेत् इतरेषां न केनचिदिति। इतरे कल्पास्तु एकेषामेव गौतमस्यानिष्टाः बोधायनोऽपि-11-1-वाजपेयेन यक्ष्यमाणो भवति "स उपकल्पयते" प्रज्ञात-अग्निष्टोमिकास्संभाराः। स ग्रीष्मस्य जघन्यः पुरस्ताषाढ्यै पौर्णमासी दीक्षते। तस्य त्रयोदश दीक्षाः, तिस्र उपसदः, सप्तदश्यां प्रसुत इत्यादि विकल्पितदीक्षापक्षाः अभिहिताः। सामवेदीयानां दशश्रौतसूत्राणि, द्राह्यायण- 2 अनुपदम्, निदानं, मशक-प्रणीतम्, उपग्रन्थसूत्रम्। क्षुद्रकल्पसूत्रम्, लाट्यायन सूत्रम् इत्यादीनि वर्तन्ते। तेषु सर्वेष्वपि एष एव वाजपेयः आप्तकुरुभेदेनोक्तः।

तथा हिः- ला. श्रौ. 2 द्वितीयखण्डिकायां "यं ब्राह्मणा राजानश्च पुरस्कुर्वीरन्" इति सूत्रमारभ्य अयमेव याग उक्तः। तत्र 18 सू- सप्तदशैव गावः स्युः अन्यानि सर्वाणि वर्तन्ते। तदेवं कुरुवाजपेय इत्याचक्षते।

वैखानससूत्रे तावत् सप्तदशप्रश्ने सप्तमखण्डप्रभृति यद्यपि एष एव वाजपेय उक्तः। तथापि दक्षिणाप्रदर्शनकाले गवां शतानि सप्तदश सप्त-दशैतानि ददाति। एष एव अजाविवर्जदक्षिणः दुन्दुभ्यधिकः अयमाप्तो वाजपेयः।

एकवयःप्रभृत्या पञ्चमवर्षेभ्यः वयसो वयसः सप्तदश सप्तदशै-तानि ददाति। एष कुरुः अज सप्तदशैव सोऽपि कुरुः। शिपिविष्टवतीषु

बृहता स्तुवत पञ्चदशस्तोमेन सप्तदशस्तोमेन वा स्तवनं, प्रकृतिदक्षिणः । अयं संस्थावाजपेयः इति संस्थावाजपेयोऽपि अस्तीत्युक्तम् ।

अनेन किमुक्तमिति चेत् तै. ब्राह्मणे· ताण्ड्यब्राह्मणे च सत्याषाढ-आपस्तम्ब-भरद्वाज-मशक- लाट्यायन- द्राह्यायणादि- सूत्रेष्वपि काम्यः वाजपेयः ऋत्वन्तर एवेति ऋत्वन्तरप्रसङ्गे आप्तकुरुभेदेनोक्तः । केवल-वैखानससूत्र एव ज्योतिष्टोमसंस्थाभूतोऽपि वाजपेयः उक्तः । सप्तसोम-संस्थानां नित्यत्वपक्षे अयमेव वाजपेयः नित्य इति ज्ञायते ।

ननु आपस्तम्बेन शरदि वाजपेयेन यजेत इत्यारभ्य "नित्यवदेके समामनन्ति" इति सूत्रितम् । एवमेव सत्याषाढसूत्रव्याख्यानावसरे महा-देवपण्डितेन आप्तकुरुवाजपेययोः संकल्पप्रकारमुक्त्वा "नित्यो वा, नित्य-वदेके समामनन्ति" इति वचनात् नित्यवत् फलनिर्देशः अन्नार्थमिति वा, इत्युक्तम् । अनेन आप्तकुरुवाजपेययोरपि नित्यत्वं कथितमितिचेत् उच्यते तत्सूत्रप्रणयनमात्रेण तस्य वाजपेयो नित्य इति नाभिमतमिति "नित्यवदेके" (एकेशब्दः पराभिमतसूचकः) इति पदयोः स्वारस्येनैव सूच्यते । "तेन तुल्यं क्रियाचेद्वतिः (अष्टा· 5-1-115)इति पाणिनिना क्रिया तुल्यार्थे वति-प्रत्ययः भवति इत्युक्तम्- तत्सदृश-तद्भिन्न- क्रियायां वतिप्रत्ययः । यथा ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । ननु अत्र ब्राह्मणो यथा वर्तते तथा क्षत्रि-यादिकर्तृकाध्ययनं वर्तते, इति वाक्यार्थो न सगच्छत इति चेत् ब्राह्मण-शब्दः तत्कर्तृकाध्ययने लक्षणया वर्तते । ब्राह्मणकर्तृकाध्ययनतुल्याध्ययनं वाक्यार्थः । क्षत्रियकर्तृकाध्ययनक्रिया ब्राह्मणकर्तृकाध्ययनक्रियातुल्या तद्भिन्ना चेति लक्षणसमन्वयः इति न कोऽपि दोषः इति ब्राह्मणवदधीते इत्युदाहरणस्य अर्थः सिद्धः । तेन प्रकृते नित्यक्रियातुल्यं इत्येव नित्यवत इति पदस्यार्थः । न तु नित्य इत्यर्थः । एवमेव यस्मिन् यस्मिन् विषये एके इतिपदम् सूत्रकाराः शास्त्रकाराः वा प्रयुञ्जन्ति । तत्र स विषयः न स्वाभिमतः किन्तु पराभिमत एवेति बहुषु स्थलेषु दरीदृश्यते । तथा हि-मी शा· भा· तृतीयपादे कल्पसूत्राधिकरणे "प्रयोगशास्त्रमिति चेत्" इति

सूत्रमधिकृत्य इह कल्पसूत्राणि उदाहरणमिति भाष्यम् । तत्र कल्पसूत्राणां स्मृत्यधिकरणन्यायेन वेदमूलकत्वेन प्रमाण्ये सिद्धेऽपि इदानीं स्मृत्यपेक्षया कल्पसूत्राणां वेदत्वेन वा वेदतुल्यत्वेन वा प्रामाण्यं भवतु इति पुनः विचार्यते इत्युक्तम् । तदेवोक्तं वार्तिके—

"कल्पसूत्राण्युदाहृत्य एतद्विचार्यते ।
किमेतेषां स्वतन्त्राणां प्रामाण्यं वेदवद्भवेत् ।
किं वा वेदत्वमेतेषां मन्त्रब्राह्मणवन्मतं
वैदिकार्थप्रबंधाद्धि नैतेषां स्मृतितुल्यता ।।"

के कल्पाः ? कानि सूत्राणि ? इति तत्प्रसङ्गे तल्लक्षणमुक्तम् —

"सिद्धरूपः प्रयोगो यैः कर्मणामनुगम्यते ।
ते कल्पाः लक्षणार्थानि सूत्राणीति प्रचक्षते ।।
कल्पनाद्धि प्रयोगाणां कल्पोऽनुष्ठानसाधनम् ।
सूत्रन्तु सूचनात्तेषां स्वयंकल्पप्रयोगकम् ।। इत्यादि ।

भवतु वा स्मृत्यादिप्रामाण्यविषयेऽपि पुनर्विचारः इतःपूर्वं तासां वेदमूलकत्वेन प्रामाण्यमुक्तम् । इदानीं तासामपि वेदत्वं वा तैस्तुल्यप्रमाणता वा वक्तव्येति ।

"तासामपि वेदत्वे तैर्वा तुल्यप्रमाणता ।
स्वातन्त्र्याच्छक्यते वक्तुं न तु मूलानुमानतः" इति ।

अथ वा शिक्षाव्याकरणादिषडङ्गानां प्रयोगशास्त्रत्वम् । यथा वेदमन्त्रोच्चारणरूपप्रयोगविषयत्वं शिक्षाशास्त्रस्य लौकिक-वैदिक-संस्कृत-भाषोच्चारणे साधुत्वाऽसाधुत्वरूपप्रयोगविषयत्वं व्याकरणस्य यज्ञानुष्ठान-प्रयोगविषयत्वं कल्पशास्त्रस्य इत्यादि रीत्या सर्वेषामङ्गानां प्रयोगशास्त्रत्वं भवतु इति "प्रयोगशास्त्रमिति चेत्" इति सूत्रानुसारेण व्याख्याय ततः "मन्त्रब्राह्मणयोः वेदनामधेयम्" "षडङ्गमेके समामनन्ति" इति स्मृत्या अङ्गानां वेदत्वं वा वेदतुल्यत्वेन स्वतः प्रमाणत्वं वा वक्तव्येत्युच्यते ।

"यद्वा प्रयोगशास्त्रत्वमङ्गानाम् अभिधीयते । वेदत्वं वा षडङ्गेऽपि वेदत्वस्मृतिरस्ति हि" "षडङ्गमेके" इति स्मृत्या अङ्गान्यपि वेदशब्द-वाच्यानीति स्मर्यन्ते" "तस्मात्तान्यपि वेदा वा प्रमाणानि स्वतोऽथवा"इत्यादिना वेदत्वेन प्रामाण्यं वक्तव्यमिति पूर्वपक्षे प्राप्ते —

उच्यते कल्पसूत्राणां वेदत्वं वा वेदतुल्यत्वं वा न संभवति । तथा हि—

"कर्तृस्मरणदाढर्च्याच्च नैषामकृतता मता ।
तेनाऽकृतकगम्येऽर्थे स्वातन्त्र्याच्च न प्रमाणता ॥

अनेन कल्पसूत्राणां अकृतकत्वं न सिध्यति । अकृतकत्वं नाम अपौरुषेयत्वम् । अपौरुषेयत्वाऽभावात् वेदवत् स्वातन्त्र्येण प्रामाण्यं न सिध्यति । न केवलं कल्पसूत्राणामेव, किन्तु सर्वेषां वेदाङ्गानां कर्तृस्मरणदाढर्च्यात् स्वातन्त्र्येण प्रमाणता न सिध्यति । किन्तु वेदमूलकत्वेनैव प्रामाण्यं वक्तव्यमिति । किञ्च कल्पसूत्राणां वेदत्वे यथा वेदे वर्तमानप्रत्ययः लेट्त्वेन विपरिणामं लभते तथा कल्पसूत्रेष्वपि लभ्येत तथा न लभ्यते । कुत इति चेत् तत्र वेदे अर्थवादाः श्रूयन्ते । विधिवाक्यमन्तरा अर्थवादानां प्रयोजनं नास्ति । यद्विधेयं तत्स्तुत्यमिति न्यायेन अर्थवादज्ञापितस्तुतेः विधिमन्तराऽनुपपत्तेः । अर्थवाद-प्ररोचितस्सन् वर्तमानप्रत्ययः विधित्वं लभते । कल्पसूत्रेषु यतः वाक्यशेषाः न श्रूयन्ते, अत एव तेषां वेदत्वं नास्तीति "अवाक्यशेषात्" इति सूत्रेण प्रतिपादितं वाक्यशेषरूप–अर्थवादाऽभावादेव कल्पसूत्रेषु श्रूयमाणः वर्तमान-प्रत्ययः लेट्त्वेन विपरिणामं न प्राप्नोति । किञ्च वेदे "छन्दसि" इति सूत्रमधिकृत्य लिङर्थे लेट् इति सूत्रेण विपरिणामो दृश्यते । अस्य वेदत्वाऽभावात् अत्र चैतत्सूत्रप्रवृत्तिः नास्ति । तदेवोक्तं वार्तिके—

"वर्तमानापदेशोऽपि त्वर्थवादप्ररोचितः ।
विधित्वं लभतेऽन्यत्र कल्पसूत्रेषु नास्ति सः ।
पञ्चमेन लकारेण विधिर्यश्छन्दसि स्मृतः ।
मन्त्रब्राह्मणभिन्नत्वात्सोऽप्येतेषु न युज्यते ।।

— *Continued on page 125*

इति । यद्यपि मन्त्रब्राह्मणयोर्वेदनामधेयं "षडङ्गमेके समामनन्ति" इत्यनेन कल्पसूत्राणां वेदत्वं भवेत् । तथापि तर्कवत्तेषां छन्दस्त्वं नोपपद्यते । मन्त्रब्राह्मणयोरेव छन्दसा विधयस्मृताः । इति यथैव "विधिर्विधेयस्तर्कश्च वेदः" इत्येतस्मिन्दर्शने, अस्ति समस्तवैदिकतर्कोपसंहारात्मिका मीमांसापि वेदशब्दवाच्या भवति, न त्वमन्त्रब्राह्मणरूपत्वात् छन्दोनिबन्धितानि कार्याणि लभते । तथा कल्पसूत्राण्यपीति । अत्र विधिपर्यायप्रयोगशास्त्रत्वाभाव इत्यनेन छन्दसि ये विधयः स्मृताः तेषामत्र कल्पसूत्रेषु प्रवृत्तिः नास्तीत्यर्थः ।

तर्कवत्तेषां च्छन्दस्त्वं इत्यस्य विवरणं "यथा विधिर्विधेयस्तर्कश्च वेदः इति तस्य अयमर्थः दृष्टान्तविधयाप्रत्येतव्यः । यथा :— विधिर्विधेयस्तर्कश्चवेदः इत्येतद्दर्शनबलेन वैदिकतर्कोपसंहारात्मिकतर्कशब्दापरपर्यायायाः मीमांसायाः वेदशब्दवाच्यत्वेऽपि छन्दःकार्यप्रवृत्तिसमये तस्याः वेद–शब्दवाच्यत्वं न संभवति ।

कुत इति चेत् मीमांसायाः मन्त्रब्राह्मणभिन्नत्वेन छन्दस्त्वाऽभावात् अध्येतृभिः कैरपि मीमांसायां वेदशब्दप्रयोगस्य अकृतत्वात् अध्येतृपयोगमनपेक्ष्य अनया "विधिर्विधेय" इति स्मृत्या, यथाश्रुतार्थग्रहणे विधि-मन्त्र-नामधेय-निषेध-अर्थवादात्मकवेदघटक अर्थवादमन्त्रोपनिषद्भागानां वेदत्वानापत्तिः । अवेदरूपमीमांसायां वेदत्वापत्तिश्च स्यात् । अतः तन्निवारणाय अनया स्मृत्या तर्कशब्दवाच्यमीमांसायाः वेदत्वं नोच्यते । किन्तु वेदे विधायक इति विधेय इति "स एष नेति नेत्यात्मेति गृह्यते"इत्ययम् अनित्यशरीरं नात्मा भवति । किन्तु तदतिरेकेण आत्मा नित्यो विद्यत इत्येतत्प्रतिपादकः यस्तर्करूपो वेदभागः स इति च वेदस्य त्रैविध्यप्रतिपादनार्था इयं स्मृतिः, परमते तावत् विध्यादित्रयस्यैव वेदत्वप्रतिपादनपरा तथैव दार्ष्टान्तिक–स्थले । अत्रापि "षडङ्गमेके" इति सूत्रं परमते अङ्गानां वेदत्वप्रतिपादनपरं न तु स्वमते । अयमेवाभिप्रायः न्यायसुधायां 240 पुटे "छन्दसीत्यधिकृत्य लिङर्थे लोडिति" स्मृतेः नान्यत्र पञ्चमलकारोऽस्ति इत्याशयः ।

ननु छन्दश्शब्दस्य वेदविषयत्वात् पूर्वपक्षे च कल्पादीनामपि वेदत्वाभ्युपगमात्, पञ्चम लकारो युज्यत एवेति यद्यपीत्यादिना आशंक्य, यथैव छन्दश्शब्दस्य गायत्र्यादिछन्दोयोगात् ऋङ्मात्रविषयत्वप्रतीतावपि मन्त्रान्तरेषु च ब्राह्मणेऽपि च्छन्दोनिमित्तं यस्य पदादि विधिदर्शनात् तद्विषयत्वेनाध्यवसीयते । तथैव मन्त्रब्राह्मणव्यतिरेकेण वेदशब्दाभिलप्येऽपि तर्के छन्दोनिमित्तविध्यदर्शनात् मन्त्रब्राह्मणविषयत्वाऽवसायात् वेदमात्रविषयः च्छन्दश्शब्द इत्याशयः एतदेव विवृणोति । "यथा विधिर्विधेय इति विधिः ब्राह्मणं, विधेयः मन्त्रः, तर्कः=मीमांसा, यद्यपि अध्येतृभिः मीमांसायां वेदशब्दाऽप्रयोगात् तदनपेक्षया च एतया स्मृत्या विध्यादीनां वेदत्वोक्तेः श्रुत्या विध्युद्देश्यस्यैव विधिशब्दवाच्यत्वेन अर्थवादमन्त्रोपनिषदामवेदत्वापत्तेः विषयत्वतर्कत्वाभ्यां च अग्निहोत्रादि न्यायविस्तारादीनामपि वेदत्वापत्तेः, नानया स्मृत्या तर्कस्य वेदत्वमुच्यते । किन्तु कश्चित् वेदभागः विधायकः, कश्चित् विधेयः । कश्चिच्च "स एष नेति नेत्यादिः । अनित्यशरीरादिव्यतिरेकेण नित्यात्मप्रतिपादनादिरूपतर्कानुरूपत्वात् तर्क इति त्रैविध्यं वेदस्योच्यते । तथापि विध्यादित्रयस्य वेदत्वप्रतिपादनार्था इयं स्मृतिरिति परमताभ्युपगमेन अयं दृष्टान्त इति सूचनार्थं एतस्मिन् दर्शने सति इत्युक्तम् । यत्तर्कशब्दवाच्यायाः मीमाम्सायाः वेदत्वं पराभिमतं न स्वाभिमतमिति तथैव कल्पसूत्राणामपि "षडङ्गमेके" इति सूत्रेण यद्वेदत्वमुक्तं तदपि परमतमेवेति वार्तिककारैः भगवद्भिः भट्टपादैः प्रत्यपादि । तथा हि —

"यः पुनर्वेदसंवादः स तत्पूर्वतयेष्यते ।
तदर्थानुगमाच्चैषां न स्वतन्त्रप्रमाणता ॥
वेदशब्दाभिधेयत्वं नैषामध्येतृषु स्थितम् ।
षडङ्गमेक इत्येतन्न च सिद्धान्तभाषितम् ॥ इति

एतावत्पर्यन्तं शाबरभाष्यवार्तिक–न्यायसुधादि–ग्रन्थेषु षडङ्गमेके इति सूत्रप्रोक्त 'एके' इति शब्देन अङ्गानां वेदत्वं न स्वाभिमतमिति सूचितं तदुपोद्बलयितुं "विधिर्विधेयस्तर्कश्च वेदः" इति स्मृत्या विध्यादि-

त्रैविध्यस्यैव वेदत्वं पराभिमतं न स्वाभिमतमिति "विधिमन्त्रनामधेय-निषेधार्थवादानां" पञ्च भागानामपि वेदत्वस्य अन्यत्र उक्तत्वात् इति यथा दृष्टान्ततया उक्तम् । एवमत्रापि "षडङ्गमेके" इत्यनेन कल्पसूत्रादीनां वेदत्वं पराभिमतमेव न स्वाभिमतमिति यथा, तद्वदत्रापि वाजपेयप्रकरणे आपस्तम्बेन 'नित्यवदेके समामनन्ति' इति सूत्रे प्रणीतेऽपि, सत्याषाढसूत्रव्याख्यानावसरे महादेवशास्त्रिपण्डितमहोदयैः "नित्यवदेके समामनन्ति" सूत्रमुदाहृत्य तत्सूत्रानुसारेण यदि नित्यत्वेन संकल्पः कृतः स्यात् तदा नित्यवत् तेन परमेश्वरं प्रीणयानि इति संकल्पः कर्तव्य इत्युक्तत्वेऽपि आप्तवाजपेयकुरुवाजपेययोः नित्यत्वं पराभिमतमेव न स्वाभिमतमिति उपरितनग्रन्थदृष्टान्तेन स्पष्टं प्रतीयते ।

एवमेव अन्येषु ग्रन्थेष्वपि 'एके' शब्दघटितसूत्रव्याख्यानावसरे तत्तत् प्रतिपादनार्थः पराभिमत एव न स्वाभिमत इति च व्याचख्युः । यथा आ-ध-सू- 2-6-14-5 "ज्येष्ठो दायाद इत्येके" उज्ज्वलव्याख्या । एके मन्यन्ते ज्येष्ठ एव पुत्रः दायार्हः । इतरे तु तमुपजीवेयुरिति ।

"तच्छास्त्रैर्विप्रतिषिद्धम्" 2-6-14-10 ज्येष्ठो दायाद इति यदुक्तं तच्छास्त्रैर्विरुद्धम् इति । अतः एकेषां अभिप्रायः न स्वीकार्य इति तात्पर्यार्थः । किञ्च निर्णयसिन्धुव्याख्यानरूपकृष्णंभट्टीये उपनयनप्रकरणे अग्निकार्यकरण-विधानप्रसङ्गे "सायमेव अग्निमिन्धीतेत्येके" इति लौगाक्षिवचनमुदाहृत्य सायमेव अग्निकार्यं कुर्यात् इत्युक्तम् । आ ध सू "अग्निमिध्वा परिसमूह्य समिध आदध्यात्""सायं प्रातर्यथोदवेश" इति सायंप्रातःकालयोः अग्निकार्यं कर्तव्यमित्युक्त्वा "सायमेवाग्निपूजेत्येके" 'एके' पदेन पक्षान्तरमित्येव ग्रहीतव्यम् । बहुषु गृह्यसूत्रेषु बहुस्मृतिषु च सायंप्रातरित्युक्तत्वात् । किञ्च तै· प्रा· 1-47 "सर्वः प्रवण इत्येके" प्रवणशब्दः स्वरितपर्यायः । सव्यञ्जन एव स्वरितः आदित आरभ्य सर्वः प्रवणो भवतीत्येके आचार्याः । तदुपरितनसूत्रं "आदिरस्योदात्तसमश्शेषोऽनुदात्तसम इत्याचार्या" 1-46 एतत्सूत्रव्याख्याने तदुपरितनसूत्रेषु ये शाखान्तरीयाः स्वरिताः उक्ताः तेऽस्माकं नेष्टाः । तदनन्तरं सर्वप्रवणसूत्रमपि एके शब्दघटितं अनिष्टमित्यु-

क्तम् । अतः तै॰ प्रा. 18-1 "ओंकारस्तु प्रणव एकेऽर्धतृतीयमात्रं ब्रुवते" प्रणूयते, प्रस्तूयते, प्रारभ्यते अनेन वेद इति प्रणवः ओङ्कारः । तस्मिन् य ओङ्कारः तमेके आचार्याः अर्धतृतीयमात्रं भणन्ति । अर्धं तृतीयं यासां मात्राणां ता अर्धतृतीयाः तावन्त्यो मात्राः यस्य सः तथोक्तः ।

"अर्धतृतीयमात्रमेके ब्रुवते ।" प्रणवे साधंमात्रद्वयं, ओकार इत्यर्थः तदेतत् शिक्षाकारोक्तं परमतत्वेन उपन्यस्तम् । ग्रन्थविस्तरभीत्या एतावता एके-शब्दविचारप्रसङ्गेन अलम् । प्रकृतमनुसरामः-"नित्यवदेके समामनन्ति" इति सूत्रेण वाजपेयाद्भिन्नं नित्यं यत्कर्म तत्सदृशं तद्भिन्नं च वाजपेयाख्यं कर्मेत्युक्तं न तु नित्यमिति । तदपि सूत्रे एके-शब्दप्रयोगात् बहुग्रन्थ-स्वारस्याच्च न स्वाभिमतं किन्तु पराभिमताभिप्रायकमिति अवगन्तव्यम् । अनेन ग्रन्थेन वाजपेयः आप्त–कुरु-संस्थाभेदेन त्रिविधो वर्तते इति । तेषां मध्ये आप्तकुरुवाजपेययोः "वाजपेयेन स्वाराज्यकामो यजेत", अथवा "अन्नाद्यकामो वा" इति वचनद्वयन विहितं वाजपेयाख्यं कर्म काम्यमेवेति स्पष्टम् । यद्यपि मीमांसकमते अग्निष्टोमातिरिक्तानां सर्वासां संस्थानां काम्यत्वमेवेति सिद्धान्तः ।

गौतमीयवचनं संस्थावाजपेयपरमिति निरूपणम्

तथापि गौतमेन चत्वारिंशत्संस्कारमध्ये पाठात् नित्यत्वमिति कैश्चिदभ्युपगम्यते । गौतमेन तु सप्तपाकयज्ञसंस्थाः सप्तहविर्यज्ञसंस्थाः सप्तसोमयज्ञसंस्थाश्च अष्टावात्मगुणाः इत्युक्त्वा "यस्यैते चत्वारिंशत्-संस्कारा अष्टौ आत्मगुणाश्च स ब्रह्मणस्सायुज्यँ सालोक्यं गच्छतीति फल-श्रवणात् काम्यता । "यो ह्येतान्संस्कारान्न करोति स पापीयान् भवती"ति दोषश्रवणात् नित्यताऽपि एषामुक्ता । तेन एतेषां नित्यत्वं काम्यत्वं भवतु इति चेदुच्यते । तावन्मात्रेण नित्यत्वं काम्यत्वमपि सर्वासामपि सप्तानाम-पि संस्थानामभ्युपेतं स्यात् । त्रिकाण्डमण्डने हि द्विप्रकाराणि इत्यस्मिंश्लोके ज्योतिष्टोम वाजपेययोरेव पृथक्कीर्तनमनुपपन्नं स्यात् । अतः "यो हि एता-न्संस्कारान्न करोतीति निन्दास्मृतिः 'नहिनिन्दान्यायेन' तानि कर्माणि

तोतुमेव प्रवर्तत इति वक्तव्यम् । यदि तया स्मृत्या नित्यत्वमभ्युपगम्येत
ादा संस्थावाजपेयस्यैव नित्यत्वमिति वक्तव्यम् ।

त्रिकाण्डमण्डनवचनमपि संस्थावाजपेयपरमिति निरूपणम्

तथा च वाजपेयश्च नित्यकाम्येषु कर्मसु मध्ये त्रिकाण्डमण्डन-
कारैरुक्तः । तथा हि :—

"द्विप्रकाराणि रूपाणि कर्माण्यन्यानि कानिचित् ।
ज्योतिष्टोमो निरूढश्च पशुं सौत्रामणी तथा" ॥
चातुर्मास्यानि दर्शश्च पौर्णमासोऽग्निहोत्रकम् ।
वाजपेय इति मे स्युः नित्याः काम्या इति द्विधा ॥

किञ्च संस्थासु मध्ये पाठात् अयं वाजपेयः संस्थावाजपेयेनैव
ावितव्यः• अन्यथा वैश्वदेवाधिकरणन्यायेन तन्मध्यपाठस्य
रूप्यापत्तिः प्रसज्येत । तथा हि "वैश्वदेवेन यजेत" इत्यत्र वैश्वदेव-
ाब्दस्य नामधेयनिमित्तेषु मध्ये पूर्वोक्तमत्वर्थलक्षणादिनिमित्तचतुष्टया-
क्षया उत्पत्तिशिष्टगुणबलीयस्त्वमिति पञ्चमं निमित्तमङ्गीकृत्य तेन नाम-
ेयत्वम् ? उत मत्वर्थलक्षणादिनिमित्तचतुष्टयान्यतमेन नामधेयत्वं वक्तुं
क्यते वा इति विचारः कृतः ।

वैश्वदेवाधिकरणन्यायेन संस्थावाजपेय इति निरूपणम्

तत्र वैश्वदेवशब्दस्य नामधेयतोक्तौ अत्र मत्वर्थलक्षणावाक्य-
ेदयोः प्रसक्त्यभावात् इति मत्वर्थलक्षणावाक्यभेदाभ्यां नामधेयत्वमनुपपन्नं
ावतु । तत्प्रख्यशास्त्रात् नामधेयत्वं भवतु इति चेत् आग्नेयादिषु विश्वे-
ेवतानां प्राप्तिर्वक्तव्या "वैश्वदेव्यामिक्षे"त्यत्र विश्वेदेवदेवतानां प्राप्तत्वेऽपि
ाग्नेयादिषु सप्तसु यागेषु प्राप्तिर्नास्ति । अतः तत्प्रख्यशास्त्रात् नामधेयत्वं
ा संभवति । किन्तु तेषु सप्तसु यागेषु अनेन "वैश्वदेवेन" इति वाक्येन
देवताविधानं वक्तव्यम् । तत्र सम्भवति । आग्नेयाद्युत्पत्ति-वाक्यैरेव

अग्न्यादिदेवतानामुपदिष्टत्वात् उत्पत्तिशिष्टदेवतावरोधेन उत्पन्नशिष्ट-देवताविधानं न संभवतीति उत्पत्तिशिष्टदेवता-रूप-गुणबलीयस्त्वात् वैश्व-देवशब्दस्य नामधेयत्वं युक्तम् ।

ननु वैश्वदेव्यामिक्षेत्यत्र विश्वेदेवदेवतानां प्राप्तत्वात् तस्यैव यागस्य तत्प्रख्यशास्त्रात् नामधेयं भवतु इति चेत् उच्यते· प्रमाणान्तरप्राप्त-यागानुवादेन वैश्वदेवशब्दस्य नामधेयत्वे प्राचीनप्रवणे "वैश्वदेवेन यजेते"ति वाक्येन वैश्वदेवयागस्य प्राचीनप्रवणदेशसम्बन्धः उपपादनीयः । तादृश-सम्बन्धविधानं वैश्वदेवेन यजेतेति वाक्यं विनापि "वैश्वदेव्यामिक्षे"ति वाक्येन विश्वेदेवदेवताक आमिक्षाद्रव्यकयागस्य प्राप्तत्वात् तेनैव प्राचीनप्रवण-देशसम्बन्धविधानमुपपद्यत इति वैश्वदेववाक्यस्य वैयर्थ्यं स्यात् । अतो वैश्वदेव्यामिक्षेति वाक्यप्राप्तयागानुवादेन नामधेयत्वम् न वक्तव्यम् । यद्वा "वैश्वदेव्यामिक्षे"त्यत्र यागविधाने यजिकल्पना भविष्यति । अतो वैश्वदेवेनेतिवाक्ये प्रत्यक्षतो यजिपदस्य श्रूयमाणत्वात् अत्रैव यागविधानम् । एतदनुवादेन वैश्वदेव्यामिक्षेत्यत्र द्रव्यविधानं भवतु । तथा चेत् "यजिकल्प-नावसरो नास्ति इति न शङ्कनीयम् । द्रव्यविधानेऽपि यजिकल्पनावसरो भव-त्येव । अन्यथा तत्र विहितस्य द्रव्यस्य यागाङ्गत्वं न भवति । देवता-तद्धितान्तत्वात् देवताङ्गत्वमेव भवति । किञ्च वैश्वदेवेतिपदे एकदेशस्य उद्देश्यत्वमेकदेशस्य विधेयत्वमित्युक्ते एकप्रसरताभङ्गलक्षणो वाक्यभेदो भविष्यति । किञ्च आग्नेयादिवाक्यैः यागविधानं तन्मध्यपठितवैश्वदेवीति वाक्येन द्रव्यविधानमुच्येत तदा वैरूप्यापत्तिः प्रसज्यते । अतोऽत्रापि याग-विधानाङ्गीकारे "आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावित्रं द्वादश कपालं, सारस्वतं चरुं "पौष्णं चरुं" माहृतँ सप्तकपालं" "वैश्वदेवी-मामिक्षां द्यावापृथिव्यमेककपालं" इति तत्प्रायपाठो रक्षितो भवति । किञ्च यस्मिन् यो गुणसम्बन्धः प्रमाणान्तरेण विधिना, अर्थवादेन वा प्राप्तः । तत्प्राप्ति निमित्तीकृत्य तत्प्रख्यशास्त्रात् नामधेयत्वं वक्तुं शक्यते । तेन स सम्बन्धः "ज्योतिष्टोमेन स्वर्गकामो यजेते"त्यत्र "त्रिवृत्पञ्चदशस्सप्तदश एकविग्ँशः, एतानि वाक्यानि ज्योतींषि । य एतस्य स्तोमाः" इत्यर्थवादेन

ज्योतिरूपस्तोमानां प्राप्ति निमित्तीकृत्य ज्योतिष्टोमशब्दस्य नामधेयत्वमुक्तं तथैवात्रापि । "यद्विश्वेदेवास्समयजन्त । तद्वैश्वदेवस्य वैश्वदेवत्वम्" इत्यर्थवादेन विश्वेदेवकर्तृकत्वस्य आग्नेयादिष्वष्टसु यागेषु प्राप्तत्वात् तत्प्राप्त्या वैश्वदेवशब्दस्य नामधेयत्वं तत्प्रख्यशास्त्रात् वक्तव्यम् ।

तथा च प्राचीनप्रवणवाक्यविहित-देशसम्बन्धः सर्वेषां यागानां भवति । एवं चेत् वैश्वदेवेनेति वाक्यस्य वैश्वदेव्यामिक्षेति वाक्यस्य च विना वैयर्थ्यं प्रयोजनं प्रायपाठरक्षणं च उपपद्येतेति सिद्धान्तः । अतः तेनैव न्यायेन संस्थामध्ये पाठेनायमपि वाजपेयः संस्थावाजपेय इति वक्तव्यम् । तेन तत्प्रायपाठो रक्षितो भवति । अतो ये सोमसंस्थास्सर्वा अपि नित्या इति मनीषया सर्वसंस्थाः अनुतिष्ठन्ति तैः संस्थावाजपेय एवानुष्ठेयः । न तु आप्तवाजपेयः कुरुवाजपेयश्च । तयोः काम्यत्वात् । काम्यकर्मानुष्ठानविषये बहुविचारावश्यकता वर्तते । नित्यनैमित्तिकयोः काम्यस्य च को भेदः । मुख्यद्रव्यापचारे प्रतिनिधिरस्ति वा न वा नित्यनैमित्तिकाऽकरणात् यथा प्रत्यवायः तथा काम्यकर्मानुष्ठानेऽपि प्रत्यवायोऽस्ति वा इति मीमांसासिद्धान्तानुसारेण विचारणीयम् । तथा हि—

काम्यवाजपेययोरनधिकारनिरूपणम्

ननु तौ वाजपेयौ काम्यावेव च भवेतां तावता तयोः कुतः नानुष्ठेयत्वमिति चेत् मैवं, नित्यकाम्ययोः अधिकारविषये, प्रतिनिधिद्रव्यविषये च, बहुभेदो वर्तत इति अग्रे विचारयिष्यते । काम्ययागेषु मुख्यद्रव्याभावे प्रतिनिधिर्नास्ति ।

एवं स्थिते आप्तवाजपेय-कुरुवाजपेययोः काम्यत्वादेव मुख्यद्रव्याणां सुराग्रहाणां प्रतिनिधिर्नास्तीत्युक्तप्रायत्वेऽपि तत्तन्मतभेदं प्रदर्शयितुं पुनर्विचारः क्रियते । वाजपेये सुराग्रहाणां प्रतिनिधिरस्ति न वेति । आप्तवाजपेयकुरुवाजपेययोरेव सुराग्रहास्सन्ति "सुराग्रहान्गृह्णाति" इति विहितत्वात् सुराग्रहाः निर्णयसिन्धुकारेण कलिवर्ज्यप्रकरणे निषिद्धाः । तथा हि—

"महाप्रस्थानगमनं, गोसंज्ञप्तिश्च गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ।।

सुराग्रहणस्य उद्देश्यविशेषणीभूत-सौत्रामण्याः ग्रहैकत्वाधिकरणन्यायेन अविवक्षितत्वात् वाजपेयेऽपि निषेधः उपपन्नः, सौत्रामण्यां तु "पयोग्रहा वा स्यु"रिति आपस्तम्बोक्तेः वैकल्पिकपयोग्रहैरप्यधिकारः । वाजपेये तु प्राप्तौ मानाऽभावात् सोमसुरयोः सहत्यागेन अशे सुराद्रव्यस्य प्राप्तत्वादेव तत्प्रख्यन्यायेन यागनामत्वमुक्तम्। तत्प्राप्ति विना संज्ञाऽयोगात्कलौ नाधिकार इति युक्तं प्रतीमः। त्रिकाण्डमण्डनादिलिखनं तु निर्मूलं, अनाकरं चेति निर्णयसिन्धौ ।

ननु, यथा सौत्रामण्यां सुराग्रहनिषेधस्य सत्त्वेऽपि पयोग्रहैरधिकारः तयैव अत्रापि भवतु इति चेत्, मैवम्, सौत्रामण्यां पयोग्रहा. सुराग्रहाणां प्रतिनिधित्वेन गृह्यन्ते उत विकल्पतया? नाद्यः । यत्र मुख्यद्रव्यापचारो भवति । तत्र मुख्यद्रव्यभूयोंऽशद्रव्यमेव प्रतिनिधेयमित्युक्तः, मी. 6-6-अध्याये । अन्यथा व्रीहिभिर्यजेतेत्यादिना मुख्यतया प्राप्तव्रीहीणामपचारे व्रीहिपक्षे विहितावच्छेदकजात्युपलक्षितांशद्रव्यनीवारप्राप्तिवत् यवानामपि प्राप्त्यापत्तेः । पुरोडाशनिष्पादकद्रव्यत्वस्य नीवारेष्विव यवेष्वपि सत्त्वाऽविशेषात् । तस्मात् विहितावच्छेदक-जात्युपलक्षितांशद्रव्याणां विहितत्वपक्षे प्राप्तिः विधानमन्तरा दुर्निरूपैवेति कथं विहितावच्छेदक-सुराग्रहत्वरूप-जात्यनुपलक्षितांशद्रव्याणां पयोग्रहाणां सुराग्रहस्थाने प्राप्तिसंभवः ।

अयमेव विषयः सर्वज्ञमाधवाचार्यैः जै. न्या. यां (6-3-11-12) अधिकरणयोः प्रतिपादित इति काम्यकर्मसु प्रतिनिधिरस्ति न वेत्यत्र अत्यन्तम् सदृशस्यैव प्रतिनिधित्वमिति सुस्पष्टतया अभिहितम् ।

न च वाजपेययागे प्रधानांगतया विहितसुराग्रहाणां कलौ प्रतिषिद्धत्वेन अपचारासंभवात् तत्पक्षे विहितत्वं पयोग्रहाणां तेषां विधानं

"यदि सोमं न विन्देत्पूतीकानभिषुणुयात्" इतिवत् श्रूयेत न कोऽप्यधिक्षिपति कलौ तं यागम्, तथापरं न श्रूयत इत्येव वदामः ।

ननु वाजपेयप्रकरणे तथाऽश्रवणेऽपि सौत्रामणीनामकयागे सुराग्रहस्थाने पयोग्रहाः श्रूयन्ते इति चेत् न। सौत्रामणीयागे सुराग्रहस्थाने पयोग्रहविधानं "यदि सोमं न विन्देत् पूतीकानाभिषुणुयान्" इत्यादिवत् न श्रूयते । येन तद्विधानबलात् वाजपेये सुराग्रहस्थाने पयोग्रहाः कल्प्येरन् । किन्तु समप्राधान्येन यववत् वैकल्पिकविधानम् "पयोग्रहा वा स्यु"रिति "यवैर्वा यजेते"तिवत् । यदि श्रुतौ स्मृतौ कल्पसूत्रेषु वा सौत्रामणीनामकयागप्रकरणे सुराग्रहाणां स्थाने पयोग्रहाणां प्रातिनिध्येन विधानं दर्शयति इति चेत् तदा वाजपेयप्रकरणे श्रुति-स्मृति-कल्पसूत्रेषु अनुक्तमपि "तुष्यतु दुर्जनः" इति न्यायेन अन्यत्र विधानबलात् अत्रापि सुराग्रहस्थाने पयोग्रहप्राप्तिम् अभ्युपगच्छेम । यदि सुराग्रहाणाम् अपचारात् पयोग्रहास्स्युः इत्येवंरूपेण विधिर्वर्तेत तदा सुराग्रहप्रातिनिध्यं पयोग्रहेषु पूतीकवत् मन्येत । न च तथा श्रूयते स्मर्यते वा विधिः । मी॰ जै॰ न्या॰ यां॰ 3-5 पादे सौत्रामण्यां सुराग्रहपयोग्रहपरश्रुतिः "पयोग्रहाः सुराग्रहाश्च गृह्यन्ते" इत्येवं समुच्चयवाचकचकारयुक्तमेव श्रूयते । आ॰ श्रौ॰ सू॰ सौत्रामाण्यां सुराग्रहाः पयोग्रहा वा स्युरिति विद्यत इति मन्येत । अनयोः श्रुतिस्मृत्योः पर्यालोचनया कीदृशोऽर्थः निर्णेतुं शक्यो भवेदिति सुधियः आलोचयन्तु ।

किञ्च सौत्रामणियागे सुराग्रहाणां पयोग्रहाणां च समप्राधान्येन विकल्पविषयत्वं यदुच्येत अस्तु नाम तत्र विकल्पः पयोग्रहा वा स्युरिति विकल्पतया उक्तत्वात् न च तत्र तत्सत्त्वमात्रेण वाजपेये तत्प्राप्तिः ।

वाजपेयस्य भिन्नक्रतुत्वात् । सौत्रामणीवाजपेययोः प्रकृतिविकृतिभावासत्त्वात् वाजपेयप्रकरणे पयोग्रहानभिधानाच्च । किञ्च वाजं अन्नं सुरारूपं पेयं अस्मिन्निति वाजपेय इति तत्प्रख्यन्यायेन नामधेयत्वनिर्वचनात् ।

ननु ! त्रिकाण्डमण्डने पयोग्रहणेन वाजपेये अधिकार उक्त इत्यत आह । तन्निर्मूलमिति सिन्धुकारैः उक्तम् । कल्पसूत्रकारैस्तदनभिधानात् कल्पसूत्रभाष्यादावपि तत्प्राप्त्यनभिधानाच्च ।

कल्पशास्त्रप्राबल्यम्

तत्तत्कर्मणां प्रयोगकाले कल्पशास्त्रस्य अन्तरङ्गत्वात् इतरशास्त्रापेक्षया तस्यैव प्राबल्यमित्यपि अत्र प्रसङ्गानुरोधेन निरूपणावसरः प्राप्तः । तथा हि—यद्यपि धर्माऽधर्मनिर्णये मीमांसाशास्त्रस्यैव प्राधान्यम् ।

"धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्" इति श्लो॰ वा॰ तथापि तत्तत्कर्मणां प्रयोगकाले कल्पशास्त्रमेव आदरणीयम् । मीमांसाशास्त्रसिद्धान्तरीत्या धर्मशब्दवाच्यं वेदचोदितं कर्म तत्त्रिविधम् । नित्यं, नैमित्तिकं, काम्यं चेति । तत्तत्कर्मविधायकवाक्यानां सर्वेषां आकाङ्क्षात्रयं विद्यते । किं, केन, कथमिति, भाव्यकरणाकांक्षयोः प्रायशः तत्तद्विधिवाक्यैरेव निवृत्तत्वात् कथमाकांक्षा अवशिष्टा । तदाकांक्षापूरकत्वेन यद्यपि तत्तच्छाखासु तत्तत्प्रकरणस्थान्यङ्गानि भाव्याकांक्षया प्रकरणात् इतिकर्तव्यतात्वेन अन्वीयन्ते । तथापि तदाकांक्षापूरयितुं तान्यपर्याप्तानीति नानाशाखास्थाङ्गोपसंहारः समाकलनीयः । न च शाखाभेदेन कर्मणामपि भिन्नत्वात् अन्यशाखास्थानामङ्गानामन्वयः नोपपद्यत इति वाच्यम् । मी॰ शा शाखान्तराधिकरणे 2-4-2 प्रतिशाखासु विहितानां ज्योतिष्टोमादीनां कर्मणां एकत्वं, अनेकत्वं वा इति विचार्य तत्तच्छाखाध्येतृपुरुषभेदात् शाखानां भिन्नत्वेऽपि कर्मणामेकत्वमिति सिद्धान्तितम् । अतः कर्मैकत्वात् नानाशाखास्थाङ्गोपसंहारः तत्तत्कथंभावाकांक्षां निराकांक्षीकर्तुमीष्टे इति निर्विवादम् । अतिप्राचीनतमे काले विना आयासं साङ्गं सरहस्यं नानाशाखाध्येतारः बहवो महर्षयः आसन् । तेषां तत्तच्छाखास्थाङ्गोपसहारेण कर्मानुष्ठानं सुशकमभवत् । ततस्ततः तादृशसर्वशाखाध्येतारः महर्षयः न जायन्ते । तदेवोक्तं आपस्तंबमुनिना— आ॰ ध॰ सू॰—

"नियमेषु तपश्शब्दः, तदतिक्रमे विद्याकर्म, निरस्रवति,
ब्रह्मसहापत्यात् एतस्मात्कर्तपत्यमानायुष्यं च
तस्मादृषयोऽवरेषु न जायन्ते नियमातिक्रमात् श्रुतर्षयश्च—
सम्भवन्ति ।

केचित्कर्मफलशेषेण पुनस्सम्भवे श्वेतकेतुः इति" कर्तपत्यं— नाशन-हेतुरित्यर्थः इदानींतनकाले अध्ययननियमरूपतपसः अनुष्ठातुमशक्यत्वात् प्रायः अनृषयो भवन्ति । क्वचिदेव तु श्वेतकेतुप्रभृतयः श्रुतर्षयश्च भवन्ति । अङ्गवाक्यैकवाक्यैकतापन्नः प्रधानविधिरेव प्रयोगविधिरिति लक्षणस्योक्त-त्वात् तत्तत्प्रयोगे सर्वेषामङ्गवाक्यानाम् अनन्वये प्रयोगविध्यसंभवात् प्रधान-विधिना सर्वशाखास्थाङ्गवाक्यैरेकवाक्यता संपादनीया । नानाशाखास्थाऽ-ङ्गोपसंहारं विना अस्मदीयानुष्ठानस्य वैगुण्यमापतेत् । इत्यस्मदनुजिघृक्षया परमकारुणिकाः महर्षयः नानाशाखास्थाङ्गान्यवगम्य समाकलयितुं सुगमान् कल्पसूत्रग्रन्थान् रचयायासुः ।

कल्पसूत्रलक्षणम्

तत्तत्कर्मप्रयोगं कल्पयन्तीति कल्पाः इति व्युत्पत्त्या प्रयोगप्रति-पादकाः आपस्तम्ब—बोधायनीयादयो ग्रन्थाः कल्पशब्देन विवक्षिताः । ननु मन्त्रब्राह्मणयोः व्याख्यातत्वात् दर्शपूर्णमासादीनां अनर्थकः सूत्रकारयत्नः इति चेन्न श्रुत्यर्थस्य अद्यतनैरनेक-विध्युपसंहारस्य च दुर्ज्ञानत्वात् अतो नानर्थ इति धूर्तस्वामी । एवं बोधायन कल्पसूत्रारम्भे ब्राह्मणानां बहुत्वात् एकैकस्यां शाखायां अपरिसमाप्तत्वात् अर्थस्य च दुःखबोधत्वात् उपसंहृत्य एकत तद्विवरणार्थं सुखेन बुध्वा कर्माणि अनुष्ठाय फलं सर्वे प्राप्नुयुरिति कल्पा आरब्धा इति भवस्वामी । आश्वलायनश्रौतसूत्र-देवत्रातभाष्येऽपि पुरुषाऽशक्तिपरिहारमुपलक्ष्य शौनकादिभिराचार्यैः कल्पाः प्रणीता इति । एवञ्च कल्पसूत्रकाराणां यत्नः अस्माभिः समादरणीय इत्यत्र न काप्यति-शयोक्तिः । सूचयन्तीति सूत्राणि इति व्युत्पत्त्या संज्ञापरिभाषादिरूपेण प्रयोगविशेषान्नायक-लक्षणप्रतिपादकानि सूत्राणीत्युच्यन्ते । तदेवोक्तं मी-तं-वार्तिके कल्पसूत्राधिकरणे भट्टपादै —

"सिद्धरूपःप्रयोगो यैः कर्मणामनुगम्यते ।
ते कल्पा लक्षणार्थानि सूत्राणीति प्रचक्षते ।।
कल्पनाद्धि प्रयोगाणां कल्पोऽनुष्ठानसाधनम् ।
सूत्रं तु सूचनात्तेषां स्वयं कल्पा प्रयोगकम् ।।"

अन्यदपि लक्षणमुक्तम् ।

"अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च वाक्यं सूत्रमित्युच्यते ।।"

बुद्धिधारणसौकर्याय सूत्ररचनाप्रवृत्तिः । श्रुतिप्रमितं कर्म श्रौतम् । तद्विषयं सूत्रं श्रौतसूत्रम् । प्राञ्चः कर्म अत्यन्तं प्रधानं मेनिरे । अनुष्ठितं कर्म न केवलं कर्तुः तत्तत्फलप्रदम्, अपि तु कृत्स्नस्य लोकस्य क्षेमकरम् । अतः तस्य यथावदनुष्ठाने प्राचां महती श्रद्धा आसीत् । यथावदनुष्ठानं प्रयोगशास्त्रं विना दुष्करम् । अतः प्रयोगनिर्धारणपरस्य श्रौतसूत्रग्रन्थस्य प्रवृत्तिः । वेद-भेदेन शाखाभेदेन च बहूनि श्रौतसूत्राणि भवन्ति । एतत्सूत्रकर्तारः सर्वेऽपि महर्षयः वेदार्थविचारपराः । जैमिनिकृत-मीमांसाशास्त्रवैलक्षण्ये सत्यपि श्रौतसूत्राणां, ते सर्वे वेदार्थं सम्यग्विचार्य सूत्रेषु न्यबन्धन्नित्यसंदिग्धम् ।

एवं सूत्रग्रन्थकर्तारः आपस्तम्ब-आश्वलायन-बोधायन-सत्याषाढ-प्रभृतयः बहवः आसन् । एतत्सूत्रग्रन्थानां भाष्यकाराः वृत्तिकाराः व्याख्याता-रश्च, धूर्तस्वामी-रामाण्डारः-रुद्रदत्तः-कर्पदि-हरदत्त-प्रभृतयः सर्वज्ञकल्पाः ।

नानाशाखास्थाऽङ्गोपसंहारकाः मीमांसान्यायवेदिनः वेदार्थज्ञानमा-कलयन्तः बभूवुः । अतः सूत्रव्याख्यानेषु बहुषु स्थलेषु मीमांसासिद्धान्ताः दरीदृश्यन्ते ।

आपस्तम्बः सूत्रसाम्यम् जैमिनिः पितृयज्ञस्वकालविधानादनङ्गं स्यात्- जैमिनिश्च तुल्यवच्च प्रसंख्यानात्- जैमिनिश्च प्रतिषिद्धे च दर्शनात् जैमिनिश्च स्वामिनोऽग्नेरित्यादि—न देवताग्निशब्दक्रियामन्यार्थत्वात्

मन्त्रब्राह्मणयोर्वेदनामधेयं- वेदाधिकरणे मन्त्रब्राह्मणसमुदायात्मको वेदः
मन्त्रलक्षणम्– " " " " "

ब्राह्मणलक्षणं - कर्मचोदना ब्राह्मणानि - विधायकं वाक्यं ब्राह्मणवाक्यम्
ब्राह्मणशेषोऽर्थवादः - विधिनात्वेकवाक्यत्वात्
ब्राह्मणानामेवार्त्विज्यं सर्वक्रतूनां - " "

सिद्धान्तसाम्यम्

अथानादिषु विहितनक्षत्रप्रतीक्षा न कर्तव्या कदाचित् नर्तुं सूर्क्षेन्न नक्षत्रमिति- 5-1_21

क्रतुनक्षत्रातिक्रमवचनात् । 5-4-6 प्रतिनिधिना कर्मसमापनीयमिति - सोमाधाने ऋत्वाद्यनीक्षां-5-4-59 सत्याषाढसूत्रे 2-1-1 .

सिद्धान्तभेदः

देवतायाः विग्रहवत्वं फलदायित्वञ्च अङ्गीकरणीयं न वेत्यत्र भेदो दृश्यते मी-भा-यांदेवताधिकरणे9-1-4एवं विचारितम्। पूर्वाधिकरणे"फलदेवतयोश्च । न चोदनातो हि ताद्गुण्यः इति द्वाभ्यां सूत्राभ्यां दर्शपूर्णमासादिकर्मणः फलदेवता प्रयुक्तत्वं उत अपूर्वप्रयुक्तत्वमिति विचार्य अपूर्वप्रयुक्तत्वमिति सिद्धान्तः कृतः । अस्मिन्नधिकरणे अपूर्वमङ्गीकृत्यैव देवताप्रसादस्य प्रयोजकत्वं भवतु इत्याशंक्य समाधानं वक्तुं विचारः कृतः । तथा हि—

यागस्य अपूर्वद्वारा फलजनकत्वं मा भूत् । यागस्य फलजनकत्वे अपूर्वसत्त्वे वा प्रमाणाऽभावात् इत्यादिना अपूर्वद्वारा यागस्य फलजनकत्वं नास्ति अश्रुत-अपूर्वकल्पनस्य अन्याय्यत्वात् इत्यपूर्वमनङ्गीकृत्य देवताप्रसाद एव द्वारं यागस्य फलजनने प्रसादस्य "तृप्त एवैनमिन्द्रः प्रजा पशुभिस्तर्पयती त्याद्यर्थवादैः प्रतीयमानत्वात् यदा देवताप्रसादमङ्गीकृतः तदा तत्प्रसादान्यथानुपपत्त्या विग्रहादिपञ्चकमप्यङ्गीकर्तव्यमिति पूर्वपक्षीकृत्य विध्यपेक्षितप्राशस्त्यतात्पर्याणामर्थवादानां देवताप्रसादरूपशक्यार्थे प्रामाण्यं नास्ति ।

अन्यतात्पर्याणामन्यार्थे प्रामाण्याऽयोगात् । न देवताविग्रहादिस्वीकारः । शब्दमात्रं देवता । अर्थस्तु चेतनः अचेतनो वा स्वीक्रियते न तु विग्रहादिमान् इत्युक्तम् । ननु विग्रहाद्यस्वीकारेण शब्दमात्रस्यैव देवतात्वेन यागादि कर्म सिद्धावपि तत्तद्विग्रहादिध्यानं विना उपासनाया सफलत्वाऽसंभवात् अवश्यं ध्यानविध्यनुरोधेन अर्थगत-विग्रहादिस्वीकारः अभ्युपेय एवेति चेत् उच्यते–

उपासनादौ परं तस्य ध्यानमात्रमाहार्यमिति । एवमुपासनादौ मन्त्रप्रतिपाद्यस्यार्थस्य अस्माभिरपि स्वीकारात् । तस्मिन्नर्थे विग्रहाद्यारोपेण वाचनिकं ध्यानमात्रं विधीयते । तद्विशिष्टाच्च उपासनारूपकर्मणः फलं न देवता, फलं ददाति । तत्रापि मन्त्रमात्रमेव देवतेति । ननु सर्वदेवतानां विग्रहाऽस्वीकारे नास्तिकत्वापत्तिरित्यत आह । जैमिनिमतनिष्कर्ष इति । अयमर्थः कर्मणि उपासनादौ च शब्दरूपमन्त्रस्यैव देवतात्वम् । मन्त्रप्रतिपाद्यार्थे ध्यानसिद्धयर्थं विग्रहाद्यारोपः वाचनिकः सर्वथा कर्मैव फलं प्रयच्छति । न तु देवतेति । जैमिनिमतानिष्कर्षमात्रं कृतं खण्डदेवेन । वस्तुतस्तु विग्रहखण्डनं स्वस्थानाभिमतमेवेति वक्तव्यम् । पूर्वपूर्वाणां देवताविग्रहादिकं नास्तीत्येव आशयः इत्यावेदयितुमेव तेन एवमुक्तमिति तद्वचनेन सङ्क्रमितस्य वाग्दोषस्य परिहारार्थं "मम तु एवं वदतः वाणी दुष्यतीति हरिस्मरणमेव शरणमित्यन्तिमवचनेन देवतायाः विग्रहादिमत्त्वे खण्डदेवस्य स्वीयआशय इति प्रतीयते । मी. शास्त्रदीपिकायां तु एवं विचारितं तथा हि–यागः देवताराधनार्थः । आराधिता सा यागकर्तुः फलं ददाति ? उत याग एव अपूर्वद्वारा फलं ददातीति ? यागः देवताराधनार्थः "यज पूजा-सङ्गतिकरणदानेषु" इत्यस्माद्धातोः याग पूजार्थकः । पूजिता सा देवता फलं ददाति । तथैव मन्त्रार्थवादाः श्रूयन्ते "वज्रहस्तः पुरन्दरः तृप्त एवैनामिन्द्रः प्रजयापशुभिस्तर्पयति, इत्यादि, लोकप्रसिद्धिरपि तथा वर्तते । यः अतिथिं भोजयति तस्मै भोजयित्रे स भोक्ता फलं ददातीति पूर्वपक्षे प्राप्ते–देवतायाः यागनिर्वर्तकत्वात् द्रव्यवत्, प्राधान्यं नास्ति । विग्रहादिकमस्तु मा वा ? इति । "यद्यपि देवता विग्रहवती परिगृह्य भुक्त्वा तृप्यति, प्रसीदति च । तथापि यागादेव फलं विग्रहवती च अनित्या स्यात्" इति ग्रन्थेन विकल्प-

तया प्रतीयते । मयूखमालिकायामप्येवमुक्तम् विग्रहादिमत्त्वेऽपि न प्राधान्यमिति – अतः न यागः देवताराधनार्थः देवतायाः प्राधान्यं नास्ति । देवतायाः विग्रहादिकमस्तु मा वा । देवता न फलं ददाति । लोकप्रसिद्धिः तथा अस्तु नाम तत्प्रसिद्ध्या देवतायाः फलदायित्वं न युक्तम् वस्तुतस्तु लोकेऽपि न तु भोक्ता फलं प्रयच्छति किन्तु भोजनक्रियैव । मन्त्रार्थवाद-पुराणेतिहासादिभिः देवतायाः प्राधान्यं विग्रहादिमत्त्वं फलदायित्वं केचिद्वदन्तीति यत् तत् भ्रममात्रमिति । मन्दधियस्तु श्रद्धालवः तात्पर्यमजानानाः तथा भ्राम्यन्तु नाम इत्युक्तम् ।

यद्यपि सर्वेऽपि मीमांसकाः देवतायाः प्राधान्यं फलदायित्वं च निराचक्रुः तन्निवारणार्थं तत्र देवतायाः विग्रहादिकं नास्त्येवेति तन्निराकरणे कृते किमुत देवतायाः प्राधान्यं नास्ति फलदायित्वं नास्तीति, किञ्च तन्निराकरणस्य अन्यो गूढाभिसन्धिः प्रतीयते ।

ये केचिद्वेदार्थतत्त्वमनवगच्छन्तः तदुदिते कर्मणि यथा शास्त्रं प्रयोगं कर्तुम् आलस्याः देवतामेव बहुमन्यमानाः अङ्गप्रधानादि क्रियाजातमगणयन्तः कर्मणः वैगुण्यमेव संपादयेयुरिति बुद्ध्या देवताविग्रहं निराचक्षते । अयमाशयः साङ्गस्य सगुणस्य कर्मणः फलमुत्पत्स्यतीति शास्त्रसिद्धान्तः तदनादृत्य देवतैव फलं ददातीत्युच्येत । तदानीं यस्यै यस्यै देवतायै यो यो यागः होमश्च आराधनरूपेण क्रियते सा सा फलं ददाति या विस्मृता सा फलं न ददाति । तावता कर्म विगुणं न भवति । किन्तु फलभूयस्त्व-अल्पत्वरूपतारतम्यमेवेति मन्येरन् यदा देवतायाः अप्राधान्यं कर्मणः प्राधान्यं तदा साङ्गप्रधानकर्मण एव फलं भवति नान्यथेति कर्मकलापेषु ऐकतानं मनस्संपद्यत इति ।

यद्यपि मीमांसाशास्त्रे ईश्वरः अस्ति न वेति विचार एव न कृतः । तथापि वेदस्यापौरुषेयत्वसंपादनार्थं पदपदार्थसम्बन्धस्यापि अकृतकत्वं वक्तव्यम् । तत्सिद्ध्यर्थं यथा अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिरिति नैयायिका वदन्ति न तथा वयं वदामः । पदपदार्थसम्बन्धोऽपि नित्यः

तत्सम्बन्धस्य वृद्धव्यवहारपरम्परया अनादिसिद्धत्वाच्च इत्युक्तम् । अनेन ईश्वरनिरासः कृतः इत्यपि केचिद्वदन्ति । अत एवोक्तं मीमांसाबालप्रकाशे— शब्दशब्दार्थसम्बन्धस्य ईश्वरसङ्केतत्वेऽपि वेदस्याप्रामाण्यापत्तेः तत्प्रामाण्यायैव ईश्वरनिरासः कृतः न तु वस्तुतः इत्युक्तम् । एवं गूढाभिसन्धिमजानानाः अध्वरमीमांसकाः देवताविग्रहं निराचक्षते निरीश्वरवादिनः इति च केचित्पण्डिता वदन्ति । वस्तुतस्तु देवताविग्रहनिराकरणे न तात्पर्यं किन्तु देवतायाः फलदायित्वप्राधान्यनिराकरण एव । एवमेव न तु ईश्वरनिरासे तात्पर्यं किन्तु वेदस्य अपौरुषेयत्वप्रतिपादन एवेत्यवगम्यते । अनेन देवताविग्रहप्राधान्यफलदायित्वविषये मीमांसकानां सिद्धान्तः दर्शितः । ईश्वरविषये तावत् मीमांसकानां मध्ये मतभेदो वर्तत इत्यवगम्यते ।

चातुर्मास्यप्रकरणे कल्पसूत्रकाराणां सिद्धान्तः । वैश्वदेवशब्दनिर्वचनप्रसङ्गे सप्तमे प्रश्ने आप. सू. 7- प्र- आग्नेयाद्यष्टकर्मसमुदायेन अग्न्याख्यः परमात्मा यष्टव्य इति वृत्तिकारः ।

द्वादशे प्रश्ने इन्द्र एव देवता परमात्मरूपः आत्मन इन्द्रायेति श्रुतेः कल्पान्तरकाराः द्राह्यायणादयोऽपि कर्मसाद्गुण्यार्थं इति देवतास्तुतिं निबध्नन्ति । आपाततः कल्पसूत्र-भाष्यवृत्ति-परिशीलनेन शब्दातिरिक्ता देवता तदाराधनं तत्प्रीतिकोपौ तस्य हविरूपभोगः, फलप्रदत्वञ्च एतत्सर्वानुगुणविग्रहवत्त्वं च श्रुतितात्पर्यसिद्धमित्यवगम्यते । एवमेव त्रिकाण्डमण्डनव्याख्याकारोऽपि देवता-विग्रहादि-निराकरणस्य नावमिकस्य उत्सूत्रतां (=सूत्रकारेण स्पष्टानुक्तत्वं) समर्धयते तथा हि—

"यद्वाध्ययनसंसिद्ध- विज्ञानरहितोऽपि सन् ।
नातीवाधिक्रियाशून्यो भर्तृयज्ञादिदर्शनात् ।।

इति । सोमयागाधिकारिनिरूपणप्रसङ्गे तृतीयाधिकरणं दर्शयति । इतःपूर्वं कृत्स्नवेदार्थवित् मुख्याधिकारी । "यद्वाऽध्ययनसंसिद्ध-अनुष्ठेयमखमात्रवित्" द्वितीयाधिकारीति निरूपितम् । इदानीमध्ययनसिद्ध-अर्थज्ञानरहितोऽपि न अनधिकारी भवति ।

सत्यर्थज्ञाने भूयसी फलसिद्धिरित्युक्ता मन्त्रजन्यार्थस्मरणं मन्त्रप्रयोक्तुरुपकाराय भवति, किं वा श्रोतुरिति संशये अनुष्ठानहेतुभूतअनुष्ठेयस्मरणार्थकत्वकरणं मन्त्राणां वदन्तः मन्त्रप्रयोक्तुरेव मन्त्रजन्यशाब्दबोधं मन्यन्ते । तत्तु वयं न मृष्यामहे । किन्तु श्रोतुरेवेति मन्यामहे । अन्यथा लोके श्रोतुः शाब्दबोधः मन्त्रेषु उच्चारयितुरिति वैरूप्यापत्तेः। किञ्च श्रोतुरेव मन्त्रतः शाब्दबोध इत्ययमर्थः मन्त्रगतशक्त्यैव स्पष्टं लभ्यते । प्रायेणैव हि सर्वे मन्त्राः संबोध्यविषयाः 'इषे त्वा ऊर्जे त्वा' इत्यादयः यद्यप्यत्र शाखापदम् न श्रूयते तथापि शाखाच्छेदन-अनुमाजनक्रियासु विनियोगानुसारेण हे शाखेति संबोध्य इषे=अन्नाय त्वां छिनद्मि इति अध्याहार्यं शाखां प्रति ज्ञाप्यो अर्थः । मन्त्रं प्रयुञ्जानः ज्ञापयति । तत् ज्ञात्वा शाखाऽनुजानाति । ननु अचेतनायाः शाखायाः ज्ञापनं कथं, अनुज्ञा कथमित्याशङ्क्य मनसि निधाय एवं व्याचष्टे । शाखाशब्देन तदभिमानिदेवता अभेदेनोपचर्यते । ततश्च छेदनस्य तद्ज्ञापनस्य च तत्रान्वयः न विरुध्यते । अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां इति बादरायणसूत्रे भाष्यादौ च स्पष्टं तत् ।

"विष्णो हव्यं रक्षस्वे"त्यादौ सूपपादं तत् । तत्र विष्ण्वादीनां देवतानामेव साक्षात्सम्बोध्यत्वात् । ननु देवताविग्रहचैतन्यादिकं मी. दर्शने 9-1-4 अधिकरणे निराकृतं खलु इति चेत् सत्यम् । निराकृतमुत्सूत्रं सूत्रकारेण स्पष्टमनुक्तमिति भाष्यकृता । प्रत्युत सूत्रकारस्य देवताविग्रहादिकमभिमतमेवेत्युक्तम् । अनेन त्रिकाण्डमण्डनव्याख्याकारस्यापि देवताविग्रहमभिमतमेवेति सुस्पष्टम् ।

किञ्च सत्याषाढकल्पसूत्रव्याख्याता महादेवोऽपि वैजयन्त्यां "इन्द्राद्यर्थाः न लौकिकाः येनेन्द्रादिपदानां लोकतश्शक्तिग्रहः स्यात् । किन्तु तेऽपि शास्त्रादेव ज्ञेयाः शास्त्रं च विग्रहवत एव ब्रूते । तत्रैव शक्तिग्रहं न तु विग्रहविधुरे व्यवहारोऽस्ति । न शब्द एव तावद्देवतास्वरूपं, पदार्थत्वेन प्रमाणाभावात् तादृगप्रतीतेश्च तस्मात् यादृशेऽर्थे शक्तिग्रहः तादृगेव तत्तद्देवताशब्देन वाच्यम् । इति अनेन अस्यापि शब्दातिरिक्ता देवता विग्रहवती अस्तीत्यत्र तात्पर्यमिति सुस्पष्टम् ।

एतदुद्बलकत्वेन कृ-य-तै-सं- 1-12 भुवनवसीत्यनुवाके "अग्ने यष्ट-रिदं नमः" इति मन्त्रस्य भाष्ये सायणाचार्याः देवताविग्रहादिकं समर्थ-यामासुः ।

अग्नेः यष्टृत्वे अग्न्याद्युद्देशेन हविष्प्रदानं न सम्भवतीति उपनयना-भावात् अध्ययनं न संभवति तदसंभवे यागादौ अधिकारो नास्तीत्याद्या-क्षेपान् कृत्वा ब्रह्माण्डान्तरदेवतामुद्दिश्य हविष्प्रदानं, स्वयं भातत्वाच्च, वेदाध्ययनादिकं च, संभवतीत्यादि युक्तिभिः अग्नेः यष्टृत्वं संभवतीति सिद्धान्तमकार्षुः । अनेन सायणाचार्याणामपि देवताविग्रहादिकमभिमतमेवेति निरपवादमुररीकर्तव्यम् । इति चेत् कल्पमीमांसाशास्त्रयोः सिद्धान्तभेदस्य सत्त्वेऽपि प्रायशः साम्यमस्तीति । तथा च उभयशास्त्रविरोधे तयोः प्रवृत्ति-निमित्तभेदोऽस्ति । कल्पसूत्राणां कर्मप्रयोगप्रतिपादनार्थं प्रवृत्तिः । मीमां-सायाः वाक्यार्थनिर्णयार्थं प्रवृत्तिः । अतः उभयोः विरोधे कल्पशास्त्रस्य प्राबल्यम्।

अत एव प्रयोगकाले सूत्रकारमतमेव स्वीक्रियते । तथा हि मी·शा· 7.3·4 "वारुणी-निष्कासाधिकरणे वरुणप्रघासेषु एवं श्रूयते ।" "वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति" इति वाक्येन दार्शपूर्णमासिकमवभृथमनूद्य तुषनिष्कासं विधीयते वा उत तुषनिष्कासद्रव्यकं सौमिकावभृथधर्मकं कर्मान्तरं विधीयते वा इति संशये अवभृथमनूद्य गुणविधिरिति पूर्वपक्षे कृते तुषनिष्कासद्रव्यसाधनकं सौमिकावभृथधर्मातिदेशकं कर्मान्तरं विधीयते इत्युक्तम् ।

एवं स्थिते पूर्णपात्रस्य स्थाने सौमिकावभृथः 8-7-12 इत्यापस्तम्ब-सूत्रानुसारात् । यथा "यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्ती"त्यत्र सहयोगे तृतीयाभ्युपगमेन अवभृथदेशं प्रति सोमलिप्त-साहित्येन यानमात्र-विधानस्येव इहापि तथैव स्वीकारेण सौमिक-ऋजीषस्य अवभृथदेशं प्रति नीत्वा यथा अप्सु प्रक्षेपः एवमत्रापि यज्ञोपयुक्ततुषाः निष्कासाश्च सन्तीति तै· ब्रा· "वरुणगृहीतं वा एतद्यज्ञस्य । यद्यजुषा गृहीतस्यातिरिच्यते । तुषाश्च निष्कासश्च, तुषैश्च निष्कासेन चावभृथमवैति" इति वाक्येन तेषां

तुषनिष्कासादीनां अप्सु प्रक्षेपः कर्तव्य इति तेन वरुणगृहीतमेव भवतीति उक्तत्वात् सौमिकावभृथस्यैव वरुणप्रघासाङ्गत्वाङ्गीकारात् वारुणी-निष्कासेन वा वारुणैककपालेन वा प्रधानानुष्ठानं तुषाणां तु अवभृथदेशे सहनीतानां ऋजीषवत् अप्सु प्रक्षेपः कर्तव्य इति न सौमिकावभृथात् कर्मान्तरमिति याज्ञिकाः तथैव अनुतिष्ठन्ति। किञ्च अग्निष्टोमादिषु पवमानस्तोत्रकाले ऋत्विजां अध्वर्यु-प्रस्तोतृ-उद्गातृ-प्रतिहर्तृ, ब्रह्म-यजमान-प्रशास्तृणां प्रसर्पणमस्तीति मीमांसाशास्त्रदीपिकायामुदाहृतम्। कल्पसूत्रे तु अध्वर्युप्रभृतियजामानपर्यन्तमेव प्रसर्पणम् विधीयते। अतः तदुक्तप्रकारेणैव क्रियते याज्ञिकैः। एवमेव यत्कृष्णो रूपं कृत्वा इत्यस्य प्रकृत्तावपि ऊह इति न्यायः, अनूह इति कल्पः।

सायंप्रातःकालयोः क्रियमाणस्य अग्निहोत्रद्वयस्य समुदायस्य अग्नि-होत्रमिति कल्पसूत्रकाराः। अतः कामाय येन येन द्रव्येण अग्निहोत्रहोमः क्रियते स होमः सायमुपक्रम्य प्रातरपि कर्तव्य इति कालनियमः द्रव्यनिय-मश्च भवति। मीमाम्सकानां मते अग्निहोत्रमिति कर्मनामैव। अतः सायं-प्रातःकालयोः पृथक् पृथक् क्रियमाणम् अग्निहोत्रं भवति। सायमग्निहो प्रातरग्निहोत्रमिति। अतः समुदायस्य अग्निहोत्रनियमो नास्ति। यस्मिन् कस्मिन्वा काले काम्याग्निहोत्रहोमः कर्तव्यः। तत्पक्षे सायमुपक्रमनियमो नास्ति। आचारस्तावन्नित्याग्निहोत्रादि सायमेव उपक्रम्यते। आधानादूर्ध्वं अथ सायमग्निहोत्रमित्युक्तत्वात् एवमादीनि बहून्युदाहरणानि द्रष्टव्यानि। तत्सिद्धम् प्रयोगकाले कल्पसूत्रग्रन्था एवादरणीया इति।

कल्पसूत्राणामावश्यकता

"वेदादृतेऽपि कुर्वन्ति कल्पैः कर्माणि याज्ञिकाः।
न तु कल्पैर्विना केचिन्मन्त्रब्राह्मणमात्रकात्॥

याज्ञिकास्सूत्रकाराणां मतं बुद्धया स्वयं तथा।
न्यायैस्तत्सूचितैरेव द्रढयन्त्यकुतोभयाः॥

प्रसिद्धिमनुगृह्णन्तस्ते मान्याश्श्रौतकर्मणि ।
तज्जैमिनिमतापेक्षमिति मे दूषणं न हि ।।

न्यायोपदेशयोः केचिद्विकल्पं बृवते न तत् ।
युक्तं न्यायोऽनुमानन्तु श्रुतितुल्यं कथं भवेत् ।।"

केवलं मन्त्रब्राह्मणरूपवेदात् याज्ञिकाः कर्माणि न कुर्वन्ति । किन्तु वेदैर्विनापि कल्पैः कर्माणि कुर्वन्तीति । अतः मीमांसकोक्तेषु स्वसम्प्रदायाऽविरुद्धमेव ग्राह्यमिति याज्ञिकः पक्षः इत्यादिकार्तिकोक्तरीत्या कल्पानामावश्यकता प्रतीयते ।

सूत्रविभागः

तदिदं कल्पसूत्रं, प्रतिशाखासु प्रवृत्तं पञ्चधा विभक्तं.... 1) श्रौतसूत्रं 2) गृह्यसूत्रं 3) पितृमेधसूत्रं 4) धर्मसूत्रं 5) शुल्व सूत्रं चेति । श्रौतसूत्रे प्रथमतः परिभाषाप्रकरणे "यज्ञं व्याख्यास्यामः" इत्यादिना त्रैवर्णिकानां यागाधिकारः । स च यागः वेदत्रयनिष्पाद्यः, ब्राह्मणानामेव आर्त्विज्याधिकारः, आहवनीयादयः सर्वक्रतुभ्यः सकृदेव संपादनीयाः । यावज्जीवं यज्ञियपात्राधारणं इत्यादयः सर्वक्रतु-साधारण्येन विहिताः । ततः सप्तसोमसंस्थाः निरूपिताः ।

"अथातो दर्शपूर्णमासौ व्याख्यास्यामः ।" इत्यादिना दर्शपूर्णमास-चातुर्मास्य-आग्रयण-निरूढपशुबन्ध- पिण्डपितृयज्ञ - सौत्रामण्यग्निहोत्र-भेदेन सप्तहविर्यज्ञाः निरूपिताः । एवमेव अग्निचयन-अश्वमेध-नरमेध-राजसूय-प्रभृतयः बहवो निरूपिताः । एवं श्रौतकर्मनिरूपणानन्तरं गृह्यसूत्रे गर्भाधान-पुंसवनादि पञ्चदश संस्काराः पञ्चमहायज्ञाः सप्तपाकयज्ञाश्च अभिहिताः । 3) पितृमेधसूत्रे षोडशः और्ध्वदैहिक-संस्कारः । 4) धर्मसूत्रे ब्रह्मचर्याश्रम-गृहस्थाश्रम-वानप्रस्थाश्रम-सन्यासाश्रमधर्माः प्रतिपादिताः 5) शुल्वसूत्रे वेदिमानादयः निरूपिताः ।

श्रौत-स्मार्त-विभागः

श्रुत्या विहितानि श्रौतानि, स्मृत्या विहितानि स्मार्तानीति विभागः इति चेन्न, स्मार्तत्वेन व्यपदिश्यमानानां, उपनयन-सन्ध्यावन्दन-ब्रह्मयज्ञादीनां "अष्टवर्षं ब्राह्मणमुपनयीत, अहरहः सन्ध्यामुपासीत", इत्यादि श्रुतिविहितत्वात् श्रौतत्वापत्तिः। न चेष्टापत्तिः धर्मशास्त्रेषु स्मार्तानि पञ्चदश संस्कारकर्माणि उपनयनादीनीति व्यपदिश्यन्ते। अतः येषां कर्मणां उत्पत्तिविधिः श्रौतः इतिकर्तव्यताभागोऽपि प्रायशः श्रौतः तानि श्रौतकर्माणि येषां कर्मणां उत्पत्तिविधिः श्रौतः स्मार्तो वा भवतु। इतिकर्तव्यताभागस्तु स्मार्त एव भवति तानि स्मार्तकर्माणीति व्यपदेशः उपपन्न इति मन्ये।

अन्यथापि सोऽयं विभागः कर्तुं शक्य इति यद्युच्येत तद्वक्तव्यम् सुधीभिरिति सप्रश्रयं विज्ञापयामि। तदेतत्कल्पसूत्राणां व्याख्यानेषु व्याख्यातृभेदमाश्रित्य मतभेदोऽपि दृश्यते। तावता नाऽस्माकं काचित्क्षतिः। तत्र प्रदर्शितयुक्तिभिः सम्यग्विमृश्य व्यवस्थापनीया।

कल्पशास्त्रं विद्यास्थानम्

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥

इति चतुर्दशविद्यासु षडङ्गान्यप्यभिहितानि।

"शीक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः॥

इति स्मृत्या प्रतिपादितानि। अत्र कल्पस्यापि षडङ्गान्यतमत्वात् विद्यास्थानत्वं सिद्धम्। अत एवोक्तं वार्तिककारैः वेदार्थोपसंहारस्य कल्पसूत्राण्यनपेक्ष्य कर्तुमशक्यत्वात् अवश्यं च यावद्वेदं यावत्कर्मप्रयोगं क्रियमाणैरपि विद्यास्थानाऽशून्यतार्थं कैरपि कल्पसूत्रैः भवितव्यमिति।

स्वाध्यायविधिविहितत्वम्

अङ्गशास्त्राध्ययनमपि "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधिनैव विधीयते । स्वाध्यायोऽध्येतव्यः इत्यत्र अक्षरग्रहणाप्तिरूपं अध्ययनं अदृष्टद्वारा स्वर्गादिफलार्थं वा उत अर्थज्ञानार्थं वा इति मीमांसाप्रथमाध्यायप्रथमाधिकरणे विचार्य विधिवाक्ये फलस्य अश्रवणात् अदृष्टद्वारा स्वर्गार्थमिति प्राप्ते "लभ्यमाने फले दृष्टे नादृष्टपरिकल्पनेति"न्यायात् दृष्ट रूपम् अर्थज्ञानं फलमिति निरणैषुः । तादृशार्थज्ञानस्य धर्मविचारशास्त्रमन्तरा अनुपपन्नमिति तच्छास्त्राध्ययनमपि अध्ययनविधिनैव विधीयत इत्यध्ययनं अर्थज्ञानफलरूपफलपर्यवसायीति सूचितम्। अतः अध्ययनस्य अर्थज्ञानत्वादेव तस्य षडङ्गाध्ययनान्यथानुपपत्त्या अङ्गस्य कल्पशास्त्रस्यापि अध्ययनविधिविहितत्वं सिद्धमिति न पृथगभिधेयावसरः । अत एवोक्तं वार्तिककारैः

"वेदार्थकल्पनात्कल्पः नित्यत्वेव आख्ययोच्यते ।
जपे च नित्यकर्तव्ये नित्यमेव विधीयते ।।

कर्माभ्यासाभिसन्धानं विध्यर्थश्चात्र गम्यते ।
स चार्थो नित्य एवेति नापतेद्ग्रन्थनित्यता ।।" इति

वेदार्थकल्पनात्कल्प एवेति न केवलं प्रतिपाद्यते । किन्तु नित्यब्रह्मयज्ञाध्ययने "ब्राह्मणानीतिहासान्पुराणानि कल्पान्"इति विनियुक्तत्वादपि प्रवाहनित्यतापि । किञ्च "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः" इति पा· सूत्रे कल्पसूत्रप्रवचनपरंपराया अतिप्राचीनतामनमन्यते पाणिनिः । अतः अध्ययनेन साकं कल्पसूत्रादि षडङ्गानामपि नित्यजपयज्ञादौ विनियोग उक्तः । अपि च "निष्कारणं ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च । तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते" इत्यादि श्रुतिस्मृतिभिरपि साङ्गवेदाध्ययनं कर्तव्यमिति प्रतिपादयता कल्पसूत्राध्ययनमपि नित्यमित्यवगम्यते ।

किञ्च कल्पशास्त्रस्य अन्याभिरपि श्रुतिस्मृत्यादिभिः साङ्गवेदाध्ययनसिद्ध्यर्थं विहितत्वात्, याज्ञिकानां यज्ञकर्मणि प्रयोगकाले अत्यन्त-

मुपयुक्तत्वात् अनुक्ताभिः अन्याभिरपि युक्तिभिः कल्पशास्त्रस्य महद्वैशिष्ट्यं विद्यत इति नातिपरोक्षं विदुषाम् । अतः कल्पसूत्रम् अतीव प्रशस्तम् इत्यलं प्रसङ्गानुप्रसङ्गतया कल्पसूत्रविचारणेन । प्रकृतमनुसरामः- तत्सिद्धम् मीमांसासिद्धान्तानुसारेण काम्यकर्मसु मुख्यद्रव्यस्य प्रतिनिधिर्नास्तीति । तत्तत्कर्मणाम् अनुष्ठानकाले संकल्पात्प्रागेव प्रतिनिधिद्रव्येण करिष्यामीति संकल्पः न कर्तव्य इति । अतः वाजपेये तु सुतरां सिन्धुकारेण कण्ठतः निषिद्धत्वात् कल्पशास्त्रेऽप्यनभिधानाच्चेति । तथा हि—

भाट्टचिन्तामणिकारैस्तु यत्सिन्धुकारैरुक्तं तत्तु वेदभाष्यबहुतरन्यायविरुद्धत्वाच्च उपेक्षणीयमित्युक्तम् । तदसङ्गतम् । तदुक्तेरेव बहुग्रन्थविरोधात् । तथा हि — यद्यपि भट्टभास्करभाष्ये — वाजाय = अन्नाय पीयते सोमः अस्मिन्निति व्युत्पत्त्या वाजपेयशब्दार्थः उक्तः । सायणभाष्ये तु वाजः देवान्नरूपः सोमः पेयः यस्मिन्यागे स वाजपेय इत्येकं निर्वचनम् ।" तं वा एतं वाजपेय इत्याहुः "वाजस्यो वा एषः वर्जं ह्येतेन देव ऐप्सन्" इत्यादि श्रुतिपर्यालोचनया यस्मादेतेन यज्ञेन देवाः फलरूपम् अन्नमाप्तुमैच्छन् तस्मादन्नरूपः वाजः पेयः — येन सः वाजपेय इत्यपरं निर्वचनमिति प्रतिपादितम् । सत्याषाढकल्पसूत्रव्याख्याता महादेवः सायणाचार्यं उभयविधनिर्वचनमेव अन्ववादीत् "वाजाप्यो वा एषः" इत्यादि । भगवत्या श्रुत्या सायणोदितद्वितीयपक्षार्थः न्यरूपि । "तं वा एतं वाजपेय इत्याहुः"इति नामनिर्वचनश्रुतेः वाजः देवान्नरूपः सोमः इत्यादिव्युत्पत्त्यर्थपर्यालोचनया च सोमस्यैव यागसाधनत्वम् अवगम्यते । तथापि यागस्य वाजपदार्थभूतस्वाराज्यात्मककलांशमादाय श्रुत्या निरणायि । स एवार्थः सायणाचार्येण च अन्ववादि । यागस्य सोमरूपसाधनांशमादाय भट्टभास्कराचार्येण सायणाचार्येण च न्यरूपि । यागस्य सुरारूपसाधनांशमादाय सिन्धुव्याख्यात्रा वाजपेयपदार्थः प्रत्यपादि । किञ्च भट्टभास्करभाष्ये सुराग्रहाणाम् सप्तदशेत्यादि प्राजापत्यग्रहविषयत्वाऽभावे "तेषु द्रव्यद्वयं विधत्ते" इति धृतप्रतीकायाः विप्लव एव स्यात् । त्वया सोमग्रहाणामेव प्रजापतिदेवतासम्बधित्वेन विधिविषयत्वा-

ङ्गीकारात् तेषु द्रव्यद्वयस्य सोम-सुरारूपस्याभावेन भाष्योक्तेः उन्मत्त-प्रलपितत्वापत्तितादवस्थ्यात् तथा च सोमग्रह-सुराग्रहरूप-समुदायस्य एकस्य बौद्धावयविनः अंशभेदेन एककालावच्छेदेन विभिन्नदेशावच्छेदेन च एकदेव-तोद्देश्य-त्यजिकर्मतया तस्य अंशे सुरारूपद्रव्यतया तस्य सप्तदशेत्यादि शास्त्रान्तरप्राप्तत्वेन स्वाराज्यकामो वाजपेयेनेत्यादेः तत्प्रख्यतया यागना-मपरत्वेन तां विना संज्ञाऽयोगात् इति सिन्धुकारसिद्धान्तः साधु संगच्छत एव। किं च भाष्ये सोमरूपगुणेन भाष्यकारैः अन्यतरपक्षमाश्रित्य व्याख्यातत्वात् विरोधो नास्ति" सोमस्यैव याग्गुणत्वं न प्रतिपादितं येन सुरायाः यागगुणत्वं न प्राप्येत। कथमन्यथा तैरेव भाष्यकारैः जै. न्या-यां-6 अधिकरणे वाजपेयेन यजेतेत्यत्र वाजपेयशब्देन गुणो विधीयते। अन्नवाची वाजशब्दः तच्चान्नं सुराद्रव्यं तच्चात्र गुणः सुराग्रहा-णामनुष्ठेयत्वात् इत्यारभ्य, सिद्धान्ते तस्मात् वाक्यभेदभयात् वाजपेयशब्दः न गुणविधायकः। किन्तु यथोक्तद्रव्यं निमित्तीकृत्य अग्निहोत्रशब्दवत् तत्प्रख्यन्यायेन नामपरत्वं कथितं कथं घटेत।

किञ्च गौडब्रह्मानन्दीयेऽपि प्रथमपरिच्छेदे प्रत्यक्षस्य आगम-बाध्यत्वविचारे वाजम् अन्नं सुरारूपं पेयमस्मिन्निति व्युत्पत्त्या यौगिकत्व-स्वीकारेण नामधेयत्वमेवोचितं वाजपेये सुराग्रहविधानात् इत्याद्युपपादनं कथं समर्थ्येत।

मी. अ. संग्रहेऽपि वाजशब्दस्य पेयसुराद्रव्यवाचित्वमुपपाद्य तस्य गुणत्वेन यज्यर्थान्वये विरुद्धत्रिकद्वयापत्त्या वाजशब्दार्थनिमित्तत्वेन कर्मनाम-परत्वं वाजपेयशब्दस्य उपपादितम्। शास्त्रदीपिकायामपि श्री. पा. मि. महोदयैः 1-4-6 अधिकरणे वाजपेयपदस्य गुणवाचित्वमुत कर्मनामधेयत्व-मिति विचार्य गुणवाचित्वपक्षे मत्वर्थलक्षणा वा पृथक्सम्बन्धे विहिते वाक्य भेददोषो वा भविष्यतीति तत्परिहाराय वरं वाजपेयं सुराद्रव्यमस्मिन्निति सुराग्रहविधानात् तत्प्रख्यतया नामधेयत्वमुक्तम्। मयूखमालिकायामपि श्री सोमनाथयज्वपण्डितैः प्रवृत्तिनिमित्ताऽसम्भवे नामत्वमपि न निर्वह-

तीत्यतः प्रवृत्तिनिमित्तमाह । सुराग्रहविधानलब्धं पेयरूप अन्नवत्त्वं प्रवृत्ति-निमित्तमित्यर्थ इत्युक्तम् । भाट्टकौस्तुभेऽपि खण्डदेवः गुणविशिष्टकर्म-विधित्वं वा केवलगुणविधित्वं वा इति विचार्य अन्ततः मत्वर्थलक्षणाभयेन, वाक्यभेदभयेन च विशिष्टकर्मविधित्वगुणविधित्वे च निराकृते वाजपेय-शब्दस्य अर्थवत्त्वाय यजिसामानाधिकरण्योपपत्त्यर्थं च वाजं पेयं सुराद्रव्यम् । अस्मिन्निति वाजपेय इति बहुव्रीह्यङ्गीकरणेन नामत्वस्यैवाश्रयितुं युक्तत्वात् इत्युक्तवान् ।

वाजपेयरूपसुराद्रव्यसंबन्धित्वस्य प्रमाणान्तरेण सिद्धेः यद्यपि साक्षात् यागे सुरासंबन्धित्वं प्रसिध्यति तथापि "सप्तदश सुराग्रहान्गृह्णाति" इत्यनेन ग्रहणसंस्कृतानां विनियोगापेक्षायाम् "अनेन मधुग्रहं निष्क्रीणाति तं ब्रह्मणे ददाति स पात्रम्" इति शतपथश्रुत्या सुराप्रतिग्रहकर्त्रे पूर्वदत्तं, हिरण्यपात्रस्य मधुग्रहस्यापि च, स पात्रस्य ब्रह्मसम्बन्धिसंप्रदाने विनियोगात् परम्परया यागे सुरासम्बन्धित्वप्रसिद्धे । अतो युक्त नामधेयत्वमित्युक्तम् । किञ्च भा-दीपिकाव्याख्याने शम्भुभट्टीये "अतो युक्तं तत्प्रख्यन्यायेन नामत सप्तदशानां प्राजापत्यसोमग्रहाणां विशेषतः आम्नानवत् सप्तदशसुर गृह्णातीति सुराग्रहाणामपि प्राजापत्यर्थानां विशेषतः आम्नानात् । ग्रहाणाम् आवहनीये अध्वर्युकर्तृकप्रचारवत् सुराग्रहाणां मार्जालीये प्र प्रस्थातृकर्तृकप्रचारस्य विधानात् सुराग्रहैरपि वाजपेययागाभ्यासात् तत्प्रख्य न्यायः प्रदर्शितः । तत्र च मार्जालीये सुराग्रहाणां अनुकम्पनमात्रं कृत्वा वाज-सूतां भक्षणं, होमोऽपि वा इति पक्षद्वयेऽपि यागाभ्यासे न विवादः । एव स्थिते यद्यपि च साक्षात्सुरासम्बन्धित्वं यागे न प्रसिद्धम् । तथापि "सप्त दश सुरान् गृह्णाती"ति ग्रहणसम्स्कृतानां सुराणां विनियोगापेक्षायां "तेन मधुग्रहं निष्क्रीणाति" इत्यादिना कौस्तुभकारैः सुरासम्बन्धित्वापादन-प्रयासकरणं वृथैव । यथा अन्ते अग्निष्टोमादिस्तोत्रेण अग्निष्टोमादिपदवत् वाजपेये बृहत्सामकस्य "किन्नित्ते विष्णो" इत्यस्यामृचि वाजपेयस्तोत्रस्य अन्ते आम्नानात् तेनैव क्रतुसमाप्तेः वाजपेय इति नामधेयस्य प्रवृत्ति-निमित्तत्वं वक्तुं शक्यते तथापि ताण्ड्यब्राह्मणे "प्रजापतिरकामयते"त्यर्थ-

वादे वाजरूप-अन्नपेयत्वयोगेनैव वाजपेयशब्दनिर्वचनात् वाजं-पेयं सुराद्रव्यं अस्मिन्निति योगार्थस्यैव अनुसरणं मीमांसकानां ध्येयमित्युक्तम् ।

अतः सुराद्रव्यस्य वाजपेययागे साक्षाद्वा, परम्परया वा सम्बन्धः अस्तीत्येव बहुषु ग्रन्थेषु दृश्यते । अत एव सिन्धुकारेण कलिवर्ज्यप्रकरणे सौत्रामण्यामिव वाजपेयेऽपि सुराद्रव्यस्य निषेधः कृतः ।

इयांस्तु विशेषः अत्र अवगन्तव्यः । आप्तकुरुवाजपेययोः सुराद्रव्यरूप अन्नसम्बन्धेन नामत्वमिति, संस्थावाजपेयस्य वाजपेयसाम्ना समाप्तिमत्त्वात् नामत्वमिति व्यवस्थापनीयम् । संस्थावाजपेये सुराद्रव्यसम्बन्धाभावात् । अयमेव विषयः भाट्टकौस्तुभग्रन्थस्थित "यद्यपीत्यादिवाजपेयपदप्रवृत्तिनिमित्तमिति वक्तुं शक्यतेति ग्रन्थेन, तथापीत्यादिमीमांसकानां ध्येयमित्युक्तमित्यन्तेन ग्रन्थेन च प्रतिपाद्यते । अतः उभयविधवाजपेयस्यापि प्रवृत्तिनिमित्तभेदो विद्यते ।

अतः सुराद्रव्यस्य वाजपेययागे साक्षाद्वा परम्परया वा सम्बन्धः अस्तीत्येव बहुषु ग्रन्थेषु दृश्यत इति सिन्धुकारेण कलिवर्ज्यप्रकरणे सौत्रामण्यामिव वाजपेयेऽपि सुराद्रव्यस्य निषेधः उक्तः । सौत्रामण्यां आपस्तम्बप्रोक्त पयोग्रहा वा स्युरिति सूत्रेण विकल्पतया पयोग्रहाभिधानात्तैर्ग्रहैः सौत्रामणीयागः भवत्येव । वाजपेये तादृशवचनाभावात् प्रधानसुराद्रव्यनिषेधेनैव यागस्यापि निषेधस्संभवति । यदा सौत्रामण्यां सुराग्रहाः पयोग्रहाश्च इति चकारेण समुच्चयपक्षः स्वीक्रियते तदा सौत्रामण्यामपि अयं निषेधः संगच्छत एव ।

ननु सिन्धुकारेण तद्व्याख्यात्रा च कलौ वाजपेयः निषिद्ध इत्युक्तत्वेऽपि त्रिकाण्डमण्डनकारेण सत्याषाढश्रौतसूत्रव्याख्यात्रा महादेवपण्डितेनापि सौत्रामण्यामिव वाजपेयेऽपि पयोग्रहैरेव अनुष्ठानस्य अङ्गीकृतत्वाच्च भाट्टदीपिकाव्याख्यात्रा वांच्छेश्वरयज्वपण्डितेन च वाजपेय अनुष्ठेय इत्युक्तत्वात् कथं वाजपेये सुराग्रहाणां प्रतिनिधिर्नास्ति इति तत्र अधिकारः नास्तीत्युच्यत इति चेत्, सत्यम्, प्रथमतः प्रष्टव्योऽयं विषयः- अय-

माप्तवाजपेयः काम्यः उत नित्यः । यदि काम्यः स्यात् काम्ये सर्वाङ्गोपसंहारकरणसमर्थस्यैव अधिकार इति वक्ष्यमाणत्वात् सामान्यतः सर्वेष्वपि काम्येषु सर्वाङ्गोपसंहारस्य केनापि कर्तुमशक्यत्वात् तत्रापि वाजपेये सुराद्रव्यस्य प्रतिनिधिरस्ति नास्ति वेति विवादग्रस्तत्वात् तदकरणे प्रत्यवायस्य अश्रवणात् प्रयोग्रहाणां सुराग्रहप्रतिनिधित्वेन अभ्युपेतत्वेऽपि विद्वत्तायां प्रतिनिधित्वाभावात् "यद्वा अध्ययनसंसिद्धअनुष्ठेयमखमात्रवित्" इति त्रिकाण्डमण्डनवचनानुसारेण प्रायशः वाजपेययष्टृणां अनुष्ठेयवाजपेयविषयकअर्थज्ञानाभावात्सामान्यतः काम्येषु नाधिकारः सुतरां वाजपेय इति वक्तव्यम् । अत एव उपरितनविद्वत्त्वाद्यधिकारलक्षणाभावे तस्य औपासनाग्निपरिचर्यैव श्रौताग्निपरिचर्यास्थानापन्ना इति ।

सत्याषाढश्रौतसूत्रे 19 प्रश्न सप्तमपटले सत्याषाढगृह्यसूत्र इत्यवतारिकामुल्लिख्य "पाणिग्रहणादिरग्निस्तमौपासनमित्याचक्षते" इति 35 सूत्रस्य मातृदत्ताचार्यविरचितवृत्तौ "औपासनाग्निपरिचर्यायाः श्रौताग्निपरिचर्यास्थानापन्नत्व"मुच्यते ।

तथा हि— तस्य औपासनेन आहिताग्नित्वमिति तस्येति नियतौपासनिकस्येत्यर्थः । औपासनाग्निधारणमात्रेणैवाहिताग्नित्वम् । "नानाहिताग्निर्म्रियत इति निषेधः अनाहिताग्निता स्तेयमित्युपपातकिता"

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः ॥

इति स्मृतौ वेदिशब्दोपलक्षितत्रेताग्न्यभावप्रयुक्तदौर्ब्राह्मण्यता च अनेन परिह्रियते । तथा च बौधायनः "औपासनो नित्यो धार्य इति न दुर्ब्राह्मणो भवती"ति, भारद्वाजोऽपि "औपासने वा अग्नयो निविष्टा" इति, तद्गृह्य च होमदेवतया समानता तथैव श्रुतेश्च" या एवाग्निहोत्रे देवताः ता औपासने, य एवाहिताग्नेर्धर्मः स एव धर्मः, य एवाहिताग्नेर्लोकः स एवौपासनिकस्य इति शाट्यायनब्राह्मणं भवतीति च ।

ननु च वैतानिकविधिः कमधिकरिष्यति ? किञ्च नानाहिताग्नि-रित्यादौ आहिताग्निशब्दः आहिताः आधानसंस्कृताः अग्नयः यस्येति व्युत्पत्त्या आधानसंस्कृताग्निमत्परः । अनन्तरं "आधानादाहिताग्निव्रताग्ने" इति सूत्राच्च इति चेत् नानेन वैतानिको निरस्यते, नापि तुल्यविकल्पः । किन्तु यः वैतानिकेषु अनधिकृतः तस्यायमनुकल्पः । तथा च अधिकारः श्रूयते-"य एवं विद्वानग्निहोत्रं जुहोति" इत्यादि । "यो ह वा अविदित-आर्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजति याजयति वा स्थाणुमृच्छति गर्तं वा पातयेत् प्र वा मीयेत पापीयान्भवति तस्मात् एतानि मन्त्रे विद्यात्" इति, स्वयमातृण्णा ब्राह्मणेऽपि, "ईश्वरो वा एष आर्तिमार्तोर्योऽविद्यानिष्टकामुप-दधाति" इति । ईदृशविद्वत्तायाः प्रायेण दौर्लभ्यात् ।

नहि वेदार्थज्ञानमन्तरा तत्प्रतिपाद्य देवताकर्मप्राशस्त्यादि ज्ञानं संभवति । न च कारयितृणां विद्वत्त्वे, नित्ये कर्मणि तत्कर्मोपयुक्त वेदैक-देशाध्ययनमलमिति वाच्यम् । यद्वा "अनुष्ठेयमखमात्रवित्" इति त्रिकण्ड-मण्डनवचनेन हि एतदवगतं तत्रापि अनुष्ठेयतत्कर्मप्रतिपादकवेदभागस्य अर्थज्ञानमन्तरा न भवतीति तदपि निरस्तम् ।

याजयितृणां तु अकरणे प्रत्यवायाभावात् तादृशविद्वत्ताभावे प्रवृत्त्य-प्रसक्तिः "तमसो वा एष तमः प्रविशति यमविद्वानुपनयते यश्चाऽविद्वानि" त्याचार्यवचनाच्च । उपनयनमुपलक्षणं याजनस्याऽपि गुरुत्वाऽविशेषात् "नाननूचानमृत्विजं वृणीते"ति च । अनूचान साङ्गवेदाध्यायी । स्मृतिरपि-

"ऋत्विगात्मा धनं जाया शुद्ध यस्य चतुष्टयम् ।
तस्याग्निहोत्रं स्वर्गाय नरकायेतरत्स्मृतम् ॥"

इति । नहि व्रीह्याद्यभावे नीवारादिप्रतिनिधिवत् अविद्वदृत्विजां अविदुषो यष्टुश्च प्रतिनिधिरस्ति । किञ्च कर्मणां मन्त्रैरेव स्मर्तव्यत्वनियमात् तदभावे सर्वाणि कर्माणि विगुणानि भवेयुः । प्रतिपाद्यज्ञानाभावे ऊहोऽपि अदृष्टार्थ एव स्यात्, इत्यादिदोषानन्त्यं न्यायविदां स्पष्टमेव । इति अयमाशयः सर्वेषु श्रौतकर्मसु विद्वत्त्वं मुख्याधिकारिलक्षणमिति तत्रापि काम्यकर्मसु विद्वत्त्वमावश्यकं तस्य प्रातिनिध्यं नास्तीति ।

ननु त्रिकाण्डमण्डनकारेण—

"द्विः प्रकाराणि रूपाणि कर्माण्यन्यानि कानिचित् ।
ज्योतिष्टोमो निरूढश्च पशुसौत्रामणी तथा ॥"
"चातुर्मास्यानि दर्शश्च पौर्णमासोऽग्निहोत्रकम् ।
वाजपेय इतीमे स्युर्नित्याः काम्या इति द्विधा ॥"

इति अग्निष्टोमवत् ।

वाजपेयस्यापि नित्यत्वं काम्यत्वं च विद्यत इत्युक्तं खलु इति चेत् उच्यते—

"सर्वथा प्रथमः सोमयागः कार्यो द्विजातिभिः ।
यथासंभावितार्ङ्गेन शक्त्या दत्त्वा तु दक्षिणाम् ।।
व्रात्यदुर्ब्राह्मणत्वादिमहादोषोपशान्तये ।"

इत्यादिस्मृत्यर्थसारधृतवचनैः यथा अग्निष्टोमस्य नित्यत्वप्राप्तिः न तथा वाजपेयस्य । किन्तु "वाजपेयेन स्वाराज्यकामो यजेत" इति प्रत्यक्षतया काम्यत्वावेदकं वचनं श्रूयते । नित्यत्वगमकं तु त्रिकाण्डवचनबलादेव अस्तीत्यूहनीयम् । यद्यपि गौतमेन सर्वासामपि संस्थानां नित्यत्वोक्त्या संस्थावाजपेयमेव मनसि निधाय वाजपेयत्वेन रूपेण उभयोः वाजपेययोः साम्यमस्तीति । "वाजपेय इतीमे स्युः नित्या काम्या इति द्विधा ।" इति वाजपेयद्वैविध्यमुच्यते मण्डनकारैः । किञ्च आप्तवाजपेयकुरुवाजपेययोः संस्थावाजपेयस्य च अनुष्ठाने बहुभेदो वर्तते । तयोः सत्याषाढ-आपस्तंबादिभिः "शरदि वाजपेयेन यजेत" इति शरत्कालः उक्तः । बोधायनस्तावत् सग्रीष्मस्य जघन्यहस्सु पुरस्तादाषाढ्यै दीक्षत इति वचनात् ग्रीष्म अन्ते वा आषाढपौर्णमास्याः पुरस्ताद्वा वाजपेयः कार्य इत्यवोचत् । अपि च अग्निष्टोमादिसंस्थानां "एका दीक्षा" इत्युक्तम् यदि चित्यग्नौ अनुष्ठीयेत तिस्रो दीक्षापक्षमाश्रित्य अनुष्ठेयाः न त्वेका दीक्षा इति प्रथमतः उक्त्वा, गौणपक्षमाश्रित्य एका दीक्षाप्युक्तम् । वाजपेयस्य तावत् प्रत्येकतया धर्मा विहिताः तेनैव प्रकारेण वाजपेयोऽनुष्ठेयः नान्यथा, वाजपेयप्रकरणे सर्वः सप्तदशो भवति, इति ऋत्विजः सप्तदश, दीक्षादिवसाः सप्तदश, प्राजापत्यपशवस्सप्तदश, सप्तदश ऋत्विजः, दक्षिणाः सप्तदश, सप्तदश, दीक्षादिवसविषये

तावत् दीक्षान्तरमपि वर्तते । आ॰ सू॰ सप्तदशदीक्षाः तिस्रः उपसदः एकविँशीं प्रसुतः इति एकविँशमि दिवसे सुत्याः अथवा "त्रयोदशदीक्षाः तिस्रः उपसदः सप्तदशीं प्रसुतः" इति दीक्षासङ्कोचपक्षमाश्रित्य त्रयोदश दिवसे सुत्याः इत्युक्तम् । बोधायनसूत्र तु "पुरस्तादाषाढचैत्रपौर्णमास्यै दीक्षते" तस्य त्रयोदशदीक्षाः तिस्रः उपसदः सप्तदशीं प्रसुतः अपि वा तिस्रो दीक्षाः तिस्रः उपसदः सप्तम्यां प्रसुतः इति त्रिप्रकारेण दीक्षादिवसा उक्ताः । किञ्च वाजपेययागाङ्गत्वेन सौत्रामणियागः मैत्रावरुणेष्टि बृहस्पतिसवश्च अवश्यमनुष्ठेयाः" तदेवोक्तं आपस्तम्बसूत्रे वाजपेयप्रकरणे "तेनेष्ट्वा सौत्रामण्या वामिक्षया यजेत॰ मैत्रावरुण्या वा" मैत्रावरुण्या चेति पाठान्तरम् ।" प्रत्यवरोहणीयेन बृहस्पतिसवेन यजेत" आ॰ सू 84 पुटे "श्वेतच्छत्रीह भवतीति विज्ञायते । यजमानो यावज्जीवं श्वेतच्छत्री भवतीति च्छन्दोगवचनात् । किञ्च अस्मिन्वाजपेययागे अग्नीषोमीयः पशुः ततः सुत्येऽहनि आग्नेयादिक्रतुपशवः आलब्धव्याः । आपस्तम्बः "पशुकाले त्रीन् क्रतुपशूनुपाकृत्य मारुतीं वशामुपाकरोति सारस्वतीं च मेषीं सरस्वते त्वा मेषं इति । सप्तदश प्राजापत्यान्पशूनालभते" इति सप्तदश प्राजापत्यपशवः ततः सौत्रामणीयागाङ्गत्वेन त्रयः पशवः, बृहस्पतिसवयागाङ्गत्वेन अग्नीषोमीयपशुः, सवनीयपशुं, बार्हस्पत्यः पशुश्च एते सर्वेऽपि आप्तवाजपेयधर्माः ।

संस्थावाजपेयस्य प्रयोगः आण्डपिल्ले एवमुक्तम् । अथ वाजपेयस्य कर्म प्रथमम्,संस्थावाजपेयः तत्र षोडश्यन्तमविकारेण क्रत्वा चमसं भक्षयित्वा । स्तोमविमोचनादि कृत्वा समस्तोपस्थानं कृत्वा स्वासु बृहता स्तवनम्, पञ्चदशस्तोमः, पञ्चदशस्तोमं स्वासु इति वचनात् । तन्न । किमित्त इति बृहता स्तवनं सप्तदशस्तोमं वेति । रुद्रस्कन्दमहोपाध्यायेनोक्तम् । लोके याज्ञिकानां प्रयोगोऽपि एवमस्ति । सोमेन यक्ष्ये । ज्योतिष्टोमेन षोडशिमता वाजपेयेन रथन्तरसाम्ना द्वादशशतदक्षिणेन इति सम्कल्पः ततः वरुण मधुपर्कादि सर्वमग्निष्टोमवत् सोमक्रयणकाले "शुण्ठ्या अधीलोधकर्णयागवाते क्रीणानि इति क्रतुकरणकाले षोडशि हुत्वा परिधौ लेपं निर्मार्ष्टि एन्द्रं पशुमुपाकरोति षोडशिस्तोत्रान्ते होतुचमसमुख्याँश्चमसानुन्नयति ।

बृहत्स्तोत्रमुपाकरोति । विश्वरूपा ज्योतिर्गानानि न सन्ति धूर्गानं पञ्च निधनानि । बहिष्पवमाने अद्वारे तस्या उत्तमा रथन्तरवर्णा च प्रकृतिवद्गानम् यज्ञायज्ञीयस्तोमविमोचनपर्यन्तम् सर्वमग्निष्टोमवत् यज्ञायज्ञीयं समाप्य अपरया द्वारा निष्क्रम्य अग्रेण प्राग्वंशात्प्राङ्मुखं स्थित्वा "पातमाग्नय" इत्यादि यजमानोपहवान्तं उपवेशनाद्युपहवान्तं कृत्वा उक्थिपर्यायैस्स्तुवीरन् उक्थपर्यायाः प्रकृतिवत् । अथ षोडशी, सापि प्रकृतिवत् ।

अथ वाजपेयस्य सामप्रयोग उच्यते । अपरया द्वारा निष्क्रम्य अग्रेण प्राग्वंशं प्राङ्मुखं स्थित्वा "पात माग्नय" इत्यादि यजमानोपहवान्तं कृत्वा, "अथ किमित्ते बृहत् तस्य ऋग्जपः किमित्ते विष्णो बभूथ, प्रतत्ते अठच = पराके वषटचते=स्वस्तिभिस्सदानः, तृणप्रतिग्रहणादि दीक्षायै वर्णेनेत्यादि स्तुतमुक्त्वा तन्तवेमा ज्योतिषेत्यादि सर्वमग्निष्टोमवत् संस्थावाजपेयस्समाप्तः ।

वाजपेये तु संस्थायां षोडश्यन्ते बृहत्तथा ।
स्वासु पञ्चदशस्तोमः केचिदिच्छन्ति पण्डिताः ॥
किमित्तेति बृहत्कार्यं स्तोम स्सप्तदशे नहि ।
त्वामिद्धि हवामह इति बृहता स्तवनं पञ्चदशस्तोमेन ॥

तत्र । किमित्ते बृहत् इति सप्तदशस्तोमेनैव स्तवनम् । अस्मिन्संस्थावाजपेये सप्तदशारत्निर्यूप इति साप्तदश्यं नास्ति, सप्तदश पशवः न सन्ति । हिरण्यमालिन ऋत्विजः प्रचरन्तीति नास्ति । आजिधावनं नास्ति । सप्तदश सप्तदशेति दक्षिणानियमो नास्ति । सुराग्रहा न सन्ति, तत्प्रतिनिधिरपि नास्ति । प्रकृतिवद्दक्षिणेत्युक्तत्वात् एतदङ्गत्वेन बृहस्पतिसवो नास्ति । श्वेतच्छत्रादिनियमो नास्ति । इति महान्भेदो वर्तते । एवं आप्त-कुरुवाजपेयापेक्षया संस्थावाजपेयः लघुभूतः । गौतमोक्तरीत्या अग्निष्टोमातिरिक्ताः सर्वा अपि संस्थाः नित्या इति बहुषु कल्पसूत्रग्रन्थेषु, धर्मशास्त्रग्रन्थेषु च बहुभिः प्रदर्शिताः । तदभ्युपगम्य अवश्यमनुष्ठेया इति यद्युच्येत संस्थासु मध्ये प्रायपाठात् संस्थावाजपेय एव अनुष्ठेयः । मीमांसकमते तावत्

अग्निष्टोमातिरिक्ताः सर्वा अपि संस्थाः काम्या एव । आर्षेयकल्पेऽपि सर्वा ज्योतिष्टोमसंस्था नित्या इति ब्रुवते केचित् । चत्वारिंशत्संस्कारमध्यपाठेन गौतमीयेन । तत्र अग्निष्टोमविकारात् ब्राह्मणस्य सप्तैताः ज्योतिस्संस्था नित्या इत्युक्तिः नोपपन्नेति उल्लिखितम् ।

तेन तस्य मते वाजपेयः न नित्य इति सुस्पष्टम् ।

एवं च अस्मिन्प्रकरणे वाजपेयः त्रिविधः आप्तवाजपेयः, कुरुवाजपेयः, संस्थावाजपेयश्चेति सप्रमाणं न्यरूपि । अत्रायं विशेषः—आप्तकुरुवाजपेययोः सप्तदशदीक्षाः त्रयोदश दीक्षाः तिस्रो दीक्षा इति मतभेदेन विकल्प उक्तः । "स्वासु"बृहत्या पञ्चदशस्तोमेन स्तवनमिति आर्षेयकल्पकारमतम् ।

केचित् "किसित्ते विष्णो" इत्यस्यामृचि बृहत्या सप्तदशस्तोमेन स्तवनमिति वदन्ति । संस्थावाजपेयेऽपि अयं विकल्पः वैखानससूत्रे आण्ड्रपिलग्रन्थे च उक्तः । वाजपेययाजी यावज्जीवं प्रत्यवरोहणीय इति केचित् । "प्रत्यवरोहणीयेनैवान्ततो यजेत" इति वचनप्राप्तः प्रत्यवरोहणीययागः-ज्योतिष्टोम इति आर्षेयकल्पकारः । बृहस्पतिसव इति बह्वृचः । एवमेवापस्तम्बमतेऽपि । शरदि वाजपेयेन यजेतेति सत्याषाढापस्तम्बादयः । बोधायनेन तु "ग्रीष्मस्यान्ते पुरस्तादाषाढ्यै पौर्णमास्यै दीक्षेते" इति ग्रीष्मकाल उक्तः । संस्थावाजपेयाद्भिन्नः वाजपेयः काम्य एव वा भवतु तथापि कुतो नोऽनुष्ठीयेत न निषिध्यते खलु इति चेत्सर्वतः न निषिध्यते । किन्तु तस्य काम्यकर्मत्वात् एतदनन्तरप्रकरणे काम्यकर्मविचारस्य प्रतिपिपादयिषितत्वात् तदनुसंधाय यद्यधिकारः स्यात् अनुतिष्ठन्तु । इत्थं वाजपेयविचारः समाप्तः ।

—०—

काम्यकर्मानावश्यकताविचारः

उक्थ्यादीनां काम्यत्वे सिद्धे सति अयं विचारयितव्यावसरो भवति। काम्यकर्मणामननुष्ठाने प्रत्यवायः अस्ति वा अनुष्ठाने प्रत्यवायः अस्ति वा इति। तदर्थमिदं चिन्त्यते। नित्यकाम्ययोः अधिकारिभेदः अस्ति वा इति तदर्थमिदं चिन्त्यते। तत्तद्विनियोगविधिभिः विहितेषु कर्मसु यथाधिकारं विनियोगः उत यथाविनियोगमधिकार इति (6-1-2) अधिकरणे "फलार्थत्वात्कर्मणश्शास्त्रं सर्वाधिकारं स्यात्" इत्यादि सूत्राण्यवलम्ब्य विचारः कृतः न्यायमालायाम्।

"अन्धादेरस्त्यसौ नो वा स्वर्गेच्छुत्वात्स विद्यते।
प्रधानोक्त्यनुसारेण यथा शक्त्यङ्गवर्णनम्॥
नैवाज्यावेक्षणादीनां पुरुषं प्रति चोदना।
क्रतुं प्रति विधिस्तस्मात् नाशक्तस्याधिकारिता॥"

अन्धादीनामपि कामनाऽविशेषात् यथा शक्त्यङ्गानामनुष्ठेयत्वात् स्वर्गकाम इत्यादिप्रधानवाक्येन सर्वाधिकारः प्रतीयते। स च आज्यावेक्षणाद्यङ्गवाक्यानुसारेण न सङ्कोचयितुं युक्तः। किन्तु प्रधानानुसारेण अङ्गानुष्ठानमेव सङ्कोचयितुं युक्तमिति अन्धादेरप्यस्त्यधिकारः इति प्राप्ते, उच्यते। यद्याज्यावेक्षणादयः पुरुषार्थतया विधीयेरन् तदा तल्लोपेऽपि न क्रतोर्वैगुण्यम्। इह तु क्रत्वङ्गतया विहिता इति तल्लोपे क्रतुरेव न निष्पद्यते। तस्माद्यथाविनियोगं कर्तुमशक्तस्य नास्त्यधिकार इति सिद्धान्तितम्। अनेन सर्वाङ्गोपेतप्रधानानुष्ठाने यस्य शक्तिरस्ति तस्यैव अधिकार इति सिद्धम्।

किञ्च अत्र अश्रुतमपि अधिकारिविशेषणद्वयं ग्राह्यम्। यथा, "स्वाध्यायोऽध्येतव्यः," "वसन्ते ब्राह्मणोऽग्नीनादधीत" इति वचनाभ्यां स्वतन्त्रतया विहित-अध्ययनवन्तं आधानसिद्धं अग्निमन्तं प्रत्येव क्रतुविधीनां

प्रवृत्तत्वात् तत्तत्क्रतुविधिभिः न विद्या अग्नयः आक्षेपलभ्याः । यदि क्रतु-विधिभिरेव विद्यामन्तरा, आधानसिद्धं अग्निमन्तरा च, क्रतूनामनुष्ठातुम् अशक्त्यत्वात् तयोः आक्षेपलभ्यत्वमङ्गीक्रियेत, शूद्रादीनामप्यधिकारः स्यात् ।

भवतु नाम इति चेत् वसन्ते ब्राह्मणमुपनयीत, स्वाध्यायोऽध्येतव्यः इति वाक्ययोः नष्टाश्वदग्धरथन्यायेन एकवाक्यतां परिकल्प्य उपनीतस्यैव अध्ययनाधिकार इति । एवमेव "वसन्ते ब्राह्मणोऽग्नीनादधीत" इत्यादि-वचनैः ब्राह्मणादीनामेव आधानं विहितमिति तेषामेव आधानसिद्धाः अग्नयः विद्यन्त इति तेषामेव क्रतुषु अधिकारः नान्येषामिति सिद्धान्तभङ्गापत्तिश्च स्यात् । तादृशसिद्धाग्निविद्यानां अधिकारे प्राप्ते सति किमर्थं क्रतुविधीनां आक्षेपकत्वमङ्गीकर्तव्यमिति तत्रैव क्रतुविधयः चरितार्था इत्युक्तम् मी॰ जै॰ 6-1-7 "चातुर्वर्ण्यमविशेषात्" । इत्यादिसूत्राण्यवलम्ब्य—

"शूद्रोऽपि यष्टा नो वा स्यात् अवैधाध्ययनेन वा ।
उपदेष्टृमुखाद्वा अस्य क्रतुवित्त्वेन यष्ट्रुता ।।
त्रिवर्गैर्वेदविद्भिः कृतार्था विधयः क्रतोः ।
नाक्षिपन्ति चतुर्थस्य विद्या तद्यष्ट्रुता कुतः ।।"

अनेन आधानसिद्धअग्निमान्, अध्ययनसिद्धविद्यावान्, सर्वाङ्गोपेत-धानानुष्ठानशक्तिमान् अधिकारीति सिद्धम् । एवं स्थिते नित्यनैमित्तिक-काम्यकर्मसु सर्वेष्वपि सर्वशक्तस्यैव अधिकारः उत नित्येषु यथाशक्तस्य काम्येषु सर्वशक्तिकस्येति विनिगमकं वर्तते वा इति मी-शा-6-3-1सू॰ सर्व-शक्तौ प्रवृत्तिस्स्यात्तथा भूतोपदेशात्" । इति ।

"नित्ये सर्वाङ्गसंहारः शक्त्योवाद्यः फलित्वतः ।
शक्त्या त्यागसंभवेन निमित्ते जीवने स्थिते ।। इति ।

"यावज्जीवमग्निहोत्रं जुहोती"त्यादौ नित्ये कर्मणि सर्वाङ्गाण्युपसंहृत्य तद्विशिष्ट एव प्रयोगः कर्तव्यः, कुतः भावनांशस्य कथं भावस्य, समुच्चितै-

स्सर्वैरङ्गैः परिपूरणेन सर्वाङ्गोपेतस्यैव प्रधानस्य फलवत्त्वात्, इति प्राप्ते, उच्यते—अग्निहोत्रदर्शपूर्णमासादिप्रधानं, तस्य च स्ववाक्यगतजीवननिमित्तेन अन्वयात् सति जीवने प्रधानं कर्म त्यक्तुमशक्यम् । ततः वाक्यान्तरावगतेषु आज्यावेक्षणादिषु अङ्गेषु किञ्चिदङ्गं परित्यज्यापि शक्यैरङ्गैरुपेतं प्रधानं कर्म अनुष्ठेयमिति सिद्धान्तितम् ।

अकरणे प्रत्यवायजनकत्वं नित्यकर्मसु प्रधानस्यैव । कुत इति चेत् जीवनादिरूपनिमित्तवशात् कर्मानुष्ठानस्य आवश्यकता बोध्यते । आवश्यकत्वान्यथानुपपत्त्या नैमित्तिकस्य अकरणे प्रत्यवायजनकत्वं बोध्यते । तेन प्रधानस्य भाव्यापेक्षायां "धर्मेण पापमपनुदति" इति वाक्येन नित्यानां कर्मणां पापक्षयभाव्यकत्वं अवगम्यते । तेन पापक्षयरूपफलसम्बन्धोत्तरकाल एव अङ्गानामन्वय इति अङ्गेषु यथाशक्त्या अनुष्ठानं सिध्यति । तथा हि मी. अ. 6-3-1 निमित्ताक्षिप्तप्रत्यवायजनक-अकरणप्रतियोगित्वमपि प्रधानांश एव न तु साङ्गे । अनेन अङ्गानां अकरणे प्रत्यवायजनकत्वाभावात् यथाशक्त्या अङ्गानि अनुष्ठेयानि । येष्वङ्गेषु शक्तिर्नास्ति तान्यङ्गानि परित्याज्यानि । प्रधानकर्म अवश्यवर्जनीयमेवेति फलितम् । तदेवोक्तम् भा. दी. 6-1-9, 10 अधिकरणयोः न्यायमालायामपि "अङ्गहीनश्च तद्धर्मः" इति सूत्रम् ।

"अङ्गहीनो न कुरुते कर्ता वा नाक्षमत्वतः ।
समाधायाङ्गवैकल्यं करोति द्रव्यहीनवत् ।।"

कश्चित् अक्षिरोगेण आज्यमवेक्षितुमसमर्थः, अन्यः वातरोगेण अस्वाधीनपादः विष्णुक्रमेषु असमर्थः, अतो नाङ्गहीनः कर्मणि अधिकरोतीति उच्यते ।

धनहीनः यथा धनं संपाद्य अधिकरोति तथा विकलाङ्गोपि औषधसेवनादिना वैकल्यं समाधाय अधिकरोतु इत्युक्तम् । शास्त्रदीपिकायां तु-आधानानन्तरं अप्रतिसमाधेयांगवैकल्येऽपि नित्ये कर्मणि अधिक्रियते । न तु काम्येषु इत्युक्तम् । भा. दी. यां तु आधानात् प्रागंगवैकल्येऽपि आधानस्य नित्यत्वात् आधानप्रभृतिनित्यकर्मसु अधिक्रियते । अप्रतिसमाधेयांगवैकल्ये तु

काम्ये, नाधिक्रियत इति सर्वेषामविवाद एव । अत एव नित्येषु काम्येषु च समान एवाधिकारी? उत भिन्नः इति विचार्य तयोः वैलक्ष्यण्यं अस्तीति सिद्धान्तितम् । मी. जै. न्या 6-3-2

"काम्ये शक्योत, सर्वाङ्गशक्त्या लोपस्य संभवात् ।
मैवं लोपे निष्फलत्वाच्च शाब्दमङ्गं न लुप्यते ।।

प्रधानानुष्ठितो यद्वज्जीवनस्य निमित्तता ।
काम्यस्य न तथा यस्मात् काम्यं त्यक्तुं च शक्यते ।।"

यथा नित्येषु अग्निहोत्रादिकर्मसु अशक्यमङ्गं परित्यक्तं तथाकाम्येष्वपि ऐन्द्राग्नसौर्यादिषु अशक्यांङ्गलोपसंभवात् शक्यांङ्गोपेतमनुष्ठेयमिति चेत्, मैवम् । अङ्गलोपे काम्यानां फलानुत्पत्तेः । सर्वाङ्गोपेतमेव हि प्रधानफलसाधनत्वेन विहितम् । तत्र प्रधानस्य त्यागे यथा नास्ति फलं तथा अङ्गत्यागेऽपि । फलसाधनत्वं हि शास्त्रसमधिगम्यम् । ततः यावदङ्गं वा प्रधानं वा शब्दोपात्तं तस्य लोपे साधनत्वं नास्ति । न हि गमनसाधनस्य रथस्य चक्राद्यङ्गेषु अन्यतमस्य वैकल्येन हि गमनसाधनत्वं दृष्टम् । तस्मात् यदा सर्वाङ्गोपसंहारैः कर्तुं शक्यते तदैव काम्यमनुष्ठेयम् । न च नित्येष्वप्येवमस्तु इति शङ्कनीयम् । जीवनं निमित्तीकृत्य तत्र विधानात् । यथा गृहदाहं निमित्तीकृत्य विहिता क्षामवतीष्टिः अवश्यं कर्तव्या । यथा वा लोके निमित्तभूतायां बुभुक्षायां सत्यामवश्यं भोजनं कर्तव्यम् । तथा जीवने निमित्ते सति कर्म अवश्यमनुष्ठेयम् । न च तेन नित्यनैमित्तिकयोर्भेदो नास्तीति शंकनीयम् । नित्यस्य नियतनिमित्तिकत्वात् नैमित्तिकस्य अनियतनिमित्तकत्वाच्च भेदो वर्तत एव। न च जीवनवत् फलकामनाया अपि निमित्तत्वं शङ्कनीयम् । सत्यामपि कामनाया कर्मणः अवश्यंभावाऽभावात् । न हि कामिनः कर्म अननुष्ठाने प्रत्यवायः श्रूयते । ननु शास्त्रीयप्रत्यवायाऽभावेऽपि फलानुत्पत्तिलक्षणो बाधः अस्त्येव । यथा बुभुक्षोरभोजने राजदण्डाभावेऽपि पित्तक्षोभादिरूपो बाधः अस्ति । तद्वत् इति चेत् मैवम् । तर्हि यथा फलं सिद्धयति तथा कामिना प्रयतितव्यम् । फलं च शब्दावगत-

सर्वाङ्गोपसंहारमन्तरेण न सिध्यतीत्युक्तम् । नित्ये तु न फलसाधनत्वेन विधिः । किन्तु जीवननिमित्तसंयोगेन तथा सत्यङ्गवैकल्येऽपि निमित्तेन नैमित्तिकसंयोगः श्रुत्यभिमतः नापैति । ततः विकलाङ्गमपि कर्तव्यमेव अत एव नित्यस्य अकरणे प्रत्यवाय-प्रायश्चित्ते शास्त्रेषु अवगम्येते । न तु काम्येषु । अतः अङ्गवैकल्ये शास्त्राभिमतफलसाधनत्वाभावात् विकलाङ्गं काम्यं न प्रयोक्तव्यम् । तस्मात् काम्यं कृत्स्नाङ्गोपेतं कर्तुं यदा शक्नुयात् तदा कुर्यात् । एतदेव अभिप्रेत्य उक्तम् तै॰ ब्रा॰ 3-6-1, "तदेव यादृक्कादृक्च होतव्यम् ।" तस्मात् नित्येषु अङ्गवैकल्येऽपि काम्येषु अङ्गलोपः न सोढुं शक्यः । अनेन काम्यकर्माननुष्ठानेन प्रत्यवायः नास्तीति सिद्धम् ।

अनेन काम्यकर्मसु साङ्गप्रधानानुष्ठानसमर्थस्यैव अधिकारः इति । तदकरणे प्रत्यवायः नास्तीति सिद्धम् ।

एवमेव न्यायरत्नमालायामपि श्रीपार्थसारथिमिश्रमहोदयैः नित्यनैमित्तिककाम्येषु सर्वेष्वपि विनियोगानुसारतः अधिकारः न तु अधिकार्यनुसारी विनियोगः इति । तथा हि—

"अधिकारो हि सर्वत्र विनियोगानुसारतः ।
अन्यथा ह्यनिवार्या स्यात् शूद्रादेरप्यधिक्रिया ॥
न्यायरत्नमालायां, 130 पुटे 3 श्लो ॥

सर्वत्र न केवलं काम्ये अपि तु नित्येऽपि यस्मिन्कर्मणि यदङ्गजातं श्रुतिस्मृत्याचारैः चोदना, वचन,नामधेय,चोदनलिङ्गादि निमित्तातिदेशेन च प्रापितं तदुपसंहारशक्तियुक्तस्यैव अधिकार इत्युक्तम् । ननु यावज्जीवादिवाक्येषु निमित्तश्रुत्या तद्विरोधात्, तद्बलेन अङ्गहीनस्यापि प्रत्यवायपरिहाररूपफलासाधनत्वावगमाच्च । यथाशक्त्याङ्गानुष्ठानम् । काम्ये तु एवंविधविरोधाभावात् निमित्त अश्रवणादित्यर्थः । सर्वाङ्गोपसंहारेण अनुष्ठानमिति चेत्, न॰ निमित्तवशादपि अवश्यकर्तव्यत्वं अधिकारिण एव सर्वशक्तियुक्तश्च अधिकारी नान्यः । यः यावन्त्यङ्गानि उपसंहर्तुं समर्थः तस्य तावद्भिरेव

फलसिद्धिः इत्युच्यते, तर्हि काम्येऽपि स्वर्गकाममात्रस्य अधिकारावगतेः तस्यैव अनुष्ठानप्रसङ्गः प्रधानवाक्ये फलकामिनः अधिकारावगमात्। तत्रापि अङ्गसंकोचः स्यादिति न्यायसाम्येन सर्वाङ्गशक्तियुक्तस्यैव अधिकार इति। किञ्च यदि निमित्तबलेन अङ्गसंकोचः उच्येत तर्हि शूद्रस्य अनाहिताग्नेः आहिताग्नीनां च विद्याविरहिणां तद्व्यतिरिक्त-अङ्गानुष्ठानशक्तिशालिनामपि अधिकारः स्यात्। तस्मात् सर्वाङ्गशक्तिः अधिकारविशेषणमिति प्राप्ते अभिधीयते।

"निमित्तश्रवणान्नित्यं यथाशक्ति प्रयुज्यते।
काम्यं च तदभावेन निखिलाङ्गसमन्वितम्॥

तथा हि निमित्तस्य च तद्रूपं तत्तस्मिन् सति नैमित्तिकमवश्यं कार्यम्। किमिदम् अवश्यं कार्यमिति अवश्यमेव कर्तारमभिप्रेतेन फलेन योजयतीत्यर्थः।

यथा च एतदेव कार्यत्वं तथा प्रतिपादितं विधिविवेके। अत एव एषः सर्वेषामभिमतः प्रत्यवायपरिहारः प्रयोजनमवकल्प्यते। यदि हि अन्यथा लक्षणं फलं स्यात्। ततः सर्वेषां फलसाधनत्वं श्रुतमुपरुध्यते। ननु विश्वजिन्न्यायेन सर्वेषामभिमतः स्वर्गः फलमिति कुतो न कल्प्यते? उच्यते—तस्य स्वर्गरूपफलस्य मुमुक्षुभिरप्रार्थितत्वात् प्रत्यवायपरिहारस्तु तैरपि इष्यत एव। अयमेव विषयः। "धर्मो विश्वस्य जगतः प्रतिष्ठा ··· धर्मेण पापमपनुदति" इत्यत्र धर्मशब्देन नित्यकर्माणि गृह्यन्ते तत्र नित्यकर्मविधायकेषु वाक्येषु। कस्यापि फलस्य अश्रूयमाणत्वात् इति व्यवस्था कृता मी.भा.यां।

"ननु पापक्षयफलकस्य आवश्यकत्वं स्यात् विघनेष्ट्यादीनामपि पापक्षयफलकत्वात् आवश्यकता प्रसज्येत इति चेत्, न। आवश्यकानां पापक्षयः फलमुच्यते नच तत्फलानामावश्यकत्वमिति। कः पुनः अनयोः विशेषः इति चेदस्ति अयं विशेषः यत्फलमवश्यमेव साधयति तदावश्यकम्। नैमित्तिकञ्च तथा। विधानादि तु अवश्यं फलं साधयतीति न शब्दः अस्ति निमित्तस्य अश्रवणात् फलं तु सर्वेषामिष्टं नाम भवतु। फल-

साधनत्वावश्यंभावश्च, अङ्गसङ्कोचनिमित्तमिति, न यथाशक्ति प्रयोग-प्रसङ्ग इति गभीरोऽयं न्यायमहाह्रदः। आवश्यकस्य पापक्षयफलकत्वं, न तु पापक्षयफलकस्य आवश्यकत्वमित्यनयोः भेद भेदप्रयोजको हेतुः कः? इत्ययमेव गभीरोऽयं न्यायमहाह्रद इत्युक्तम् ननु—

"निमित्तफलसम्बन्ध एकवाक्येन युज्यते।
उद्देश्यद्वयसंबन्धे वाक्यभेदः प्रसज्यते॥" मी.न्या.रत्न. 15

विधेयस्य हि द्वाभ्यां उद्देश्याभ्यां संबन्धेन वाक्यभेदो भवति। न चेत् तथा विधेयस्य कर्मणःफले संबन्धात् तत्कर्तव्यतायाश्च निमित्तेन, न चैवं सति वाक्यभेदो भवति समानजातीयं हि उद्देश्यद्वयं वाक्यं भिनत्ति। न विजातीयम् "यस्य पिता पितामहः सोमं न पिबेत् इत्यत्र निमित्तद्वयं "यः प्रजाकामः पशुकामो वा स्यात्" इत्यत्र फलद्वयं श्रूयते। तथापि न तत्र वाक्यभेदः विजातीयत्वात्। यत्तु मण्डनाचार्येण निमित्तस्य उद्देश्यत्वं वाक्यभेदपरिहारार्थं निराकृतं तत्र विधेयं प्रति उद्देश्यभावाभिप्रायं वार्तिके बहुशः निमित्तस्य उद्देश्यत्वाभिधानात् इत्यलम् अनेन विचारेण तत्सिद्धं नित्यकाम्ययोरधिकारिभेद इति। इतः परं प्रतिनिधिद्रव्यविचारः क्रियते।

प्रतिनिधिविचारः

सर्वमपि कर्म नित्यं काम्यमपि मुख्यद्रव्याभावे प्रतिविधिना समापनीयं? न वा इति सन्देहे जै. न्या. यां. 6-3-4.

"द्रव्यप्रतिनिधिर्नास्ति विद्यते वा न विद्यते।
मानाभावादस्ति कर्मचोदनाक्षेपि कार्यतः॥"

नित्यकाम्यकर्मणोः श्रुतस्य व्रीह्यादिद्रव्यस्य अपचारे द्रव्यान्तरं प्रतिनिधित्वेन कुत्रापि न विहितम्। अतो मानाभावात् नास्ति प्रतिनिधिरिति चेत्। मैवम्। कर्मचोदना हि द्रव्यमन्तरेण अनुपपन्ना द्रव्यसामान्यमाक्षिपति।

तत्र यत्किञ्चित् प्राप्तेः, व्रीहिभिर्यजेतेति व्रीहिद्रव्यस्य व्रीहिशास्त्रं नियामकम्। तच्च असंभवात् यदा न प्रवर्तेत तदा माभून्नियमः। तथापि

सामान्याक्षेपस्य वारयितुमशक्यत्वात् तत्सामान्यं क्वचिद्विशेषे पर्यवस्यतीति इत्यत्र प्रामाण्यसद्भावात् अस्ति प्रतिनिधिः। ततः द्रव्यान्तरेणापि तत्कर्म अनुष्ठेयम्। न तु श्रुतद्रव्याभावमात्रात् कर्मलोपः। काम्ये तावत् कश्चन विशेषः अस्तीति भा॰ यां नित्ये कर्मणि मुख्यद्रव्याभावे प्रतिनिधिना कर्तुं संकल्पः कर्तव्यः। काम्ये तावत् अनारब्धे सति प्रतिनिधिना करिष्यामीति संकल्पः न कर्तव्यः।

किन्तु मुख्यद्रव्यस्य सकल्पानन्तरं अपचारे सति प्रतिनिधिना मापनीयमेव अन्यथा प्रत्यवाय-प्रायश्चित्ते भवतः। तथाहि–तै.सं 2-4-11 यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत" इति त्रैधातवीयेष्टिः गसंकल्पकरणानन्तरम असमापनजन्यप्रत्यवायपरिहारार्थं प्रायश्चित्ततया धीयते। अतः येन केनचिद्द्रव्येण समापनीयमेव। फलं तावत् न भवति। तनिधिद्रव्येण समाप्तत्वात्। केचित् नित्यवत् पापक्षयः फलमिति। ापि तारतम्यमिति केचिद्वदन्ति। एवमेव काम्यस्य कर्मणः आरम्भानन्तरं फले प्राप्ते सति, यद्वा फलप्राप्तौ दोषदर्शनेन वा॰ कामः निवर्तते। कर्मानुष्ठाने प्रयोजनाभावात् न समापनीयमिति चेत् मैवं-प्रकान्तस्य ः असमाप्तौ पूर्वोक्तनिन्दाप्रायश्चित्ते श्रूयेते। तस्मात् समापनीयमेव।

किञ्च यावज्जीवादिवाक्यचोदितानां कर्मणां "सायं जुहोति" तर्जुहोति" "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायां अमावास्यया ा" इत्यादिवाक्यैः सायंप्रातःकालावच्छिन्न, तत्तत्पर्वकालावच्छिन्न-नं च निमित्तीकृत्य नित्यकर्मणामभ्यासः उक्तः। काम्यकर्मणां तु पुरुषः यदा स्वर्गपश्वादीन् कामयते तदा तदा कर्तव्य एवेत्युक्तम्।

फक्किकार्थः

नियतजीवननिमित्तकं नित्यम्। अनियतनिमित्तकं नैमित्तिकं तत्त-नया क्रियमाणं काम्यम्। सामान्येन विद्यावतः अग्निमतः साङ्ग-ठानशक्तियुक्तस्य सर्वत्र अधिकारः, निरूपितम्। विशेषस्तु , अग्निमतश्च नित्यकर्मसु यथाशक्त्यङ्गानुष्ठानं, काम्येषु तु

सर्वाङ्गोपेतप्रधानानुष्ठानम् नित्यकर्मणि आरम्भात् प्रागेव मुख्यद्रव्याभावे प्रतिनिधिद्रव्येण कर्म अनुष्ठास्ये इति संकल्पकरणं, काम्ये तु आरम्भोत्तरं मुख्यद्रव्यस्य अपचारे प्रतिनिधिना समापनम्, तथा समाप्तेऽपि फलं नास्ति। किन्तु पापक्षय एव फलमिति तत्रापि तारतम्यमिति। अनेन नित्यकर्मकरणेन यादृशपापक्षयः न तादृशपापक्षयः अत्रेति तरतमभेदः अस्तीति ज्ञायते। किञ्च नित्येषु

अन्धबधिरादीनामप्यधिकारः

काम्येषु न तथा। निमित्तस्य अवश्यानुष्ठापकत्वं नित्येषु। काम्येषु फलकामनायाः न अवश्यानुष्ठापकत्वम् किन्तु कामनायां सत्यां कर्म अनुष्ठेयं नान्यथा। नित्यानां जीवनादिकं यथा निमित्तम्, न तथा फलकामना - काम्येषु निमित्तम्। किन्तु तस्याः कामनायाः उद्देश्यत्वमात्रम्। नित्यकर्मसु अकरणे प्रत्यवायः कृते तु पापक्षयः। अत एवोक्तम् "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्" इत्यत्र राणक-न्यायसुधाकारादिमतभेदो वर्तते इति अकरणे प्रत्यवायो नाम प्रत्यवायप्रागभावपरिपालनमिति केचित्। नित्यकर्मानुष्ठानकाले यदन्यत्क्रियते तेन प्रत्यवायः जनिष्यतीति स एव अकरणे प्रत्यवाय इति व्यपदिश्यते। काम्येषु न तथा अकरणे प्रत्यवायः कृते न तथा पापक्षयः। किन्तु यथावदनुष्ठाने कामितं फलं सिध्यति। नित्येषु निमित्तं कर्मानुष्ठानात्प्रागेव सिद्धम्। कामना तु तदा तदा जायते निवर्तते च। तस्मात् नित्यनैमित्तिककाम्यानां बहुषु विषयेषु बहुभेदो वर्तते।

अनेन किं प्रतीयत इति चेत् उच्यते—काम्यकर्मविषये तत्तत्कर्मानुष्ठानात्प्रागेव विचारः कर्तव्य इति। तद्विचारमन्तरा तत्र प्रवृत्तिर्न युक्ता अन्यथा विहितस्य अन्यथाऽनुष्ठानप्रसङ्गाच्च। अतः नित्यकर्मवत् काम्यकर्माऽनुष्ठाने आवश्यकता नास्तीति मीमांसकानां सिद्धान्तः।

ननु वेदान्तिनां मते काम्यकर्मणां न केवलं कामितफलार्थत्वं किन्तु विविदिषार्थत्वमपीत्युच्यते।

अत एवोक्तम् वेदान्तशास्त्रे "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यत्र यज्ञशब्देन कर्मसामान्यस्य उक्तत्वात् नित्यनैमित्तिककाम्यकर्मणां सर्वेषामपि संयोगपृथक्त्वन्यायेन विविदिषार्थत्वमपीति ।

यथा—"दध्ना जुहोति, दध्नेन्द्रियकामस्य जुहुयात्" इति वाक्यद्वयं श्रूयते । एकस्मिन् वाक्ये दध्नः होमार्थत्वं, अन्यस्मिन् वाक्ये इन्द्रियरूपफलार्थत्वं चेत्युक्तम् ।

संयोगपृथक्त्वात् विनियोजकवाक्यभेदात् तेनैव न्यायेन अग्निहोत्रदर्शपूर्णमासादीनां "अग्निहोत्रं जुहुयात्स्वर्गकामः" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवाक्यैः तत्तत्फलार्थत्वं तमेतमिति वाक्येन विविदिषार्थत्वमपीति सिद्धान्तितम् । अतः विविदिषार्थेन काम्यानि कर्माण्यप्यनुष्ठेयान्येव भवन्ति । कुतोऽयं काम्यकर्मसु विषये भवतः प्रद्वेषः इति चेत् उच्यते-नायमत्र प्रद्वेषः । किन्तु शास्त्रदृष्ट्या विचार्य यथाशास्त्रमनुष्ठेयं कर्मेति शास्त्रीयोऽयमभिनिवेशः ।

यद्यपि काम्यकर्माणि न निषिद्धानि "चित्रया यजेत पशुकामः" "अग्निहोत्रं जुहुयात् स्वर्गकामः"इत्यादिवाक्येषु "न सुरां पिबेत्" "ब्राह्मणो न हन्तव्यः" इत्यादिवाक्येष्विव नञ्घटितलिङ्प्रत्ययः न श्रूयते । विधिनिषेधयोः पञ्चधा भेदो वर्तते ।

अत एवोक्तम् न्यायप्रकाशे —

"फलबुद्धिप्रमेयाधिकारिबोधकभेदतः ।
पञ्चधा अत्यन्तभिन्नत्वात् भेदो विधिनिषेधयोः ।।
अन्तरं यादृशं लोके ब्रह्महत्याऽश्वमेधयोः ।
दृश्यते तादृग्वेदं विधानप्रतिषेधयोः ।।" इति ।

अतः लिङादि प्रत्ययघटितवाक्यविहितानां कर्मणां काम्यत्वेऽपि नञ् घटितवाक्यनिबद्धानां कर्मणामिव अननुष्ठानं न संभवति । अतः उक्तम् संबन्धवार्तिके 325 श्लो.

"वेदो हि सर्व एवायं कर्मविज्ञानकाण्डयोः" ।
अस्यायमर्थः सर्वोऽप्ययं वेदः ब्रह्मात्मैक्यधीहेतुः साक्षात्पारंपर्याभ्यां पूर्वोत्तरकाण्डयोः एकधीनिष्ठयोरस्ति संगतिरिति ।

ननु रज्जुघटयोरिव तयोस्संबन्धे संभवति । किमप्रसिद्धेन ऐक्यधीहेतुत्वसंबन्धेन इत्याशंक्य आह । अतः उक्तात् ऐक्यधीहेतुत्वात् अन्यसंबंधः नानयोर्युक्तः संयोगादेः दुर्भणत्वात्, नित्यनैमित्तिकानीह कर्तृसंस्कारता । यतः

"नान्यत्र पर्यवस्यन्ति ज्ञानादैकात्म्यगोचरात् । 326 श्लो.

व्याख्या- वेदशब्दसमानाधिकृतसर्वशब्दमसहमानः वेदानुवचनादीनामित्यत्र अनुक्रान्तचोद्यमादत्ते नित्येति । नानाविधेषु कर्मसु मध्ये नित्यनैमित्तिकानि कर्तरि संस्काराख्यशुद्ध्याधानद्वारा हेतवः न काम्यानि । अतः सर्वस्य वेदस्य ज्ञानहेतुत्वं यत् पूर्वश्लोके उक्तं तदसिद्धम् । तदुपरि विविदिषाद्वारा काम्यानामपि काम्यफलं परित्यज्य विविदिषार्थत्वेन संयोगपृथक्त्वन्यायेन अनुष्ठितत्वे कुतः नित्य-नैमित्तिक-काम्यबोधकः सर्वो वेदः न तद्धेतुः? इत्याशंक्य एवमुक्तम् 327 श्लो—

प्लवा ह्येतौ परीक्ष्येते तथा तद्य इहेति च ।
निन्दाश्रुतेः न काम्यानां कार्यताध्यवसीयते ।।

अयमर्थः- काम्यकर्मानुष्ठाने फलं जायते । तद्भुज्यते तेन तत्र पुनः रागो भवति । रागात्प्रवृत्तिः ततः तत्कर्मानुष्ठानं तेन फलमिति चक्रवत् परिभ्रमतीति निन्दाश्रवणेन काम्यानां कार्यता नास्ति कुतः धीहेतुत्वम् ।

"विधि-निन्दा-समावेशः नैवमप्युपपद्यते ।
फलाभिसन्धिमात्रे तु निन्दायामेव युज्यते ।।" 328 श्लो.

व्याख्या :- काम्यानामकार्यत्व, मयुक्तमः विहितत्वात् अनिषेधाच्चेति परिहरति ।

निन्दाश्रुत्या निषेधोऽपि तेषां कल्प्यते । तत्र स्वरूपे, फलाभिसंधौ वा, नाद्यः, चित्रया यजेतेति प्रत्यक्षतः श्रूयमाणत्वात् । अत्र निन्दायोगः

फलाभिसंधिः निन्दायामेवेति कल्पनं युक्तम्। अन्यथा प्रवृत्तिनिवृत्तिसङ्करः स्यात्। फलासंगमात्र निन्दायामिष्टायां स्वरूपे विधिस्संभवत्येव। तथा च विना फलाभिलाषं अनुष्ठितं चित्राद्यपि ज्ञानहेतुरिति पारंपर्येण सर्वकर्मणां तद्धेतुत्वसिद्धिरिति। अस्य ग्रन्थस्य अयं तात्पर्यार्थः—

नित्य, नैमित्तिकानामेव चित्तसंस्काररूपशुद्ध्याधानहेतुत्वात् काम्यकर्मानुष्ठानजन्यफलानुभवेन सर्वदा काम्यकर्मसु प्रवृत्तिरेव भवति। कदाचिदपि निवृत्तिर्न संभवतीति काम्यकर्मानुष्ठानस्य यद्यपि कार्यता नैव सम्पद्यते।

तथापि "सर्वोऽप्ययं वेदः" ब्रह्मात्मैक्यधीहेतुरिति उपक्रमवाक्यानुसारेण काम्यकर्मविषयकनिन्दाश्रवणं फलाभिसंधावेवेति व्यवस्थाप्य फलाभिसन्धिं परित्यज्य काम्यकर्मानुष्ठानेऽपि दोषो नास्तीत्युक्तम्। सुविमर्शे कृते फलाभिसन्धिपरित्यागः न संभवति।

वस्तुतस्तु नैष्कर्म्यसिद्ध्यादिग्रन्थेषु नित्यनैमित्तिकानामेव कर्मणां परम्परया धीहेतुत्वमिति उपपादयिष्यमाणत्वात्।

"मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया॥"

इति भट्टपादैः मी-सा-त- वार्तिके उक्तत्वाच्च "वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचिति- काम्ये मतिस्त्यज्यतां," इति भगवत्पादैरुपदिष्टत्वाच्च नित्यनैमित्तिकानामेव धीहेतुत्वं वक्तव्यम्। ननु यदा कामनां परित्यज्य काम्यकर्माण्यनुष्ठेयानीत्युच्यते तदा काम्यानीति कथं व्यपदेशः संगच्छते इति चेत्, मैवम्। इतःपूर्वं फलकामपदसंयोगात् यानि काम्यानीत्यभिप्रेतानि तान्येव उद्देश्यविशेषणभूतकामनायाः अविवक्षितत्वात् न काम्यानीति व्यपदेशविरोधः। यथा यदा ज्ञानेन वा अज्ञानेन वा यदि सगोत्रा कन्या परिणीता स्यात्, तदा सा भार्या मातृवत्पालनीयेत्युक्तम्। यदि भार्या सा मातृवत्पालनीया न भवति। यदि मातृवत्पालनीया स भार्या न भवति, कथं भार्या इति सिद्धामुद्दिश्य मातृवत्पा-

लनीयत्वं विधीयत इत्याशंक्य ग्रहैकत्वाधिकरणन्यायेन उद्देश्यविशेषणं भार्यात्वमविवक्षितमित्युक्तम् । इतःपूर्वं परिणीता सगोत्रा या भार्यात्वेन अभिप्रेता तामुद्दिश्य मातृवत्पालनीयत्वं विधीयत इत्यनेन उद्देश्यविधेय-विरोधो नास्तीति परिहृतः धर्मशास्त्रे । तेनैव न्यायेन अत्रापि काम्यानीति व्यपदेशविरोधो नास्तीति ज्ञेयम् । प्रकृतमनुसरामः ।

काम्यकर्मानुष्ठानविषये विवरणकारैस्तु एवमुक्तम् "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन काम्यकर्मण्यनुष्ठाय तत्फल-त्यागस्य करणापेक्षया काम्यकर्म-अननुष्ठानमेव श्रेयः इत्युक्तम् ।

गीताशास्त्रेऽपि संन्यासत्यागशब्दार्थविवरणप्रसङ्गे अष्टादशाध्याये अयं विचारः कृतः ।

केचित् स्वरूपतः काम्यकर्मत्याग एव कर्तव्य इति । अपरे तु नित्य-काम्य-सर्व-कर्मफल-परित्याग इति वदन्ति ।

तथा हि –

"काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः" 18-2

अस्यार्थः- न तु केवलं काम्यकर्म-अनुष्ठाने प्रत्यवायाऽभावमात्रम् किन्तु स्वरूपतः काम्यकर्मपरित्याग एव हि गृहिणां मुमुक्षूणां संन्यास इति ।

अस्मिन्विषये श्रीमदप्पयदीक्षितकृत-सिद्धान्तलेशसंग्रहे मतभेदः प्रदर्शितः । तथा हि- कर्मणां मोक्षं प्रति कथमुपयोग इति चेत् भामतीमतानुवर्तिनामयमाशयः । तमेतमिति श्रुत्या जीवाभिन्नं परमात्मानं वेदानुवचनादिभिः वेदितुमिच्छन्तीति बोध्यते । अतः वेदानुवचनादीनि विद्यां प्रति बाह्यानि साधनानि शमदमादीन्यंतरङ्गसाधानानीति बोध्यते । अतः अनुवचनादीनां ज्ञानसाधनद्वारा विविदिषायामुपयोग इति प्रथमतः मुक्तौ, इच्छा, ततः मुक्तिसाधनत्वेन वेदनेच्छा, ततः वेदनेच्छाविषयकेच्छा, ततः तादृशेच्छासाधनत्वेन यज्ञाद्यनुष्ठानं क्रियेत, ततः वेदनेच्छा जायते, ततः

श्रवणमननादिना वेदनं जायते। तेन मोक्ष इति परम्परया यज्ञादीनां मुक्तावुपयोग इति सिद्धम्। तेन वेदानुवचन-यज्ञादीनां साक्षात् विविदिषार्थत्वमिति वदन्ति।

विवरणानुसारिणामयमाशयः

विविदिषन्तीत्यत्र यद्यपि वेदनेच्छायाः विविदिषायाः प्रत्ययार्थत्वेन प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्रधानत्वात् प्रधानभूतविविदिषायामेव यज्ञादीनां विनियोगो वक्तव्यः।

तथापि इच्छा-इष्यमाणयोर्मध्ये इच्छायाः सामान्यरूपत्वात् इष्यमाणस्य विशेषरूपत्वाच्च सामान्यविशेषयोर्मध्ये विशेषस्यैव प्राबल्यं इति न्यायेन वेदनस्य प्रकृत्यर्थत्वेऽपि विशेषरूपत्वात् वेदन एव यज्ञादीनामुपयोग इति वदन्ति। ननु यदि वेदन एव यज्ञादीनां विनियोगस्स्यात् "त्यजतैव हि तत् ज्ञेयं त्यक्तुं परं पदम्" इत्यादिश्रुतिसिद्धकर्मत्यागरूपस्य संन्यासस्य विद्यार्थता पीड्येतेति चेत् न। चित्तशुद्धिद्वारा विविदिषापर्यन्तं कर्मणामुपयोगः। ततः कर्मत्यागस्य विद्यार्थतेति कर्मानुष्ठान-कर्मत्यागयोरुभयोरपि लोके बीजावापात्प्राक् कर्षणं बीजोत्पत्त्यनन्तरमकर्षणमिति कर्षणाऽकर्षणाभ्यां बीजोत्पत्त्युपयोगवत् अवस्थाभेदेन व्यवस्था कर्तव्येति विरोधः परिहृतः। अत एवोक्तम्—

"प्रत्यक्प्रवणतां बुद्धौ कर्माण्युत्पाद्य शुद्धितः।
कृतार्थान्यस्तमायन्ति प्रावृडन्ते घना इव॥" इति
—नै. सि.

ननु एवं चेत् कर्मणां विविदिषार्थत्वपक्षापेक्षया अस्मिन्पक्षे को भेद इति चेत् उच्यते। कर्मणां विविदिषार्थत्वपक्षे श्रवणादिप्रवृत्तिजननसमर्थ-उत्कटेच्छासंपादनमात्रेण कर्मणां चरितार्थता विद्योत्पत्तिर्भवतु मा वा।

विद्यार्थत्वपक्षे तु विविदिषोत्पत्त्यनन्तरं विघ्नोपशमनद्वारा, श्रवणमननादिना विद्योत्पत्तिपर्यन्तं कर्मणां नाशः न संभवति इति विद्योत्पादकत्व-

नियमो वर्तते । अनुष्ठितकर्मोत्पत्त्यपूर्वबलादेव परम्परया विद्योत्पत्तिर्भवतीति । तदेवोक्तं ब्रह्मसूत्रभाष्ये आश्रमकर्माधिकरणे "सहकारित्वेन च" इत्येतत्सूत्र-भाष्यव्याख्यायां भामत्यां सहकारित्वं च कर्मणां न कार्ये विद्यायाः किन्तु उत्पत्तौ कोऽर्थः ? विद्यासहकारीणि कर्माणीति । अयमर्थः—सत्सु कर्मसु विद्यैव स्वकार्ये व्याप्रियत इति । अस्य कल्पतरुग्रन्थे विद्याकारणत्वेन अनुष्ठितेषु कर्मसु सत्सु उत्पन्ना विद्यैव स्वकार्ये अविद्यानिवृत्तिलक्षणे व्याप्रियत इत्यर्थः । अस्य कल्पतरु-परिमलग्रन्थे-ननु कर्मणां विद्यार्थत्वपक्षे विद्योत्पत्तिपर्यन्तं कर्मणां फलापवर्गाणामनुवृत्तिरित्यस्तु । विविदिषार्थानि कर्माणीत्याचार्यपक्षे न तेषां विद्योत्पत्तिपर्यन्तमनुवृत्तिरस्ति । सत्यम् । विविदिषार्थत्वपक्षमाश्रित्य सत्स्विति वर्तमानकालता उक्ता । विविदिषार्थत्वपक्षे तु कालविशेषाऽनादरेण सद्भावमात्रं विवक्षितमित्यदोष इत्युक्तम् । अनेन ग्रन्थेन विद्यार्थत्वेन कर्मानुष्ठाने विद्योत्पत्तिपर्यन्तं न कर्मणां नाशः । विविदिषार्थत्वमनुष्ठाने विविदिषामुत्पाद्य चरितार्थानि । तदनन्तरं विविदिषायाः प्रायिके ज्ञानोत्पत्तिरिति तदभिप्रायेण अनुष्ठितकर्मोत्पत्त्यपूर्वबलादेव परम्परया विद्योत्पत्तिर्भवतीत्युक्तम् । अनेन यज्ञादीनां विविदिषार्थत्वमिति केचित् । विद्यार्थत्वमिति केचित्, इति मतभेदः प्रदर्शितः । तावता "तमेत"मिति वाक्यघटक-यज्ञपदेन नित्यानि, काम्यानि च ग्रहीतव्यानि, उत नित्यान्येवेति विषयनिर्णयः न सञ्जात इति स विचारः कर्तव्य एवेति चेत् सोऽपि विचारः तस्मिन्नेव ग्रन्थे कृतः ।

यदा कर्मणां विद्यार्थत्वमुक्तं तदा आश्रमधर्माणामेव तदर्थत्वम् उत, आश्रमधर्मव्यतिरिक्तानामपीति संशये आश्रमपदं वर्णधर्माणामप्युपलक्षकमित्यङ्गीकृत्य आश्रमधर्माणां ब्रह्मचारिणां विषये अध्ययनादीनां, गृहस्थानां तु यज्ञादीनां, वानप्रस्थानां हितमितभुजां वर्णधर्माणां, ब्राह्मणकर्तृकबृहस्पतिसवनादीनां, राजकर्तृक-राजसूयादीनां, वैश्यकर्तृक-वैश्यस्तोमादीनां चापि विद्योपयोग इति वक्तव्यम् । किञ्च यज्ञशब्दस्य नित्य-काम्य-उभयसाधारणत्वात् उभयविधानामपि, उत, नित्यानामेवेति संशये आदौ भामतीकाराणामाशयः । तथाहि-सर्वापेक्षाधिकरणे "शमदमाद्युपेतः स्यात्"

इति सूत्रभाष्यव्याख्यायां भामत्यां एवमुक्तम्। विद्योत्पादे शमदमादीन्यन्तरङ्गाणि, विविदिषार्थसंयोगात् कर्माणि बहिरङ्गाणीति वचनसन्दर्भे, आश्रमविहित-नित्यकर्मानुष्ठानात् धर्मसमुत्पादः, ततः पाप्मा विलीयते। स हि तत्त्वतः अनित्य, अशुचि-दुःखानात्मनि संसारे सति नित्य-शुचि-सुखात्मलक्षणेन विभ्रमेण मलिनयति चितसत्त्वम्। अधर्मनिबन्धनत्वात् विभ्रमाणाम्। अतः पाप्मनः प्रक्षये प्रत्यक्षोपपत्तिद्वारा अपावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्य तात्त्विकीमनित्य-अशुचि-दुःखरूपताम् अप्रत्यूहं विनिश्चिनोति। ततः अस्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते। ततः तज्जिज्ञासा अस्य उपावर्तते। ततः हानोपायं पर्येषते। पर्येषमाणश्च आत्मतत्त्वज्ञानमस्योपाय इति शास्त्रादाचार्यवचनाच्च उपश्रुत्य तज्जिज्ञासत इति विविदिषोपहारार्थत्वमुखेन आत्मज्ञानोत्पत्तौ अस्ति कर्मणामुपयोग इत्यनेन नित्यकर्मणां विद्यार्थत्वमिति।

कल्पतरुकाराणां मते "ज्ञानमुत्पद्यते। पुंसां क्षयात्पापस्य कर्मणः" इत्यादिवचनबलात् दुरितक्षयस्य विद्यया अपेक्षितत्वात् काम्यकर्मफलस्वर्गादीनां विद्यया अनपेक्षितत्वाच्च नित्यकर्मणामेव विद्यार्थत्वमिति। अत्रायं दृष्टान्तः यथा प्रकृतितः विकृतौ कल्पितोपकाराणामङ्गानां अतिदेशे सिद्धे प्राकृतोपकारातिरिक्त-उपकारकल्पनं नास्ति। तथैव विद्यापेक्षित-दुरितक्षयार्थत्वेन कल्पितानामेव नित्यानां तदर्थत्वे सिद्धे कल्प्य-दुरितक्षयार्थानां काम्यानामपि नित्यानामिव तदर्थत्वकल्पनमयुक्तमिति।

संक्षेपशारीरके तु नित्यानां काम्यानां च कर्मणां विद्यार्थत्वेन विनियोगो उक्तः। यत्तु प्रकृतितः विकृतिषु उपकारमुखेनैव पदार्थानामतिदेशकल्पनं, न तु प्राकृतोपकारातिरिक्तोपकारकल्पनं, तथा पापक्षयोपकाराणां नित्यानां यज्ञानां ज्ञानार्थत्वे प्राकृतपापक्षयातिरिक्तपापक्षयरूपोपकारकल्पनं न भवतीति काम्यानामप्युपयोगार्थत्वे = ज्ञानार्थत्वे नित्यकाम्य-उभयसाधारणं विद्योपयोग्युपकारकल्पनं भवेदिति। तन्न। दृष्टान्तदार्ष्टान्तिकवैषम्यात्। पदार्थानामुपकारपृष्ठभावेन अतिदेशः। अतिदेशः

आनुमानिकः । इह तु विद्यार्थत्वेन यज्ञानां प्रत्यक्षश्रुत्या विनियोगः उपदेशसिद्धः । उपदिष्टानामङ्गानां उपदेशानन्तरं उपकारकल्पनम् । तद्वदत्रापि यज्ञशब्दस्य उभयसाधारणत्वात् विनियोगबलेन विद्योपयोग्युपकारकल्पनं युक्तम् ।

किञ्च नित्यानां दुरितक्षयमात्रार्थत्वेऽपि ज्ञानोत्पत्तिप्रतिबन्धकदुरितक्षयार्थत्वमसिद्धमिति, इदानीं तादृशदुरितक्षयार्थत्वकल्पने तत्कल्पनं नित्य-काम्य-उभयसाधारणं युक्तमिति जानीमः इति ।

यद्यपि ग्रन्थकाराः मतभेदमात्रं विवव्रुः तथापि कर्मणां विविदिषार्थत्वपक्षे प्रायिकी ज्ञानोत्पत्तिः तीव्रबुभुक्षाया इव दृढविविदिषायाः सर्वप्रयत्नेन विद्यासम्पादनसमर्थत्वात् इति यथा उच्यते तथैव नित्यानां काम्यानां च ज्ञानोत्पत्तिप्रतिबन्धककल्पने समानेऽपि नित्यानां प्राधान्येन दुरितक्षयार्थत्वात् तेषामेव अतिशयेन अनुष्ठाने ज्ञानोत्पत्तिप्रतिबन्धकदुरितक्षयार्थत्वमपि संभवतीति कल्पने दृढविविदिषोत्पादनद्वारा विद्यासम्पादकत्वं लाघवमिति भाति । न च तमेतमिति वाक्ये यज्ञपदेन नित्यकाम्य-उभयसाधारणेन नित्यमेव कर्म यद्युपात्तं स्यात् सङ्कोचरूपबाधापत्तिरिति वाच्यम् । मीमांसाशास्त्रे बहुषु अधिकरणेषु निर्विशेषशब्दघटकश्रुतवाक्यार्थनिर्णयेषु वाक्यप्रकरणादिभिः अपेक्षितविशेषार्थपरत्वमङ्गीकृत्य सङ्कोचः कृतः । तथा हि—अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात्" मी॰ शा॰ 3-2-8 अधिकरणे एवं विचारः कृतः ।

ज्योतिष्टोमप्रकरणे श्रूयते "आग्नेय्याग्नीध्रमुपतिष्ठते" इति । अत्र आग्नेयीशब्दस्य सामान्यवाचित्वात् किं प्रकृताभिरप्रकृताभिरपि आग्नीध्रोपस्थानं कर्तव्यं उत प्रकृताभिरेवेति ।

"तत्राग्नेयीति शब्देन सर्वासामभिधानतः ।
अविशेषो न काचिद्धि प्रकृतग्रहणे प्रमा ॥"

इत्यादिग्रन्थेन यथा "अश्वेन गच्छती"त्यत्र अश्वमात्रस्य बोधे सति न विशेषापेक्षा, एवमेव यथा श्रुतस्य आग्नेयीशब्दस्य वाक्यार्थसमवायोप-

पत्तेः न विशेषापेक्षा । प्रधानस्य उपस्थानस्यापि करणत्वेन अन्विताभिराग्नेयीभिरेव निराकाङ्क्षत्वात् न विशेषापेक्षेति । सत्यपि सन्निधौ न मिथः सम्बन्धः । अपेक्षितसन्निधिर्हि सम्बन्धकारकं न सन्निधिमात्रम् । यदि विशिष्येति, श्रुतिजनिताऽविशेषप्रत्ययबाधात् श्रुतिरेव बाधिता स्यात् । अतः प्रकृताभिरप्रकृताभिरग्निदेवताप्रकाशनसमर्थाभिरुपस्थानं कर्तव्यमिति प्राप्ते अभिधीयते ।

"प्रकृता एव गृह्येरन् प्रसिद्धक्रतुसङ्गमाः ।
तासां कार्यविशेषो हि सुखमत्रोपदिश्यते ॥"

इत्यादिना यदि ज्योतिष्टोमप्रकरणे श्रूयमाणानामाग्नेयीनामुपस्थानार्थत्वमुच्येत तदुपस्थानस्य ज्योतिष्टोमाऽपूर्वसाधनत्वमपि प्रकरणबलात् सुखेनैव सिद्धं भवतीत्यादि युक्तिभिः साधारण-आग्नेयीशब्दस्य प्रकृत-ज्योतिष्टोमगत-आग्नेयीपरत्वेन विशेषे सङ्कोचः कर्तव्य इत्युक्तम् । तेनैव न्यायेन अत्रापि सामान्यवाचकस्य यज्ञशब्दस्य विविदिषापदसाहचर्यात् दुरितक्षयार्थानामपेक्षितत्वात् नित्यानां दुरितक्षयार्थत्वेन कल्पितत्वाच्च तेषां तदभिधानं सुखेनैव सिद्धं भवति ।

किञ्च "पानव्यापच्च तद्वत्" इति मी. शा. का. 3-4-16 वैदिक-पानव्यापदधिकरणे एवं विचारितम् । "वि वा एष इन्द्रियेण वीर्येणर्ध्यते यस्सोमं वमिति यस्सोम वामी स्यात् तस्मा एतँ सोमेन्द्रँ श्यामाकं चरुं निर्वपेत्" इत्यनारभ्य श्रूयत इति । तत्र एवं संशयः प्रायश्चित्तार्थतया विहित-सोमेन्द्रेष्टिः लौकिकसोमपाने वमने कृते वा उत वैदिकसोमपानवमने, अथ वा उभयत्र वा इति ।

"तत्राविशेषादुभयोः, दोषाद्वा लौकिके भवेत् ।
दोषो ह्यत्रास्ति वमनात् व्युद्धिरिन्द्रियवीर्ययोः ॥"

इन्द्रियवीर्यव्युद्धिसंयोगात्, लोके धातुसाम्यार्थं सोमपानस्य कृतत्वात् तद्वमने निमित्ते सति इयमिष्टिः कर्तव्या न तु वैदिके वमने । वैदिके तु पानमात्रस्य

शास्त्रार्थत्वात् तत्र वमने कृतेऽपि न दोष इति प्राप्ते ब्रूमः। लोके वमनायैव सोमपानं क्रियते। अतः तत्र वमने दोषो नास्ति। वैदिके तु सोमपानं नाम "हिन्वमे हि गात्राहरिवः" इत्यादि मन्त्रस्य सम्यग्जरणे विनियुक्तत्वात् सम्यग्जरणपर्यन्तमेव भक्षणशब्दार्थ इत्युक्तम्। अतः सम्यग्जरणमकृत्वा यदि सोमे वमने तद्दोषपरिहाराय इयमिष्टिः प्रायश्चित्तार्थतया कर्तव्या। लोके तावत्सोमस्य वमनार्थमेव पीतत्वात्तत्र दोषो नास्ति। तदभावादेव प्रतीकारापेक्षाऽपि नास्ति। वैदिके तु वमनाद्विपद्यत इत्यस्ति दोषः। अत एव इन्द्रियेण वीर्येण व्युर्ध्यत" इत्यस्य क्रतुवैगुण्याभिधानं समुचितमिति शम्भुभट्टीयेऽप्युक्तम्।

"वेदे तु क्रतुवैगुण्यात् समाधित्सोपजायते।
अपेक्षितार्थता तत्र प्रायश्चित्तविधेर्भवेत्॥

अपेक्षितविधिर्ज्यायान् अनपेक्षितचोदनात्।
तेन क्रत्वङ्गमेवेष्टिः फलं चैव न कल्प्यते॥"

अत्र प्रायश्चित्तविधिबलेन प्रथमतः श्रूयमाणसोमशब्दस्य उभयसाधारणत्वेऽपि वैदिकसोमपरत्वेन अपेक्षितार्थत्वमुक्त्वा विशेषे सङ्कोचः कृतः। किञ्च क्रत्वर्थत्वे "फलवत्सन्निधावफलं तदङ्ग"मिति न्यायेन फलकल्पनापि नास्तीत्युक्तं विकृतौ प्राकृतोपकारातिरिक्त-उपकाराऽकल्पनमिव। तथा चेत् प्रत्यक्षतः पुरुषार्थतया विनियोगबलात् विनियोगानन्तरं फलकल्पनं भवतु इति नोक्तम्। तेनैव न्यायेन अत्रापि यज्ञशब्दस्य नित्यकर्मपरत्वेन विशेषे सङ्कोचः कर्तुं शक्यत एव। तथा चेत् नित्यकर्मणां दुरितक्षयार्थत्वकल्पनं न भवतीति लाघवम्। तत्र यथा प्रत्यक्षतः पुरुषार्थत्वेन विनियोगमुक्त्वा विनियोगानन्तरं फलकल्पनं नास्तीत्युक्तम्, एवमेव विविदिषार्थत्वेन विनियोगानन्तरं काम्यानामुपकारकल्पनं नास्तीत्युक्तं भवति।

तत्र यज्ञपदस्य नित्य-काम्य-उभयसाधारण रूपोऽर्थः श्रौतः यागसामान्यवाचिनः यज्ञपदात् श्रुत्या यागसामान्यविषयिणी बुद्धिः सञ्जायते। ततः विविदिषन्ति इति पदसमभिव्याहाररूपवाक्यानुरोधेन विविदिषायाः

दुरितक्षयार्थानामपेक्षितत्वात् दुरितक्षयार्थनित्यकर्मविशेषेण प्रथमतः जायमान-नित्य-काम्य-उभयसाधारणीबुद्धिः नापवर्तितुमर्हतीति। अन्यथा बलाबलाधिकरणन्यायविरोधः प्रसज्येत इति चेन्न, यत्र श्रुत्यवस्थायामेव विशेषावगमः तदर्थं न वाक्यार्थापेक्षा तत्र तथैव भवतु। यथा "दध्ना जुहोती"त्यत्र। यत्र श्रुत्या बोधितोऽर्थः सामान्यरूपस्सन् प्रकरणेन वा वाक्येन वा बोधित-विशेष अपेक्ष्यते तत्र श्रुत्यपेक्षया प्रकरणवाक्यादीनां दुर्बलत्वेऽपि तदपेक्षामन्तरा पदश्रुत्यावगतोऽर्थः संशयग्रस्तस्सन् सिद्धान्तयितुं न शक्यते, तत्र बलाबलाधिकरणन्यायस्य प्रसक्तिरेव नास्तीति अपेक्षितवाक्यसमर्पितविशेषार्थ एव उपादेयः। क्वचिदपि न केवलं पदमात्रस्य प्रामाण्यमस्ति। यदि तथा स्यात् ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र ऐन्द्र्याः गार्हपत्योपस्थानाङ्गत्वं वा इन्द्रोपस्थानाङ्गत्वं वा "ग्रहं संमार्ष्टी"त्यत्र सम्मार्गेण ग्रहं भावयेदित्यत्र ग्रहगतमेकत्वं विवक्षितं न वा इति विचार एव न सङ्गच्छेत। अतः श्रुत्यपेक्षया वाक्यस्य दुर्बलत्वेऽपि वाक्यार्थस्य अपेक्षितत्वात् विशेषार्थसमर्पकत्वेन प्रबलत्वात् सामान्यं विशेषमन्तरा न पर्यवस्यतीति न्यायाच्च सामान्यस्य विशेषे सङ्कोचः कर्तुं शक्यत एव। अयमर्थः, सामान्यरूपोऽर्थः प्रबलप्रमाणबोधितस्सन्नपि सामान्यापेक्षया विशेषस्य प्रबलत्वात् सोऽर्थः विशेषे पर्यवसनीय इति बहुष्वधिकरणेषु सिद्धान्तितः। किञ्च यत्र अर्थद्वयसाधारणवाचकश्शब्दः श्रूयते तत्र तस्य अपेक्षितार्थवाचकत्वं युक्तमिति शूर्पाधिकरणन्यायेनापि सिद्धं भवति। तथा हि– मी. शा. भाट्टदीपिकादिषु 1-2-3 अधिकरणे शूर्पेण जुहोति तेन ह्यन्नं क्रियते इत्यत्र विचारः कृतः। अत्र, हिशब्दस्य कारणवाचित्व-प्रसिद्धिवाचकत्व-उभयसाधारणत्वेन, हिशब्दस्य कारणवाचकत्वमुत प्रसिद्धिवाचकत्वमिति सन्देहे कारणवाचकत्वमङ्गीकृत्य अन्नसाधनत्वाद्धोमसाधनत्वमिति, यद्यदन्नसाधनं तेन तेन होतव्यमिति व्याप्त्या अन्नसाधनभूतानां सर्वेषां दर्वीपिठरादीनां शूर्पपदमुपलक्षकमिति धिया दर्वीपिठरादीनामपि होमसाधनत्वं विधीयत इति पूर्वपक्षीकृत्य हि-शब्दस्य प्रसिद्धार्थद्योतकत्वं वक्तव्यमिति शूर्पेण जुहोतीति होमं प्रति शूर्पस्य साधनत्वेन

विधीयमानत्वात् यद्विधेयं तत्स्तुत्यमिति न्यायेन प्राशस्त्यस्यापेक्षितत्वात् अनपेक्षितकारणवाचित्वमुपेक्ष्य प्राशस्त्यप्रतिपादनार्थं हिशब्दस्य प्रसिद्धार्थद्योतकत्वमर्थः इति सिद्धान्तितम् । अन्यत्र प्रायणीयेष्टौ चतुरुपभृति इति श्रूयते । तत्र प्रकृतितः उपभृति अष्टग्रहणे अतिदिष्टे सति किमर्थं चतुरिति ग्रहणचतुष्टयं विहितमिति अपेक्षायां "न ह्यत्रानूयाजान्यक्ष्यती"ति वचनेन हि=यतः अत्र अनूयाजाः न यक्ष्यन्ते अतः चतुर्ग्रहणमिति वक्तव्यावसरो वर्तत इति अत्र हिशब्दस्य कारणवाचित्वस्य अपेक्षितत्वात् कारणवाचित्वं सिद्धान्तितम् । अतः उभयसाधारणशब्दस्यापेक्षितार्थवाचित्वं वक्तव्यमिति मीमांसाशास्त्रे बहुषु अधिकरणेषु निर्णीतमिति ज्ञायते । यत्तु तमेतमिति वाक्ये नित्यान्येव कर्माणि यदि गृहीतानि स्युः तेषामपि ज्ञानोत्पत्तिप्रतिबन्धकपापक्षयरूपफलस्य कल्प्यत्वात् तत्कल्पनाऽविशेषात् नित्य-काम्य-उभयसाधारणकर्मणां संयोगपृथक्त्वन्यायेन विविदिषार्थत्वमित्युक्तमिति, तन्न । नित्यानां कर्मणां स्वतः दुरितक्षयार्थत्वात् तेषामेव ज्ञानोत्पत्तिपर्यन्तं अनुष्ठानं तीव्रतरं स्यात् । ज्ञानोत्पत्तिप्रतिबन्धकदुरितक्षयः स्वत एव भवतीत्युक्तम् । किञ्च तेषां दुरितक्षयार्थत्वं क्लृप्तं न तु कल्प्यम् । तदेवोक्तं श्रीकण्ठभाष्ये, शिवार्कमणिदिपिकायां च-"यावज्जीवमग्निहोत्रं जुहोती"ति विहितनित्यकर्मापेक्षया "तमेत"मिति वाक्येन विद्योत्पादनार्थं विहितयज्ञपदोक्तकर्मणः भेदोऽभेदो वा । यद्यभेदः तदा विद्यार्थत्वेन विहितकर्मानुष्ठानापेक्षया नित्यकर्मणः पृथक्प्रयोगः कर्तव्यो न वा इति विचार्य उभयोः कर्मणोः अभेद इति सिद्धान्तीकृत्य प्रसंगन्यायेन काम्यार्थमनुष्ठितप्रयोगेणैव नित्यप्रयोगस्यापि सिद्धिरित्यंगीकृत्य सकृदेव अनुष्ठेयमित्युक्तम् । कर्मैक्ये प्रमाणान्तरसमुच्चयार्थं "अनभिभवं च दर्शयति"–इति नित्यकर्मणां "धर्मेण पापमपनुदती"ति श्रुत्या पापापनोदनं फलमित्युक्तम् । यत्तु कैश्चित् पापक्षयरूपफलस्य तेषां नित्यकर्मणां सत्त्वेऽपि ज्ञानोत्पत्तिप्रतिबन्धकदुरितक्षयकल्पनमावश्यकमिति तत्कल्पनाविशेषात् नित्य-काम्य-उभयसाधारणेन तत्कल्पनीयमित्युक्तम् । तन्न । अत्र श्रीकण्ठभाष्ये "धर्मेण पापमपनुदती"ति श्रुतिः विद्योत्पत्तिप्रतिबन्धकनिवर्तनेन विद्यायाः अनभिभवं कर्मानुष्ठानकार्यं च दर्शयति इति ।

शिवार्कमणिदीपिकायामपि "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते।" इत्यादिभिः कर्मणां विद्यासाधनत्वे विद्योत्पत्तौ दुरितनिवृत्तिः द्वारमिति "धर्मेण पापमपनुदती"ति श्रुतिः दर्शयति। अतः विद्यापेक्षित-दुरितनिवृत्तिद्वारजनकत्वेन क्लुप्तस्यैव कर्मणः विद्यासाधनत्वं युक्तमित्यपि कर्मैक्यमेव अवसीयत इति भावः। किंच, "विद्यां चाविद्यां च यस्तद्वेदो-भयगुं सह, अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।" इति मन्त्रस्य अयमर्थः। विद्यां ब्रह्मोपासनां, अविद्यां तत्सहकारिकर्मबृन्दं चेति तदुभयं यः सहवेद-सहकारि-सहकार्य-भावेन युगपदनुष्ठेयं वेद, स विद्वान् अहरहरनु-ष्ठीयमानेन कर्मणा मृत्युं तीर्त्वा विद्यानुवृत्ति-तद्वैशद्यादि प्रतिबन्धक-दुरित-जातमभिभूय विद्यया साक्षात्कारपर्यन्ततया मुक्तिं प्राप्नोति इति अनेन नित्यकर्मणां ज्ञानोत्पत्तिप्रतिबन्धकदुरितक्षयार्थत्वं क्लुप्तमिति अप्पय्यदी-क्षितानामाशयः। काम्यानां तु तत्तत्फलसाधनत्वेन विहितत्वात् तत्र प्रति-बन्धकदुरितक्षयार्थत्वं कल्प्यम्। क्लुप्तकल्पययोर्मध्ये क्लुप्तस्यैव (पिकनेमाधि-करण) न्यायेन प्राबल्यं वक्तव्यम्। तथाहि पिकनेमाधिकरणे पिक नेम सत् तामरसादिशब्दानां अर्थेषु प्रसिद्धिर्नास्ति। म्लेच्छेषु तत्तदर्थेषु प्रसिद्धिर्वर्तते। सोऽर्थः ग्रहीतव्यो न वा इति—संशये पूर्वाधिकरणे यववराहाधिकरणे आर्यप्रसिद्धेरेव बलीयस्त्वमित्युक्तत्वात् तत्प्रसिद्धचभावे निगमनिरुक्तादिभिः अर्थः कल्पनीयः म्लेच्छानामनभियुक्तत्वात् इति पूर्वपक्षीकृत्य एकस्य पदस्य आर्याणामन्यस्मिन्नर्थे प्रसिद्धिः म्लेच्छानामन्यस्मिन्नर्थे प्रसिद्धिः यत्र वर्तते तत्र आर्याणां म्लेच्छापेक्षया अभियुक्तत्वात्। तथैव भवतु। येषां शब्दानां आर्यैः निगमनिरुक्तादिसहायेन अर्थः कल्पनीयः म्लेच्छेषु क्लृप्तः। क्लुप्तस्य सत्त्वे अर्थकल्पनमन्याय्यमिति क्लुप्तार्थ एव गृहीतव्य इति निर्णयः कृतः तेनैव न्यायेन दुरितक्षयार्थत्वेन क्लुप्तानां नित्यानां विविदिषार्थत्वं वक्तुं युक्तम्।

यत्तु उपकारपृष्ठभावेन पदार्थानां प्रकृतितः विकृतिषु प्राप्तानां प्राकृतोपकारातिरिक्त-उपकार कल्पनं नास्ति तद्वत् पापक्षयार्थानां नित्यानां विविदिषार्थत्वे पापक्षयातिरिक्त-पापक्षयकल्पनं नास्तीत्यत्र दृष्टान्त-दार्ष्टा-न्तिकवैषम्यं वर्तते. विकृतिषु उपकारपृष्ठभावेन अतिदेशः आनुमानिकः। इह

तु नित्यानां काम्यानां च सर्वेषां कर्मणां विविदिषार्थत्वेन प्रत्यक्षया श्रुत्या विनियोगः प्रत्यक्षस्य प्रबलत्वात् प्रत्यक्षतः उपदिष्टानां उपकारकल्पनं युक्तमिति, तत्र प्रत्यक्षानुमानयोः प्रत्यक्षस्य प्रबलत्वेऽपि प्रमाणप्रमेययोः प्रमेयस्य प्राबल्यमित्यन्यत्रोक्तम्। तथाहि वेदं कृत्वा वेदिं करोति इति श्रुत्या वेदवेदिकरणयोः पौर्वापर्यरूपः क्रमः विहितः एतन्मध्ये श्रुतनिमित्तं प्राप्तं "श्रुते आचामेदि"ति नैमित्तिकमाचमनं विहितं स्मृत्या। वेदकरणानन्तरं श्रुते प्राप्ते श्रुत्युक्ता वेदिः करणीया उत स्मृत्युक्तमाचमनं कार्यमिति संशये श्रुतेः स्मृत्यपेक्षया प्रबलत्वात् वेदकरणानन्तरं श्रुत्युक्ता वेदिः करणीयेति पूर्वपक्षीकृत्य आचमनस्य स्मृत्युक्तत्वेऽपि पदार्थत्वात् क्रमस्य श्रुत्युक्तत्वेऽपि पदार्थापेक्षया गुणत्वात् प्रमाणापेक्षया प्रमेयस्य प्राबल्यमिति वेदिकरणानन्तरं श्रुते श्रुत्युक्तक्रमं बाधित्वा स्मृत्युक्ताचमनं कार्यमित्युक्तं, तेनैव न्यायेन वाक्यान्तरेण दुरितक्षयार्थानां नित्यानां कर्मणां यज्ञपदोक्तौ आनुमानिकत्वेन दुर्बलत्वेऽपि प्रमेयत्वेन प्रबलत्वात् नित्य-काम्य-उभयसाधारण-कर्मवाचकत्वेन यज्ञपदस्य प्रत्यक्षत्वेन प्रबलत्वेऽपि प्रमाणक्षयार्थत्वेन कल्पितानां कर्मणामानुमानिकत्वेऽपि कल्पितत्वेन प्राबल्यं वर्तत इति। अत्र यज्ञपदेन नित्यान्येव गृहीतव्यानि।

किञ्च विकृतिपदभावनायाः कथमाकाङ्क्षायां प्रकृतितः उपकारपुष्ठभावेन पदार्थानामतिदेशः, सः आनुमानिकः दुर्बल इति यदुक्तं तन्न सङ्गतम्। कथंभावाकाङ्क्षायां अतिदेशप्राप्त-पदार्थविषये तथा वक्तुं शक्येत। अत्र कथंभावाकाङ्क्षैव नोदेति। भावनायाः अंशत्रयमध्ये किमित्याकाङ्क्षायां विविदिषाया भाव्यत्वेनान्वयः। केनेत्याकाङ्क्षायां यज्ञेन इति तृतीयान्तपदोक्तकर्मणां करणत्वेनान्वयदशायामेव यज्ञपदोक्तकर्माणि कानि इति स्पष्टमनभिहितत्वात् कथंभावाकाङ्क्षायाः प्रागेव यज्ञशब्दार्थः क इति संशयः संजातः तदपनोदनार्थं अर्थनिर्णयः अपेक्षितः। स निर्णयः समभिव्याहृतविविदिषापदसाहचर्यात् विविदिषायाः दुरितक्षयार्थानां कर्मणामपेक्षितत्वात् दुरितक्षयार्थनित्यकर्मपरत्वं वक्तुं युक्तम्। किञ्च तमेतमित्यत्र प्रत्यक्षया

यज्ञपदश्रुत्या स्पष्टतया काम्यानामपि विविदिषार्थत्वेन विनियोगः कृतः स्यात्। उपदेशानन्तरमुपकारकल्पनं युक्तमिति वक्तुं शक्येत।

तथा च अत्र यज्ञपदस्य नित्यकर्मपरत्वमिति, तथा चेत् कल्पत-उपकारातिरिक्त - उपकाराऽकल्पनं मीमांसामतमिति कल्पतरुकारमतम्। उपदिष्टानामङ्गानां विनियोगानन्तरं उपकारकल्पनमित्यपि मीमांसकमतमिति संक्षेपशारीरिककर्तृमतम्। यद्यप्युभावपि मीमांसकसम्मतौ प्रदर्शयतः तथापि प्रस्तुतयज्ञपदार्थविवादे कल्पतरुकारेण प्रदर्शितमीमांसकसम्मतिरेव अत्रानुकूलेति बहुग्रन्थस्वारस्यात्, बह्वधिकरणसिद्धान्तानामत्र सुखेन समन्वयाच्च वक्तुं युज्यत इति मम भाति।

ननु काम्यानां "स्वर्गकामो यजेत" इत्यादिवाक्यैः तत्तत्फलार्थत्वेन विनियुक्तत्वेऽपि "एकस्य तूभयत्वे संयोगपृथक्त्वात" इति संयोगपृथक्त्वन्यायेन विद्यार्थत्वमपि भवतु इति चेत्, उच्यते। भवतु नाम संयोगपृथक्त्वन्यायः। स न्यायः नित्यानामेव दर्शितः ब्रह्मसूत्रभाष्यादिषु। तथाहि सर्वापेक्षाधिकरणे आश्रमकर्मणां विद्यासाधनत्वमवधारितं इत्याश्रमाधिकरणे विहितत्वाच्च "आश्रमकर्मापि" इत्यत्र अमुमुक्षोरपि आश्रममात्रनिष्ठस्य विद्यामकामयमानस्य तान्याश्रमकर्माण्यनुष्ठेयानि न वेति विचारितम्। तत्र तमेतमिति वचनेन विद्यासाधनत्वेन विहितत्वात् विद्यामनिच्छतः फलान्तरं कामयमानस्य नित्यान्यनुष्ठेयानि। अथ तस्याप्यनुष्ठेयानि तर्हि एषां आश्रमकर्मणां विद्यासाधनत्वं न संगच्छेत् नित्यानित्यसंयोगविरोधादिति प्राप्ते अमुमुक्षोरपि आश्रममात्रनिष्ठस्य, यावज्जीवमग्निहोत्रं जुहोति, इत्यादिना विहितत्वात् तान्याश्रमकर्माणि कर्तव्यान्येव। नहि वचनस्यातिभारः। यत्तु, एवं सति एषाम् "तमेत"मिति वचनेन यद्विद्यासाधनत्वमुक्तं तन्न स्यादिति। तन्नेति। "सहकारित्वेन च" इति सूत्रेणोत्तरमुक्तम्। सहकारीणि चैतानि स्युः। तमेतमित्यादिना विहितत्वादेव। तदुक्तम्-"सर्वापेक्षा च" इत्यत्र "न चेदं विद्यासहकारित्ववचनमाश्रमकर्मणां, प्रयाजादीनां दर्शपूर्णमासाख्यकर्मणः सहकारित्वमिवेति मन्तव्यम्। दृष्टान्तदार्ष्टान्तिक-

वैषम्यात् । स्वर्गरूपफलसाधनत्वेन दर्शपूर्णमासादिकर्मविहितं, तत्स्वर्गादि-रूपफलसिसाधयिषया सहकारिसाधनान्तरमपेक्षते । नैवं विद्या अविधिलक्षणत्वात् विद्यायाः अपाध्यत्वाच्च । विद्याफलस्य अयमर्थः-विद्यायाः अपवर्ग-साधनत्वेन अविहितत्वात् फलस्य अपवर्गस्य असाध्यत्वाच्च । स्वरूपावस्थान-लक्षणो हि स अपवर्गः, न च स्वं रूपं ब्रह्मणः साध्यं, नित्यत्वात् । विधि-लक्षणं हि साधनं सहकारिसाधनान्तरमपेक्षते । यथा दर्शपूर्णमासादि । तदे-वोक्तं भामत्यां "ग्राहकग्रहणपूर्वकत्वादंगभावस्य । विधेश्च ग्राहकत्वात् । अविहिते तदनुपपत्तेः ।" इति विद्यायाः अविहितत्वेन विद्यायाः फलजनने आश्रमकर्मणामङ्गत्वं सहकारित्वं चेति नोपपन्नम् । तदेवोक्तं "अग्नीन्ध-नाद्यनपेक्षा" इत्यत्र तस्मादुत्पत्तिसाधनत्व एव एषां सहकारित्ववाचोयुक्तिः । न चात्र नित्यानित्यसंयोगविरोधः आशंक्यः । कर्मण अभेदेऽपि संयोगभेदात् । नित्यो ह्येकस्संयोगः, "यावज्जीवमग्निहोत्रं जुहोति" इति । अनित्यः अपर-स्संयोगः, "तमेतमिति" तस्य विद्याफलत्वं नाम तस्य विद्यैव फलमित्यर्थः । संयोगभेदेन एकस्यैव कर्मणः उभयार्थत्वम् । सवथाप्याश्रमकर्मत्वपक्षे विद्या-सहकारित्वपक्षे च त एव अग्निहोत्रादयो धर्माः अनुष्ठेयाः । त एवेत्यनेन कर्मभेदशङ्का निवृत्ता । मासाग्निहोत्रन्यायेन कर्मभेदो नास्तीति । तमेत-मिति श्रुत्या सिद्धवदुत्पन्नरूपाण्येव यज्ञादीन विविदिषायां विनियुङ्क्ते । न तु "मासमग्निहोत्रं जुहोति" इतिवत् अपूर्वं कर्म । इति श्रुतिलिङ्गं दर्श-यित्वा स्मृतिलिङ्गमपि दर्शयति । "अनाश्रितः कर्मफलं काम्यं कर्म करोति यः । विज्ञातकर्तव्यताकमेव विद्योत्पत्त्यर्थम् ।" इति, "यस्यैते चत्वारिंशत्सं-स्काराः" इत्याद्याच संस्कारत्वप्रसिद्धिः वैदिकेषु कर्मसु या वर्तते सा संस्कृतस्य कर्मणः विद्योत्पत्तिमभिप्रेत्यैवेति । अतः आश्रमकर्मैव विद्यार्थमपि विनियुज्यत इति कर्माऽभेद एव । कर्माऽभेद इत्यस्य नित्यकर्माभेद इत्यर्थः, प्रकृतत्वात् । तस्माद्यज्ञादीनि आश्रमकर्माणि च भवन्ति, विद्यासहकारीणि चेति निश्चितम् । ननु आश्रमकर्माणि इत्यनेन नित्यकर्माणीति कथमुच्यते इति चेत् सत्यम् । भाष्ये तावत् "यावज्जीवमग्निहोत्रं जुहोतीत्युदाहृत्य तस्यैव विद्यासाधनत्वमिति प्रयोगभेदस्य सत्त्वेऽपि कर्मभेदो नास्तीति विनियोजक-

वाक्यद्वयस्य सत्त्वात् संयोगपृथक्त्वन्यायश्च प्रदर्शितः। किं च विधुराधिकरणे विधुरादीनां विद्यायाः अधिकारः अस्ति वा न वेति विचारावसरे कल्पतरु-परिमलग्रन्थे "यदि नित्यानामेव यज्ञादीनां विनियोगभेदेन विद्यार्थत्वे तद्रहितानां विधुरादीनां न विद्याधिकार इति संगतिः प्रदर्शिता। अनेनापि आश्रमकर्माणि नित्यान्येवेति स्पष्टं प्रतीयते। अत एव कल्पतरुकारः एवमाह —

निमित्तेन जीवितेन नित्यं सर्वदा संसारिणामीहितः इष्ट-उपात्त-दुरितक्षयः प्रयोजनं यस्य तत्तथोक्तम्। अनेन फलवत्त्वेऽपि नित्यत्वं कर्मण उपपादितम्। विद्याङ्गतया चेत्यत्र कर्तव्यमित्यनुषङ्गः।

ननु विरक्ताधिकारायाः विद्यायाः नित्यसमीहितफलत्वाभावात् तदङ्गत्वेन अनुष्ठीयमानस्य नित्यत्वं न स्यात्। ततश्च विविदिषार्थत्वेन कर्म कुर्वतः प्रत्यवायपरिहाराय नित्यप्रयोगोऽपि पृथक्कर्तव्यः। न चेत् नित्यप्रयोगस्यैव अनित्यत्वं स्यादिति चेन्नेत्याहुः। विद्यायाः "कादाचित्कतयेत्यादिना" यथा स्वर्गार्थः अग्निहोत्रप्रयोगः नित्यप्रयोगं विकृत्य प्रयोगस्य उभयत्राविशेषात् नित्यविधेः प्रयोजकत्वं बाधित्वा निविशते। यथा वा "यदि राजन्यं वैश्यं वा याजयेत् स सोमं विभक्षयिषेत् तस्य न्यग्रोधास्तिभिनीराहृत्य तास्संपिष्य दधन्युपमृज्य तस्मै भक्षं प्रयच्छेन्न सोममिति" इति नैमित्तिकः फलचमसप्रयोगः नित्यं सोमप्रयोगं विकृत्य निविशते। काम्यनैमित्तिकाभ्यां नित्यकार्यसिद्धेः। यादृशो नित्यप्रयोगः करणार्थत्वेन विहितः तादृशस्य इतरत्र प्रत्यभिज्ञानाच्च न पुनः प्रयोगावृत्तिः नापि नित्यप्रयोगस्य अनित्यतापत्तिः। एवमत्रापीत्युक्तत्वात् भामती-कल्पतरुकाराणां मते नित्यानामेव संयोगपृथक्त्वन्यायः प्रदर्शित इति सिद्धम्।

एतावता ग्रन्थेन नित्यानां काम्यानां च विविदिषार्थत्वे, भामतिमतानुवर्तिनां, विवरणानुसारिणां, कल्पतरुकाराणां, संक्षेपशारीरिकग्रन्थकर्तृणां च, मतभेदः विवृतः। यद्यप्यत्र नित्यकाम्ययोः संयोगपृथक्त्व-

न्यायः प्रदर्शितः। वस्तुतस्तु काम्यानामपि संयोगपृथक्त्वन्यायः अन्वीयते तन्न्यायस्वरूपप्रदर्शनप्रकारः एवं नित्यक्रतूनां, काम्यक्रतूनां च क्रत्वंगभूत-द्रव्याणां देवयजनादीनां च नामान्युल्लिख्य विनियोजकवाक्यद्वयं यत्र श्रूयते तत्रायं न्यायः, यथा "यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्श-पूर्णमासाभ्यां यजेत, वसन्ते वसन्ते ज्योतिषा यजेत, दध्ना जुहोति, समेयजेत, नाभिदघ्नयः परियन्तीयाः" इत्यादि नित्यतया श्रूयते। अग्निहोत्रं जुहुयात्स्वर्गकामः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्ग-कामो यजेत, दध्नेन्द्रियकामस्य जुहुयात्, नीचैस्सदो मनुयाद्वृष्टिकामस्य-इति काम्यानि। एकस्य काम्यस्य अन्यकाम्यार्थमपि तत्क्रतुनामप्रातिस्विक-तया उपादाय यत्र विनियुज्यते तत्रापि संयोगपृथक्त्वन्यायः दृश्यते। यथा "अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावी" दीर्घरोगी तद्विमुक्तिकामः अनेन त्रिहविष्केण यागेन यजेत। पुनरयं यागः अन्यथा काम्यार्थं विधीयते। "एतामेव निर्वपेच्च-क्षुष्कामः" इति एतच्छब्देन पूर्वपरामृष्टिः यागः उच्यते। एवमेव "वैश्वानरं द्वादशकपालं निर्वपेद्वारुणं चरुं दधिक्रावण्णो चरुमभिशस्यमानः, इति अभिशस्यमानः - पातकारोपेण दूष्यमाणःसन् अनेन त्रिहविष्केण यागेन यजेत - तेन स्वात्मानं बन्धुः - रोचयति, आरोप्यमाणं पापं अपहते-विनाशयति। स्वात्मानं पूतं करोतीति च। "एतामेव निर्वपेत्प्रजाकामः प्रजाकामनयापि एतामेव पूर्वोक्तां त्रिहविष्टामिष्टिं निर्वपेदिति, एवमेव "वैश्वानरं द्वादशकपालं निर्वपेत् – पुत्रे जाते", इति पुत्रजनने निमित्ते सति। तस्य पुत्रस्य पूतादिफलसमृद्ध्यर्थं एकहविष्कावैश्वानरेष्टिर्विहिता। इयमेवेष्टिः" अववा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वा पादयति सुवर्गाय हि लोकाय दर्शपूर्ण-मासाविज्येते वैश्वानरं द्वादशकपालं निर्वपेत्" इति दर्शपूर्णमासातिक्रमदोष-परिहारार्थमपि विहिता। एवं काम्ययागस्यापि अन्यत्र एतद्यागनाम मुल्लिख्य अन्यकामार्थमपि विनियुज्यते तत्रैव काम्ययागस्यापि संयोग-

पृथक्त्वन्यायः । तथा च यत्र प्रातिस्विकतया अन्यकामार्थं अन्यकाम्ययागस्य नाम नोल्लिखितं तत्र न्यायमात्रेण नानुष्ठानं संभवति - अन्यथा पशुरूप-फलोद्देशेन "चित्रया पशुकामो यजेत" इति विहितस्य यागस्य वृष्टिकाम-नयाप्यनुष्ठानापत्तिः । यत्र सर्वफलार्थं एकं कर्म "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ, सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः"इत्यादिना विहितं तत्रैकस्यैव कर्मणः तत्फलार्थं प्रयोगस्यावृत्तिः विद्यते । प्रकृतौ तु तमेतमिति वाक्येन विद्योद्देशेन यज्ञपदोक्तं कर्म विहितं एतदपि काम्यमेव । यद्यप्यत्र यज्ञ-पदेन नित्यं वा काम्यं वा इति विशेषरूपेण नाभिहितम् । अत्रैव विचारणीयावसरो वर्तते । पूर्वोदाहरणवत् अन्यकाम्ययागानां नाम प्राति-स्विकतया न निर्दिष्टं यद्यपि नित्यकर्मणामपि नाम्नः अनिर्दिष्टत्वं तुल्यमेव तथापि "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेने"ति वाक्ये विविदिषन्तीति पदसमभिव्याहारात् विविदिषोत्पादनद्वारा विद्यायाः उत्पत्तौ दुरितक्षयानामपेक्षितत्वात् बहुग्रन्थेषु यज्ञपदस्य नित्यकर्मपरत्वेन सिद्धान्ततत्वाच्च यज्ञपदोक्त-नित्यकर्मणामेव संयोगपृथक्त्वन्यायेन विद्यार्थत्वमिति वक्तव्यम् । अस्मिन्विषये गीताशास्त्रकर्तृतद्व्याख्यातृणां च आशयः विन्रियते । तथा हि— भ. गी. १८ अध्याये संन्यासत्याग-शब्दार्थविवरणप्रसङ्गे, एवं विचारः कृतः । केचित् स्वरूपतः काम्यकर्म-परित्याग एव कर्तव्य इति । अपरे तु नित्य-काम्य-सर्वकर्मफल-परित्याग इति वदन्ति ।

"काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः" इति काम्य-कर्मणां पापमलापकर्षणपूर्वक-ज्ञानयोग्यतापादक-चित्तशुद्धौ अनुपयोग इति निषिद्धकर्मवत् स्वरूपतः तत्त्यागः कर्तव्य इति केचिद्वदन्ति । तत्र प्रथमतः अर्जुनः श्रीकृष्णं प्रत्येवमपृच्छत्—

"संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ।।" १८-१

हे भगवन् संन्यासत्यागशब्दौ बहुषु स्थलेषु "मयि सर्वाणि कर्माणि संन्यस्य" "योगसंन्यस्तकर्माणं" "सर्वकर्मफलत्यागः" इति च प्रयुक्तौ तत्र तत्र

त्वया उक्तयोः संन्यासत्यागशब्दयोः प्रत्येकमर्थविशेषं ज्ञातुमिच्छामीति। एतत् प्रश्नतात्पर्यं विज्ञाय श्रीकृष्णः एवं समाधानं वक्तुमुपचक्रमे।

यद्यपि "संन्यासयोगाद्यतयश्शुद्धसत्वाः" "त्यागेनैके अमृतत्वमानशुः" इति तै॰ ना॰ उपनिषदि श्रवणात् "मया इदं संन्यस्तं" "मया इदं त्यक्तं" इति लोके प्रयोगात् संन्यासत्यागशब्दयोः वेदे लोके च विसर्ग इत्येवार्थः न त्वर्थान्तरम्। तथापि गृहमेधिनां विषये तयोश्शब्दयोरर्थं केचिदन्यथा वर्णयन्ति। तत्र प्रथमतः तेषां मतभेदं वक्ष्यामीति भगवानुवाच।

"काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुः त्यागं विचक्षणाः॥"

इति। "अग्निहोत्रं जुहुयात्स्वर्गकामः" "पुत्रकामो यजेत" "पशुकामो यजेत" इत्यादि वाक्यविहितानां कर्मणां अनुष्ठानं स्वरूपतः त्याग एव संन्यास इति केचित् वदन्ति। यतः काम्यकर्मानुष्ठानेन कामितं फलं जायते तत्फलमुपभुज्यते पुनस्तत्र रागः रागात्कर्मानुष्ठानं अनुष्ठानात् फलोत्पत्तिरित्येवं कर्मण्येव परिभ्रमतीति दोषः। अतः तद्दोषपरिहारार्थं दोषं विदित्वा कर्माधिकारी सन् निषिद्धकर्मवत् काम्यकर्मत्यागी संन्यासीत्युच्यते। अत एवोक्तं सूतसंहितायां भगवता वेदव्यासेन—

"काम्यकर्मफले दोषं विदित्वा प्रतिषिद्धवत्।
काम्यकर्म त्यजंस्तुल्यो भिक्षुणा फलतो भवेत्।"

इति अत्र सन्यासशब्दार्थः गौणः न तु मुख्यः। कामेन वा अकामेन वा विधिना कर्तव्यत्वेन प्राप्तानि वैदिकानि कर्माणि अनुष्ठाय ईश्वरार्पणबुद्ध्या तत्फलपरित्याग एव गृहिणः अधिकृतस्य संन्यासः न तु कर्मपरित्याग इति केचित् पण्डिता वदन्ति इति। तदेवोक्तं श्रीशङ्करभाष्ये भगवत्पूज्यपादैः काम्यकर्मणां अश्वमेधादीनां न्यासं परित्यागं संन्यासशब्दार्थं इति, अनुष्ठेयत्वेन प्राप्तस्य अननुष्ठानं, कवयः पण्डिताः केचिद्विदुः जानन्ति इति। नित्यनैमित्तिकानां अनुष्ठीयमानानां सर्वकर्मणां आत्म-

सम्बन्धितया प्राप्तस्य फलस्य परित्यागः सर्वकर्मफलत्यागः तं प्राहुः कथयन्ति त्यागं त्यागशब्दार्थं विचक्षणाः पण्डिताः इति ।

ननु नित्यानां फलं न श्रूयत इति चेत् मैवम् "धर्मेण पापमपनुदतीति" "सर्वे एते पुण्यलोका भवन्ति" इत्यादि श्रुतिभिः नित्यकर्मणां पापापनोदनं फलमित्युच्यते । किञ्च "अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्" इत्यादिना भगवतापि फलस्य वक्ष्यमाणत्वात् तत्फलपरित्यागः युक्त एवेति सर्वकर्मणां फलपरित्याग एव संन्यास इति वदन्ति । तत्सिद्धम् । काम्यानां फलकामनया चोदितानां अन्तःकरणशुद्धौ अनुपयुक्तानां कर्मणां इष्टिपशु-सोमादीनां त्यागः संन्यास इति एकेषां मतम् । सर्वेषां काम्यानां नित्यानां च प्रतिपदोक्तफलत्यागः त्यागशब्दार्थ इत्यपरं मतम् । यद्यपि सर्वस्यापि कर्मणः फलवत्त्वनियमात् प्रवृत्तिसिद्ध्यर्थं सर्वेषां कर्मणां फलस्य अवश्य-वक्तव्यत्वात् नित्यकाम्यभेदः पुरुषकृत एव न तु वस्तुतः । तथापि नित्यकाम्यभेदः, अवश्यमभ्युपेयः अन्यथा यः मुमुक्षुः वर्तते तस्य काम्य-कर्मवत् नित्यकर्मणामपि त्यागापत्तेः । किञ्च नित्यकर्मणां काम्यकर्मणां च फलस्य फलत्वेन रूपेण एकत्वेऽपि फलस्वरूपे भेदो वर्तते । नित्यकर्मणां जीवननिमित्तेन अवश्यानुष्ठेयत्वेन विहितत्वात् नित्यानां "धर्मेण पापमप-नुदतीति पापक्षयस्य फलत्वेन उक्तत्वात् पापक्षयद्वारेण आत्मज्ञानार्थत्वं बोध्यते । न तथा काम्यानां, न च काम्यानामपि संयोग-पृथक्त्व-न्यायेन विद्यार्थत्वेन वा विविदिषार्थत्वेन वा विनियोगात् नित्यकर्मवत् आत्मज्ञाना-र्थत्वं सम्भवतीति वाच्यम् । यद्यपि "तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन, दानेन तपसाऽनाशकेन" इति शतपथब्राह्मणवाक्येन वेदानुवचने-नेति ब्रह्मचारिधर्मस्य वेदाध्ययनस्य, यज्ञदानोपलक्षितस्य गृहस्थधर्मस्य, तपसाऽनाशकेनेत्युपलक्षितस्य वानप्रस्थधर्मस्य च, विद्यार्थत्वं विविदिषार्थत्वं वा बोध्यते । तथापि बहुषु ग्रन्थेषु नित्यकर्मणामेव विविदिषार्थत्वं न तु काम्यकर्मणामित्युक्तत्वात् यज्ञदानोपलक्षितस्य गृहस्थधर्मस्येत्यनेन नित्य-कर्मणामेव श्रौतानां स्मार्तानाञ्च तदर्थत्वमिति वक्तव्यम् । अत एव—

"त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ॥"

इत्यादिना मतभेदः प्रदर्शितः । तथा हि—

"सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः । "

इति न्यायेन सर्वस्यापि कर्मणः द्रव्यसाध्यत्वात् व्रीह्यवहननपश्वालंभादि-रूपहिंसायुक्तत्वात् न हिंस्यात्सर्वभूतानीति हिंसामात्रस्य निषिद्धत्वाच्च निषिद्धस्य अनर्थसाधनत्वाच्च तादृशस्य कर्मणः त्याग एव त्यागशब्दार्थः न तु काम्यानां स्वरूपतः त्यागः नापि सर्वस्यापि कर्मणः फलाभिसन्धित्यागः । अतः सर्वं श्रौतं स्मार्तं नित्यं नैमित्तिकं काम्यञ्च त्याज्यमेवेति सांख्या आहुः । मीमांसकास्तु —

"अकृत्वा वैदिकं कर्म प्रत्यवायी भवेन्नरः" यावज्जीवमग्निहोत्रं जुहोति "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत ।"

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतगँ समाः"।
"श्रौतं चापि तथा स्मार्तं कर्मालम्ब्य वसेद्विजः" ।
"तद्विहीनः पतत्येव ह्यालम्बरहितांधवत् ।"

इत्यादि श्रुतिस्मृतिभिः नित्यस्य कर्मणः अवश्यकर्तव्यत्वेन विहितत्वात् अन्यथा प्रत्यवायश्रवणाच्च यज्ञदानतप-आदिलक्षणं नित्यकर्म न त्याज्यं किन्तु अवश्यं कर्तव्यमेवेति ।

ननु द्रव्यसाध्यकर्मणि व्रीह्यादिषु अवहननादि-क्रियारूप-हिंसायाः क्रियमाणत्वात् श्रौतकर्मणि अग्निष्टोमादौ अग्नीषोमीयपशुहिंसायास्सत्त्वात् तत्तत्कर्मदोषवदिति चेत् उच्यते–यद्यपि अवहननेन व्रीह्यादिषु हिंसा जायते तथापि तद्दोषपरिहारः एकतादिदेवेभ्यः अन्तर्वेद्यां "अन्तर्वेदिनिनयत्यवरुध्यै" इति विधिना हविष्पात्रोदकनिनयनेन भविष्यतीति" "देवा वै हविर्भृत्वा-ब्रुवन्" इत्युपाख्याने तै.ब्रा.3-2-10 प्रतिपादितम् ।

किञ्च "न हिंस्यात्सर्वभूतानी"ति निषेधस्य सामान्यशास्त्रत्वात् "अग्नीषोमीयं पशुमालभेत" इति विशेषशास्त्रत्वात् सामान्यशास्त्रस्य तरु-गुल्मच्छेदादौ सावकाशत्वात् सावकाशनिरवकाशयोः, निरवकाशस्य सामान्य-विशेषशास्त्रयोः विशेषशास्त्रस्य च, प्राबल्यमिति न्यायेन अग्नीषोमीयपशु-हिंसायाः विध्युक्तायाः हिंसात्वं नास्तीति निर्दुष्टत्वं पावकत्वञ्च अवगम्यते अत एवोक्तं शङ्करानन्दीये —

"धर्मेण पापमपनुदती"ति तपसा किल्बिषं हन्ति" "ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा" इत्यादिना ब्राह्मणादीनां यज्ञदानादिलक्षणं नित्यं वैदिकं कर्म अवश्यं कर्तव्यमेव न तु त्याज्यम् । न तु काम्यं समाचरेत्, न कलञ्जं भक्षयेत् इत्यादि वचनात् काम्यं निषिद्धं च एतद्द्वयमेव त्याज्यम् इति, न तु सर्वकर्मत्यागः, सर्वकर्मफलत्यागः, त्याग इति वैदिकशिरोमणयः मीमांसकाः प्राहुरिति मीमांसकमते काम्यकर्म त्याज्यमिति नित्यं श्रौतं स्मार्तं च कर्म अवश्यमनुष्ठेयमित्युक्तम् ।

एतावता ग्रन्थेन गृहिणः काम्यकर्मत्याग एव संन्यास इति सर्वकर्म-फलत्याग एव संन्यास इति दोषवत् कर्मत्याग एव संन्यास इति काम्य-निषिद्धकर्मत्याग एव संन्यास इति तत्तन्मतानुसारेण त्यागशब्दार्थ उपपादितः । अस्मिन्प्रसङ्गे यज्ञशब्देन नित्यं श्रौतं स्मार्तञ्च कर्म विवक्षित मित्युक्तम् । किञ्च—

"निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधस्संप्रकीर्तितः ।।

हे पुरुषव्याघ्र भरतसत्तम त्यागः सात्त्विक-राजस-तामसभेदेन त्रिप्रकारः परिकीर्तितः शास्त्रे । अतः त्यागस्य तत्त्वं दुर्विज्ञेयं, त्वया चोक्तं तत्त्वं वेदितु-मिच्छामीति । यतः त्वया पृष्टं अतः सर्वज्ञेन मया चोक्तं तत्त्वं विद्धि जानीहि। इति विप्रतिपत्तिरूपयोः त्याग-अत्यागपक्षयोः द्वयोर्मध्ये द्वितीयपक्ष एव मम निश्चय इति भगवता,

"यज्ञ-दान-तपः-कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ इत्युक्तम् ।

अत्र भाष्यम् :— यज्ञो दानं तप इत्येतत् त्रिविधं कर्म न त्याज्यं न त्यक्तव्यम्, कार्यं=करणीयमेव तत् कस्मात् यज्ञदानतपांसि फलाभिसन्धि-रहितानां शुद्धिकारणानीति । अनेन फलानभिसन्धिना नित्यकर्माणि कर्तव्यानीत्युच्यते ।

ननु फलानभिसन्धिना यज्ञादित्रिविधं कर्म कर्तव्यमित्येव भाष्य-कारैः विवृतम् । कथं नित्यकर्माणि कर्तव्यानीत्युच्यते इति चेत् शङ्करा-नन्दीयं, नीलकण्ठव्याख्यानादिकं च पश्यन्तु । शङ्करानन्दीये— "एवं यज्ञ-दानतपोलक्षणं त्रिविधं नित्यं वैदिकं कर्म मुमुक्षोः गृहिणः न त्याज्यं न कदाचित् त्यक्तव्यम् । किन्तु पुरुषार्थत्वात्, नित्यत्वात् अकरणे प्रत्य-वायाच्च यज्ञः अध्ययनं दानमिति "अहरहस्संध्यामुपासीत" "उदिते सूर्ये प्रातर्जुहोति" इति श्रुत्युक्तं नित्यकर्म, मुमुक्षोः गृहिणः कार्यमिति । यज्ञादिकं कर्म न त्याज्यं किन्तु कार्यमेव विष्टिगृहीतेनेव पुंसा अवश्यानुष्ठेय-मेव तत्, अकरणे प्रत्यवायश्रवणात् । चकारः हेत्वर्थकः । यस्मात् यज्ञः दानं तपश्चैव पावनानि मनीषिणां - निष्कामानां दंभादिरहितानां पावनानि-चित्तशोधकानि । तथा च श्रुतिः, "त्रयो धर्मस्कंधाः यज्ञः, अध्ययनं, दानमिति प्रथमः, तप एव द्वितीयः, ब्रह्मचारी आचार्यकुलवासी तृतीयः, "सर्वे एते पुण्यलोका भवन्ति" इति, यज्ञादीनां गृहस्थधर्माणां, तपसः वानप्रस्थधर्मस्य, आचार्यकुलवासस्य ब्रह्मचारिधर्मस्य च पावनत्वं दर्शयति । अत्र यज्ञदानशब्देन गृहस्थधर्माः ज्ञेयाः तप इति वानप्रस्थधर्माः परिशेषात् कर्मेति ब्रह्मचारिधर्माश्च ज्ञेयाः । एवम् त्यागपक्षमुक्त्वा औत्सुक्यात् प्रथमं स्वाभिमतत्यागात्यागसमुच्चयपक्षं दर्शयतीति नीलकण्ठीये—

"निश्चयं शृणु मे तत्रे"ति भगवता वक्तुमुपक्रान्तः कोऽसौ निश्चयः ? विप्रतिपत्तिभूतयोः पक्षयोः द्वितीयः पक्ष इत्याह । द्वाभ्यां -च -हेतौ यस्मात् यज्ञदानतपांसि मनीषिणां अकृतफलाभिसंधीनां पावकानि-

ज्ञानप्रतिबन्धकपापमलक्षालनेन ज्ञानोत्पत्तियोग्यतारूपगुणाधानेन च शोधकानि-अकृतफलाभिसंधीनामेव यज्ञदानतपांस्येव शोधकानि भवन्त्येव। उपाधिकृतशुद्धयैव उपहितशुद्धिरभिप्रेता। तस्मादन्तःकरणशुद्ध्यर्थिभिः कर्माधिकृतैः यज्ञो दानं तप इति यत् फलाभिसंधिरहितं कर्म तन्न त्याज्यं कार्यमेव तत्, अत्याज्यत्वेन कार्यत्वे लब्धेऽपि अत्यादरार्थं पुनः कार्यमेवेत्युक्तम्। तस्मात् कार्यं कर्तव्यतया विहितं तस्मान्न त्याज्यमेवेति। एवं कर्मणः त्याग-अत्यागपक्षयोः अत्यागपक्ष एव स्वाभिमत इत्युक्तं भवति। अनेन फलानभिसंधिना नित्यकर्माणि कर्तव्यानीत्युच्यते। भवतु नाम एतदनन्तरम्।

"एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥"

इत्यत्र अपिशब्दबलात् काम्यान्यपि फलानभिसंधिना कर्तव्यानीत्युच्यते खलु इति चेन्न। एतच्छब्दस्य सन्निकृष्टपरामर्शात्, तुशब्दस्य पक्षान्तरव्यावृत्त्यर्थत्वाच्च किञ्च इतःपूर्वं काम्यकर्मत्यागः संन्यास इति सर्वकर्मफलत्यागः संन्यास इति मतद्वयमुक्त्वा स्वीयं मतं वक्ष्यामीति।

"निश्चयं शृणु मे तत्रेति प्रतिज्ञा च, पुनः तदेवोक्तौ, स्वीयनिश्चयप्रदर्शनाभावदोषप्रसङ्गात् अतः एतच्छब्देन नित्यान्येव कर्माण्युच्यन्ते।

ननु तथा चेत्- यज्ञदानतपःकर्मेति श्लोकेनैव अयमर्थः उक्तः पुनः किमर्थमिति चेत् उच्यते- तानि नित्यानि कर्माणि कर्तव्यानीति तत्रोक्तम्। अत्र तु तान्येव नित्यान्यपि अनिष्टमिष्टं मिश्रं चेति फलवन्तीत्यपि वक्ष्यमाणत्वात् तानि फलानि परित्यज्य नित्यानि कर्माणि कर्तव्यानीति प्रकारविशेष उक्तः। अनेन तु काम्यकर्मत्याग एव त्यागः न तु सर्वकर्मफलत्यागः त्यागः। किन्तु मुमुक्षुणा गृहस्थेन अवश्यं नित्यकर्माणि कर्तव्यानि। तत्र संगस्य फलस्य च त्यागः कर्तव्यः अयमेव त्यागशब्दार्थः। अयमेव गीताचार्याणामाशय इति श्रीभगवद्भिः पूज्यपादैरप्युक्तम्। तथा हि भाष्ये एतान्यपि तु कर्माणि कर्तव्यानीत्येतन्निश्चितं मतमुत्तममिति प्रतिज्ञातार्थोपसंहार

एव नापूर्वार्थवचनम् । एतान्यपीति प्रकृतसन्निकृष्टतार्थतोपपत्तेः सासंगस्य फलार्थिनः बन्धहेतवः एतान्यपि कर्माणि । मुमुक्षोः कर्तव्यानीत्यपिशब्दस्य अर्थः नत्वन्यानि कर्माण्यपेक्ष्य एतान्यपीत्युच्यते । अनेन ग्रन्थेन एतच्छब्देन नित्यकर्मणामेव परामर्श इति सुस्पष्टं ज्ञायते ।

काम्यकर्मणामपि अपिशब्देन परामर्शः कर्तव्य इत्यन्येषां चाशंका, तां शंकामप्यनूद्य निरासोऽपि कृतः । तथा हि—

"अन्ये वर्णयन्ति नित्यानां कर्मणां फलाभावात् संगं त्यक्त्वा फलानि चेति नोपपद्यत ।"एतान्यपीति" यानि काम्यानि कर्माणि नित्येभ्यः अन्यानि एतान्यपि कर्तव्यानि । किमुत यज्ञदानतपांसीति नित्यानि? इति । तदसत्, कैमुत्यन्यायेन काम्यान्यपि कर्तव्यानीति चः अर्थः उच्यते स अनुचितः । कुतः? नित्यानामपि कर्मणां फलवत्त्वस्य उपपादितत्वात् "यज्ञो दानं तपश्चैव पावनानी"त्यादिवचनेन नित्यान्यपि कर्माणि बन्धहेतुत्वमाशंक्य । जिहासोर्मुमुक्षोः कुतः काम्येषु प्रसङ्गः "दूरेण ह्यवरं कर्म"इति च निन्दितत्वात्, "यज्ञार्थात्कर्मणोऽन्यत्र"इति काम्यकर्मणां बन्धहेतुत्वस्य च निश्चितत्वात् "त्रैगुण्यविषया वेदा" "त्रैविद्या मां सोमपाः" "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इति च दूरव्यवहितत्वाच्च, न काम्येषु एतान्येवेति व्यपदेशः । अनेन भाष्येण मुमुक्षुणा गृहिणा नित्यान्येव फलानभिसंधिना कर्तव्यान्येवेति गीताचार्याणां निश्चयः ।

नीलकण्ठव्याख्यानेऽपि एवं विवृतम् — "एतान्येव कर्माणि संगं त्यक्त्वा अहमेव तेषां कर्ता एतैः कृतैरहं स्वर्गं वा चित्तशुद्धिं वा ज्ञानं वा प्राप्स्यामीति फलानि च त्यक्त्वा चकारादेषामकरणे प्रत्यवायो भविष्यतीत्येतमपि अभिसंधिं त्यक्त्वा ब्रह्मनिष्ठेन असंगत्वभावेन पुरुषेण कर्तव्यानीति एवं प्रकारं मे=मम मतम्=पूर्वमतात् श्रेष्ठम् । इति अनेन व्याख्यानेन एवं प्रतीयते एतच्छब्देन नित्यकर्माण्येव परामृष्टानीति ।

मधुसूदनसरस्वतीव्याख्यायामेवमुक्तम् — "यदि यज्ञदानतपसां अन्तःकरणशोधनासामर्थ्यमस्ति तर्हि फलाभिसंधिना कृतान्यपि तानि

तच्छोधकानि भविष्यन्ति। कृतं फलाभिसंधित्यागेनेत्याशंक्य यद्यपि काम्यान्यपि शुद्धिमादधति धर्मस्वाभाव्यात् तथापि साशुद्धिः तत्फलोपभोगिन्येव, न तु ज्ञानोपयोगिनी। तदुक्तं वार्तिककृद्भिः काम्येऽपि सिद्धिरस्त्येव भोगसिद्धचर्थमेव सा विष्वराहादिभेदेन ह्यैन्द्रीं भुज्यते फलमिति ज्ञानोपयोगिनीं तु शुद्धिमादधति। यानि यज्ञदानतपांसीत्यादीनि कर्माणि एतानि फलाभिसंधिपूर्वकत्वेन बंधनहेतुभूतान्यपि। मुमुक्षुभिः अहमेवं करोमीति कर्तृत्वाभिनिवेशं फलानि च त्यक्त्वा अन्तःकरणशुद्धये कर्तव्यानीति। निश्चितं मम मतं श्रेष्ठम्। अनेन काम्यकर्मानुष्ठानजन्या या अन्तःकरणशुद्धिः सा भोगोपयोगिनी नित्यकर्मानुष्ठानजन्या अन्तःकरणशुद्धिः, सा ज्ञानोपयोगिनीति स्पष्टं प्रतीयते। अत एवोक्तम् — "हे पार्थ-कर्माधिकृतैः कर्माणि त्याज्यानि न त्याज्यानीति द्वयोर्मतयोः न त्याज्यानीति मम मतं श्रेष्ठम्। अयमाशयः काम्यकर्माणि स्वरूपतः त्याज्यानि। नित्यकर्माणि स्वरूपतः न त्याज्यानि किन्तु तेषां फलाभिसंधिमात्रं त्याज्यमिति। यदुक्तं "शृणु मे तत्रे"ति सोऽयं निश्चयः उपसंहृतः।

"भगवत्पूज्यपादानाम् अभिप्रायोऽयमीरितः।
अनिष्णाततया भाष्ये दुरापो मन्दबुद्धिभिः॥"

तदेवं "एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च" इति द्वाभ्यां नित्यकर्म-अत्यागः फलस्य च त्याग इति त्यागात्यागसमुच्चयपक्षः स्वमतमित्युक्तम्।

न च नित्यानां फलमेव नास्ति कुतः फलत्याग इति वाच्यम्। अस्मादेव भगवत्पादवचनात् फलमस्तीति गम्यते, निष्फलस्य अनुष्ठानासंभवात्। तथा च आपस्तम्बः तद्यथा आम्र फलार्थे निमित्ते छायागंधौ अनूत्पाद्येते। एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते इत्यानुषंगिकं फलं नित्यानां दर्शयति। अकरणे प्रत्यवाय इति स्मृतिः करणे नित्यानां प्रत्यवायपरिहारः फलमिति, धर्मेण पापमपनुदतीत्यादि श्रुतयश्च ज्ञानप्रतिबंधक-पापक्षयलक्षणं च आत्मसंस्कारं नित्यानां कर्मणां फलं दर्शयति। फलाभिसंधिं त्यक्त्वा तानि अनुष्ठेयानीत्यर्थः।

अनेन ग्रन्थेन गीताचार्याणां तद्भाष्यतद्व्याख्यातृणां च काम्यकर्मणः स्वरूपतः त्याग इति, नित्यकर्मणः फलमात्रस्य त्यागः, न नित्यकर्मत्याग इति नित्यकर्मैव यज्ञशब्दस्य अर्थ इति नित्यकर्मणां ज्ञानप्रतिबंधकपापक्षयलक्षणं ज्ञानयोग्यतापादक-आत्मसंस्कारफलं च भवतीत्यभिमतमिति स्पष्टम् । अतः तमेतमिति वाक्ये नित्यकर्मणामपि ज्ञानोत्पत्तिप्रतिबंधकपापक्षयरूप-फलस्य कल्प्यत्वात् तत्कल्पनाविशेषात् काम्यकर्मण्यपि यज्ञशब्देन गृहीत्वा उभयविधकर्मणः संयोगपृथक्त्वन्यायेन विविदिषार्थत्वमित्युक्तिरनुपपन्नेति अत्र सुधीभिः पण्डितप्रकाण्डैः सूक्ष्मेक्षिकया सुविमर्शः कर्तव्यः । किञ्च विविदिषार्थत्वपक्षे वेदान्तश्रवणादिषु रुचिमुत्पाद्य यज्ञादिजन्य-अदृष्टं नश्यति । श्रवणादीनां प्रतिबंधकदुरिताभावे श्रवणादि द्वारा विद्योत्पत्ति-र्भवतीति वक्तुं "यथेति" संस्कारकर्मणां विनियोगपक्षं दृष्टान्तयति । सि. ले. सं.

तथा हि—"यस्यैत"इत्यादिना अभिहितचत्वारिंशत्संख्याकसंस्कार-कर्मणां आत्मज्ञानयोग्यतापादक-मलापकर्षण-गुणाधानलक्षण-संस्कारार्थत्व-पक्षे संस्कारकर्मभिस्संस्कृतस्य शमादिसंपत्तौ सत्यां परब्रह्मावाप्तिर्भवति । तदसंपत्तौ पुण्यलोकावाप्तिरिति संस्कारकत्वपक्षे ज्ञानोत्पादकत्वनियमो नास्ति संस्कारकर्मणां संस्कारजननमात्रेण चरितार्थत्वात् विद्योत्पत्तिपर्यन्त-व्यापारो नास्तीतिवत् इत्युक्तम् ।

अनेन कर्मणां विविदिषार्थत्वपक्षसंस्कारार्थत्वपक्षयोरुभयोरपि ज्ञानो-त्पत्त्यनियमे समानेऽपि विविदिषार्थत्वे प्रायिकी ज्ञानोत्पत्तिः तीव्रबुभुक्षाया इव दृढविविदिषायाः सर्वप्रयत्नेन विद्यासंपादनसमर्थत्वात् संस्कारार्थत्वपक्षे तु विविदिषाया अप्यनियतत्वेन विद्योत्पत्तिः प्राथमिक्यपि न संभवतीति भेदो वर्तत इति सिद्धान्तलेशसंग्रहस्य कृष्णालंकाराभिधव्याख्याने 308 पुटे तथा नित्यानां काम्यानामपि "तमेतमिति" विनियोगवाक्यबलात् विविदिषार्थत्वे समानेऽपि नित्यानां दुरितक्षयार्थत्वेन वाक्यान्तरेणैव सिद्धत्वात् फलानभि-संधिकृतानां नित्यानामेव ज्ञानार्थत्वमिति बहुभिः ग्रन्थकर्तृभिरुक्तत्वाच्च तेषामनुष्ठानं यदि तीव्रतरं तदा ज्ञानप्रतिबंधक-दुरितक्षयार्थत्वं सिद्धम् ।

काम्यानां तु कामितफलार्थत्वेन तत्तत्प्रातिस्विकवाक्यैः विनियुक्तानां ज्ञानप्रतिबंधकदुरितक्षयार्थत्वं कल्प्यमेव स्यात्। अत एवोक्तं सूतसंहितायां य॰ वै॰ खण्डे 3 अध्याये—

"अथातस्संप्रवक्ष्यामि कर्मयज्ञस्य वैभवम्।
कर्मयज्ञस्त्रिधा प्रोक्तः मुनिभिस्सूक्ष्मदर्शिभिः॥

एकः काम्योऽपरो नित्यस्तथा नैमित्तिकोऽपरः।
प्राधान्येन फलं शुद्धिरार्थिकी काम्यकर्मणः॥

प्राधान्येनात्मनश्शुद्धिर्नित्यस्य फलमार्थिकम्।
केवलं प्रत्यवायस्य निवृत्तिरितरस्य तु॥"

एतद्व्याख्यायां माधवाचार्यकृत-तात्पर्यदीपिकायां काम्यकर्मणां फलप्राप्तिः प्रधानम्, अर्थात्=अप्रधानतया चित्तशुद्धिरपि भवति। यथाहुः वार्तिककाराः—

"विड्वराहादिभेदेषु न ह्यैन्द्रीं भुज्यते पदम्।"

इति नित्यस्य तु सत्त्वशुद्धिरेव प्राधान्येन फलम्। नैमित्तिकस्य प्रायश्चित्तादेरुपात्तदुरितक्षयः फलमित्यर्थः। परंपरयाऽपि अपवर्गानुपयोगिषु, प्रत्युत तत्प्रतिबन्धकेषु काम्ययागेषु ये यतन्ते ते मन्दभाग्या इत्यपि तदेवोक्तम्। (सू॰ सं)—

"काम्यरूपेषु यज्ञेषु यतन्ते श्रद्धया सह।
मन्दभाग्या नरा विप्राः नित्यनैमित्तिकात्मिके॥
महाभाग्याः प्रवर्तन्ते तेषां मुक्तिरयत्नतः।

अनेन ये तु नित्यनैमित्तिकेषु अपवर्गयोगित्वमभिसन्धाय प्रवर्तन्ते ते क्रमेण मुच्यन्त इत्यर्थः। किञ्च श्रीमद्भागवतेऽपि भगवान् श्रीकृष्णः उद्धवं प्रति उपदेष्टुं "सत्त्वरजस्तम इति गुणा बुद्धेर्न चात्मनः" इति उपक्रम्य एवमवदत्।

आगमोऽपः प्रजा देशः कालः कर्म च जन्म च।
ध्यानं मन्त्रोऽथ संस्कारो दशैते गुणहेतवः॥ (स्कं 11-13)

अस्य व्याख्या सात्त्विकान्येव निवृत्तिशास्त्राण्येव सेवेत, न प्रवृत्ति-पाषंड-शास्त्राणि,तीर्थाऽऽप एव, न गन्धोदकसुराद्याः, प्रजाः निवृत्तान्जनान्, न प्रवृत्त-दुराचारान्, विविक्तदेशान् न रथ्याद्यूतदेशान्, कालः=ब्राह्ममुहूर्तादिकं, ध्यानादौ न प्रदोषनिशीधादीन्, कर्म च नित्यम्, न काम्य-अभिचारादीनि, जन्म च वैष्णव-शैव-दीक्षादिलक्षणम्, न शाक्त-क्षुद्र-दीक्षारूपम्। ध्यानं श्रीविष्णोः, न कामिनी-विद्विषां मन्त्रं प्रणवादिकं न काम्यक्षुद्रादीन् संस्कारः आत्मनस्संशोधनं, न तु केवलदेहगृहादीनामित्यादि। अत्र कर्मपदेन नित्य-कर्मैव अनुष्ठेयतया विवक्षितम् इति स्पष्टम्।

किञ्च नैष्कर्म्यसिद्धौ १-अध्याये कर्मणां कथञ्चिदपि मोक्षोपकारकत्वं नास्तीत्याशङ्क्य कर्माणि आरादुपकारकत्वेन यथा मोक्षहेतुतां प्रतिपद्यन्ते तथा अभिधीयते।

"तस्यैवं दुःखतप्तस्य कथञ्चित्पुण्यशीलनात्।
नित्येहाक्षालितधियः वैराग्यं जायते हृदि॥"

चन्द्रिकाव्याख्यायां "तस्यैव"मिति पुण्यशीलस्य दुर्लभतां दर्शयति कथञ्चि-दिति। काम्ये पुण्येऽपि आनुषङ्गिकी शुद्धिरस्ति। अतः नित्यानुष्ठानबुद्धि-रुत्पद्यते। नित्येहया नित्यकर्मानुष्ठानेन विशुद्धबुद्धिः जायते, ततः काम्य-कर्मफलेषु वैराग्यं जायत इत्यर्थः। अयमाशयः-संसारे दुःखतप्तस्य काम्य-कर्माणि बन्धकारणान्येव भवन्ति। कुत इति चेत्तानि पुण्यकर्माण्यपि तैरानु षङ्गिकी चित्तशुद्धिरेव भवति। नित्यकर्मानुष्ठानेन तु काम्यकर्मफलेषु वैराग्यं जायते। कीदृग्वैराग्यम्, उच्यते—

नरकादभीर्यथास्याभूत्तथा काम्यफलादपि।
यथार्थदर्शनात्तस्मान्नित्यं कर्म चिकीर्षति॥

नित्यकर्मानुष्ठानस्य अन्तःकरणपरिशुद्धिकारणत्वात् नरककारणप्रतिषिद्ध-कर्मसु, तथा काम्यकर्मफलस्य अनित्यत्व-सातिशायित्व-दुःखबहुलत्वादि दोष-दर्शनात् काम्यकर्मस्वपि भयं जायते, तेन भयेन तेभ्यः काम्यकर्मभ्यः निषिद्ध-

कर्मभ्य इव व्यावृतस्सन् पुनस्तदेव नित्यं कर्म अनुष्ठातुमिच्छतीत्यर्थः भवतु। एवं काम्यकर्मपरित्यागेन नित्यनैमित्तिककर्मणामेव अनुष्ठानं तथापि केन द्वारेण तेषां मोक्षहेतुत्वमित्यत आह।

एवं नित्यनैमित्तिककर्मानुष्ठानेन—

"शुध्यमानन्तु तच्चित्तमीश्वरार्पितकर्मभिः।
वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ सुनिर्मलम्॥

ईश्वरार्पितनित्यनैमित्तिककर्मानुष्ठानेन चित्तं परिशुद्धं सन्मुक्तिप्रतिबन्धकेषु फलेषु वैराग्यमुत्पाद्य ब्रह्मलोकप्राप्तौ आभिमुख्यं व्यनक्ति। तस्मान्नित्य-नैमित्तिककर्मानुष्ठानपरिमार्जनेन अपविद्धरजस्तमोऽमलं प्रसन्नमनाकुलं सम्मार्जितस्फटिकशिलाकल्पं बाह्यविषयेषु अनाकृष्यमाण विधूताऽशेषकल्म-षं प्रत्यङ्मात्रप्रवण चित्तदर्पणमवतिष्ठेत। कर्माणि चित्तस्य प्रत्यक्प्रवणतां संपाद्य चरितार्थानीत्युक्तम्।

"प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव॥

यतः नित्यकर्मानुष्ठानस्य एष महिमा।

"तस्मान्मुमुक्षुभिः कार्यम् आत्मज्ञानाभिलाषिभिः।
नित्यं नैमित्तिकं कर्म सदैवात्मविशुद्धये॥

अतः नैष्कर्म्यसिद्धिग्रन्थकर्तृणां सुरेश्वराचार्याणां मते नित्यनैमित्तिक-कर्मैव आत्मज्ञानस्य कारणमित्युक्तं भवति। "नित्यनैमित्तिकैरेवेति नित्य-नैमित्तिककर्मणामेव पापक्षयहेतुत्वोक्त्या काम्यकर्मणां पापक्षयहेतुत्वाभावात् नाऽकरणे प्रत्यवायः। कामनासत्त्वे कर्तव्यानि, मुमुक्षुणा तु न कर्तव्यानीति श्रीशङ्करानन्दीये त्यागशब्दार्थप्रसङ्गे काम्यं निषिद्धं च त्याज्यम्। न तु सर्वकर्म, न तु सर्वकर्मफलत्याग इति स्पष्टतया उक्तत्वात् सिद्धं वेदान्तिना-मपि मते काम्यकर्मानुष्ठाने आवश्यकता नास्तीति। मनुस्मृतौ—

"कामात्मता न प्रशस्ता न चैवेहास्त्यकामता ।
काम्ये हि देहाधिगमः कर्मयोगश्च वैदिकः ।।

अत्र कुल्लूकभट्टः स्वर्गादिफलाभिलाषे काम्यानि कर्माणि अनुष्ठीयमानानि पुनर्जन्मनः कारणानि भवन्ति । नित्यनैमित्तिकानि तु आत्मज्ञानसहकारितया मोक्षाय कल्पन्तेति । पराशरस्मृतौ—

"मानुषाणां हितं धर्मं वर्तमाने कलौ युगे ।
शौचाचारं यथावच्च वद सत्यवतीसुत ।। इति ।

अत्र माधवाचार्यकृतव्याख्यायां हितशब्दविवरणप्रसङ्गे "अभिमतफलसाधनत्वं हि धर्मस्य हितत्वम् । तच्च फलन्तु द्वेधा—ऐहिकम्-आमुष्मिकं च । आमुष्मिकं द्वेधा-अभ्युदयं निःश्रेयसञ्च । तत्र अभ्युदयसाधनत्वं साक्षात्, निःश्रेयस्साधनत्वं तु तत्त्वज्ञानोत्पादनद्वारेण । तथा च—

"धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते ।"

एवं व्याख्यानपरंपरया तत्प्रसङ्गे एवं उदाजहार—

वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमाङ्गतिम् ।। इति

कूर्मपुराणेऽपि —

"यथाशक्ति चरेत् कर्म निन्दितानि विवर्जयेत् ।
विधूय मोहात्कलितं लब्ध्वा योगमनुत्तमम् ।।
गृहस्थो मुच्येत बन्धान्नात्र कार्या विचारणा ।" इति ।।

ननु अस्त्येवम् अभ्युदयहेतुत्वं, निःश्रेयसहेतुत्वं तु न संभवति प्रमाणाभावात् । प्रत्युत श्रुतिस्मृतिभ्यां तन्निषिध्यते, तथा हि—

"न कर्मणा न प्रजया धनेने"ति श्रुतिः, "ज्ञानादेव तु कैवल्य"मिति स्मृतिः ।

इति चेन्मैवम् । परमात्मप्रकरणे निःश्रेयसहेतुवेदने च साधनत्वेन यज्ञादीनां विधानात् तमेतमिति श्रुतेः विद्यार्थत्वं साक्षात्, निःश्रेयसः साधनत्वं परंपरया गोचरयिष्यति । तस्मान्न ज्ञानिनां अग्न्यादिकर्मापेक्षा अस्ति, वेदनोत्पत्तौ तु सा विद्यते । एतच्चोभयम् "अत एव चाग्नीन्धनाद्यनपेक्षा" "सर्वापेक्षा च यज्ञादिश्रुतेः" इत्याभ्यां अधिकरणाभ्यां निर्णीतं, तथा च कर्मणां परंपरया मोक्षहेतुत्वं वायुसंहितायामभिहितम्—

"कर्मातिशयमासाद्य पशोः पाशपरिक्षयः ।
एवं प्रक्षीणपापस्य बहुभिर्जन्मभिः क्रमात् ।
भवेद्विषयवैराग्यं वैराग्याद् भावशोधनम् ।।
भावशुद्धचुपपन्नस्य शिवध्यानसमन्वयः ।
ज्ञानध्याननियुक्तस्य पुंसो योगः प्रवर्तते ।।
योगेन तु परा भक्तिः प्रसादस्तदनन्तरम् ।
प्रसादान्मुच्यते जन्तुः मुक्तः शिवसमो भवेत् ।।" इति ।

ननु प्रत्यवायपरिहाराय, पुण्यलोकप्राप्तये, ब्रह्मवेदनाय च प्रतिदिनं नित्यकर्मणः त्रिः प्रयोगः प्राप्त इति चेत् न, खादिरवत् विनियोगद्वययुक्तस्यैव वचनसंयोगभेदेन संयोग-पृथक्त्व-न्यायेन फलभेदोपपत्तेः । एवमत्रापि पूर्वोदाहृतवचनत्रयबलात् प्रयोजनत्रैविध्येऽपि सकृदेव प्रयोगः, तच्च "विहितत्वाच्चाश्रमकर्मापि" इत्यधिकरणे निर्णीतम् इत्युक्त्वा अग्रे नित्यवत्काम्यस्यापि विहितत्वेन शुद्धिहेतुत्वात् मोक्षसाधनत्वमिति चेन्न । समप्राधान्यात् । शुद्धिस्तु उपसर्जनत्वेन रागविषयभोगं सम्पाद्य उपक्षीयते । तदुक्तं वार्तिककारेण —

"नित्येषु शुद्धेः प्राधान्यात् भोगोऽप्यप्रतिबन्धकः ।
भोगं भङ्गुरमीक्षन्ते बुद्धिशुद्ध्यनुरोधतः ।।

इति नित्यं च कर्म द्विविधं-संस्कारकं, विविदिषाजनकं च । विहितत्वमिति बुद्ध्या क्रियमाणं संस्कारकं, तथा च स्मर्यते — "यस्यैते चत्वारिंश-

स्संस्कारास्स ब्रह्मणस्सायुज्यँ सालोक्यं गच्छति" इति ईश्वरार्पणबुद्धया क्रियमाणं विविदिषामुत्पाद्य अवश्यं वेदनं संपादयति। तस्मान्मुमुक्षोः ईश्वरार्पणबुद्धया क्रियमाणं नित्यं कर्म प्रशस्तं तदेव मानुषाणां हितं धर्ममिति स्मृत्युक्त-हित-धर्मशब्दाभ्यामभिहितम्। अनेन धर्मशास्त्रकाराणामपि मते नित्यकर्मणामेव संयोग-पृथक्त्व-न्यायं योजयित्वा संस्कारार्थत्वं विविदिषार्थत्वं च वक्तुं युक्तम् इति काम्यकर्मानुष्ठाने आवश्यकता नास्तीति सिद्धम्।

०-०

पञ्चमोऽध्यायः

अनधिकारिकृत-काम्यकर्मानुष्ठानं वैगुण्यापादकम्

पूर्वस्मिन् प्रकरणे काम्यकर्मानुष्ठानस्य आवश्यकता नास्तीति सप्रमाणमुपपादितम्। इदानीं काम्यकर्मानुष्ठाने प्रत्यवायोऽस्ति न वा इत्यादिकं विचार्यते। ननु "ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः" "चित्रया यजेत पशुकामः" "वायव्यं श्वेतमालभेत भूतिकामः" "उक्थ्येन पशुकामो यजेत" "अतिरात्रेण प्रजाकामं याजयेत्" "वाजपेयेन स्वाराज्यकामो यजेत" इत्यादि विधिवाक्यैस्तत्तत्फलसाधनत्वेन काम्येष्टि, पशु, सोमयागाः विहिताः। अतः तत्तद्विधिवाक्येषु प्रवर्तनाबोधक-लिङ्-प्रत्ययस्यैव श्रूयमाणत्वात् काम्यकर्मणां नञ्घटितवाक्यैरनिषिद्धत्वात् कैश्चित् काम्यकर्मसु श्रूयमाणनिन्दायाः फलाभिसन्धावेवेति तदनुष्ठाने प्रत्यवायो नास्ति, अतः तान्यनुष्ठेयान्येव इति चेत्, उच्यते — यद्यपि काम्यकर्मणाम् अनिषिद्धत्वात् तदनुष्ठाने प्रत्यवायो नास्ति, तथापि बहुभिः काम्यकर्मणां ज्ञानप्रतिबन्धकत्वमेव उक्तम्। नित्यकर्मवत् अकरणे प्रत्यवायो नास्ति। किन्तु कामनायां सत्यां साङ्गं प्रधानमनुष्ठातुं शक्तश्चेत् अनुष्ठेयानीति, नित्य-काम्यकर्मणामनुष्ठानविषये बहुवन्तरं वर्तत इति यतः शास्त्रे निरूपितम्। अतः तन्निरूपितमार्गेण मुख्याधिकारिणा मुख्यद्रव्येण च तान्यनुष्ठेयानि। अन्यथा शास्त्रविध्युल्लङ्घनेन अयथाशास्त्रमनुष्ठितं स्यात्। तेन काम्यसिद्धिर्न भवति। किन्तु प्रत्यवायोऽपि भविष्यति।

अत एवोक्तं भगवद्गीतायां —

"यश्शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥"

इति । तस्य शङ्करानन्दीयव्याख्या—"यः श्रुताध्ययनसम्पन्नो ब्राह्मणादिरधिकारी" "अग्नीषोमीयं पशुमालभेत" "न कलञ्जं भक्षयेत्" इत्येवं कर्तव्याकर्तव्यार्थप्रकाशकं शास्त्रविधिं = चोदनाविधिं, निषेधं च, उत्सृज्य अविचार्य शास्त्रविधिमुपेक्ष्येत्यर्थः । कामकारतः कामनया यथेच्छं करोति शास्त्रनियममुल्लङ्घ्य स्वेच्छानुरूपं श्रद्धाविधुरं धर्मानुष्ठानं यः करोति स कामायत्तप्रवृत्तिः पुरुषः सिद्धिं यथाविधिना अकृतत्वात्तैः कर्मभिः चित्तशुद्धिं नाप्नोति । विधुक्तस्यैव कर्मणः फलावश्यंभावित्वनियमात् तत एव स्वर्गीयं च सुखं नाप्नोति । कर्मणां मुक्तिसाधनत्वाभावात् परां गतिं मोक्षं चापि नाप्नोति । यथेच्छमविधिना कर्म कुर्वाणः स्वर्गापवर्ग-उभयभ्रष्टो भवतीत्यर्थ इति ।

किञ्च यद्ययथाशास्त्रमनुष्ठितं स्यात् तेन धर्मपरिवर्तनं भविष्यति । तेन विपरीतफलमपि भविष्यति ।

परिवर्तनादिशब्दार्थविचारः

विपर्यासः, ऊहः, उपसंहारः, परिवर्तनं, सङ्कोचः, अधर्मं, अकार्यम् इत्यादयः परस्परमर्थभेदकाः भिन्नार्थकाः । तथा हि—

अन्यस्य स्थाने अन्यस्येति परस्परस्थानव्यत्यासः विपर्यासः । यथा "सरो रसः, नदी दीना" इत्यादिषु सकारस्य स्थाने रकारस्य, रकारस्य स्थाने सकारस्य उच्चारणं वर्णविपर्यासः । एवमेव आग्नेययागस्थाने अग्नीषोमीययागस्य, अग्नीषोमीययागस्थाने आग्नेययागस्य अनुष्ठानं यागविपर्यासः । तत्र वर्णविपर्यासः अर्थभेदबोधकः । यागानुष्ठानविपर्यासः यागस्य वैगुण्यापादकः । अत एव यागविपर्यासकरणे विपर्यासजनितदोषनिर्हरणार्थं तदुक्तप्रायश्चित्तं करिष्ये इति संकल्पं कृत्वा प्रायश्चित्तं कुर्वन्ति याज्ञिकाः । विपर्यासे कस्यापि लोपो नास्ति । किन्तु स्थानभेदकरणमेव । अन्यस्य पदस्य स्थाने, अन्यस्य प्रत्ययस्य स्थाने वा अन्यस्य पदस्य, अन्यस्य प्रत्ययस्य वा प्रक्षेपः, स ऊहः, यथा प्रकृतौ "अग्नये जुष्टं निर्वपामीति, श्रुतं,

विकृतौ सौर्ययागे सूर्याय जुष्टं निर्वपामीति, अग्निपदस्य स्थाने सूर्यपदस्य प्रक्षेपः, "अग्नीषोमाभ्यां छागस्य वपाया मेदसोऽनुब्रूहि" इति अग्नीषोमीय-पशुयागे, आग्नेयपशुयागे अग्नये छागस्य वपाया मेदसोऽनुब्रूहि, इति, द्विवचनप्रत्ययस्थाने एकवचनप्रत्ययस्य, सारस्वतीं मेषीमालभते"ति विहित-पशुयागे, सारस्वत्यै इति पुंलिङ्गप्रत्ययस्थाने स्त्रीलिङ्गप्रत्ययस्य प्रक्षेपः ऊह इत्युच्यते । अन्येन = उत्तरेण अन्यस्य = पूर्वस्य बाधो वर्तते अत्रेति भेदः ।

सामान्यस्य, विशेषे सङ्कोचः उपसंहारः । यथा "पुरोडाशं चतुर्धा करोति" इति पुरोडाशसामान्यस्य विहितचतुर्धाकरणं "आग्नेयं पुरोडाशं चतुर्धा करोति" इति विशेषशास्त्रेण आग्नेयपुरोडाशे संकोच्यते। उपसंहारस्थले विशेषेण सामान्यस्य बाधो वर्तते ।

शास्त्रेण कर्तव्यतया अन्यथाविधीयमानमुत्सृज्य = उपेक्ष्य स्वेच्छया अन्यथाकरणं परिवर्तनम् ; यथा उपनयनविवाहादिषु शास्त्रतः अन्यथा-विधीयमानं तदङ्गदीक्षादिकं पदार्थं विलोप्य स्वेच्छया समापनम् । एवमेव श्रौतकर्मस्वपि शास्त्रमुल्लङ्घ्य केषाञ्चित्पदार्थानां लोपः केषाञ्चित् मुख्य-द्रव्याणां स्थाने शास्त्रानुक्तप्रतिनिधिना अन्यस्मिन्काले विहितं अन्यस्मिन् काले आचरणं च धर्मे परिवर्तनमित्युच्यते ।

यदि शास्त्रेषु तत्तदनुष्ठानविषये बहवः पक्षाः निरूपिताः स्युः तेषां मध्ये लाघवगौरवादिकं विचार्य देशकालानुरोधेन यस्मिन्पक्षे अनुष्ठान-लाघवं भवति तत्पक्षस्वीकारः सङ्कोच इत्युच्यते । यथा वैश्वदेवे कूष्माण्ड-दीक्षाविषये "संवत्सरं दीक्षितो भवति । संवत्सरादेवात्मानं पुनीते । मासं दीक्षितो भवति । यो मासस्संवत्सरः संवत्सरादेवात्मानं पुनीते ... तिस्रो रात्रीर्दीक्षितो .... भवती"ति तिस्रो दीक्षापर्यन्तं बहवः पक्षाः विहिताः । तत्र अशक्त्या संवत्सरदीक्षादिकं पक्षं गौरवभीत्या उपेक्ष्य लघुभूतः तिस्रो दीक्षापक्षः यदि स्वीक्रियते तदानीमनुष्ठेयपदार्थसङ्कोच

एव भवति। अत्र सकृद्दीक्षापक्षः श्रुत्यनुक्तोऽपि बोधायनसूत्रे उक्त इति सोऽपि पक्षः याज्ञिकैरनुष्ठीयते। एवमेव अग्निचयनेऽपि दीक्षापक्षाः बहव उक्ताः।

संवत्सरप्रभृति तिस्रोदीक्षापर्यन्तमध्ये तिस्रोदीक्षापक्षमाश्रित्य प्रयोगः इत्यप्युक्तम्।

एवमेव वाजपेयेऽपि सप्तदश दीक्षाः तिस्र उपसदः एकविंशति प्रसुतः। यदि सप्तदशदीक्षापक्षे एकविंशति दिवसे सुत्या भवतीति, सत्याषाढः। एवमेव त्रयोदश दीक्षापक्षे तिस्र उपसदः सप्तदश्यां प्रसुतः इति सप्तदश दिवसे सुत्या भवति।

अपि वा तिस्र एव दीक्षाः, तिस्र उपसदः सप्तम्यां प्रसुतः बो. श्रौ. (4-1) एकविंशीमिति वा कल्पान्तरम्। तथा चतुर्दश दीक्षाः षडुपसदः, एकविंशी प्रसुतः, नाग्निचयनमेव, इति बहुषु पक्षेषु तत्तत्शक्त्यनुसारेण एकैकेन एकैकः पक्षः स्वीक्रियते। अत्र गौरवपक्षमुपेक्ष्य यदि लाघवपक्षः स्वीक्रियते स सङ्कोचपक्षमाश्रित्य प्रयोगः क्रियत इति याज्ञिका वदन्ति। अत्र न विपर्यासः। नोपसंहारः। न परिवर्तनम्। यद्यप्यत्र विकल्पः अस्ति उभयोरपि शास्त्रप्राप्तत्वात्। तथापि उभयोः पक्षयोः गौरवभिया अन्यं पक्षमुत्सृज्य लाघवमाश्रित्य अन्यः पक्षः स्वीक्रियत इति सङ्कोच इत्युच्यते। एवं विपर्यासादीनां भेदो निरूपितः। एषां मध्ये परिवर्तनं अतीव दोषावहम्। यद्यपि विपर्यासकरणेऽपि दोषोऽस्ति तथापि सः प्रायश्चित्तेन समाधातुं शक्येत। न तथा परिवर्तनम्। एवं स्थिते सति धर्मः परिवर्तनीयो न वा? इदानीन्तनाः केचिन् अद्यतनकालानुसारेण धर्मः परिवर्तनीय इति वदन्ति ते तावद्वादिनः प्रष्टव्याः शास्त्रे अन्यथा उपदिष्टस्य अन्यथाकरणमिति वा, अन्यथा उपदिष्टस्य अन्यथा व्याख्यानमिति वा युगचतुष्टयसाधारण्येन बोधितो धर्मः सङ्कोच्य इति वा? नाद्यः। धर्मो नाम श्रुति-स्मृति-प्रमाणैकगम्यः श्रेयस्साधनताकः

इति पूर्वमेव उपपादितम् । तस्य धर्मस्य अलौकिकत्वेन प्रत्यक्षाद्ययोग्यत्वात् अस्मदभीष्टानुसारेण अनुष्ठाने कदाचित् अधर्मत्वापत्तिः, कदाचित् विगुणत्वापत्तिः, कदाचित् प्रत्यवायजनकत्वापत्तिश्च । अत एव धर्मानुष्ठाने भावभेदस्य सत्त्वेऽपि मन्वादिभिरुक्तम् । तथा हि—

"विद्वद्भिस्सेवितस्सद्भिः नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ।। मनु॰ स्मृ॰ 2 2-1

अस्याः स्मृतेः वीरमित्रोदये एवं व्याचख्युः । "मानवे धर्मलक्षणवाक्ये द्वेषरागशब्दौ लोभदम्भादीन्युपलक्षयतः । तेषामपि दोषतायाः निर्विवादत्वात् अन्यथा दम्भादिकृतानां यज्ञानामभ्यनुज्ञापत्तेः । रागश्च इह वैधफले अधिकारघटकत्वेन तस्य अवर्जनीयत्वाच्च । "यज्ञाश्च नियमाश्च तपांसि च । न विप्रदुष्टभावस्य सिद्धिं गच्छति कर्हिचित् ।" भावश्च इह सङ्कल्पः स च इदं करिष्यामीति, कर्तव्यताध्यवसायः । तत्र दोषश्च निषिद्धकरणादि प्रयोज्यत्वमेव । शुद्धिरपि, तत्सामान्याभाव एव, शुद्धमुक्तभाव एव च शीलमित्याचष्टे शिष्टलोकसमष्टिः । तदेतत्सकलमभिप्रेत्यैव ऋषीन्प्रति सौतिरुवाच ।

"तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः ।
प्रसह्य वित्ताहरणं न कल्कः
तान्येव भावोपहतानि कल्कः ।। "

अयमर्थः— तपः कृच्छ्रचान्द्रायणादिः न कल्कः, न पापं, अध्ययनं न कल्कः, स्वाभाविकः स्वस्ववर्णाश्रमादिपुरस्कारेण विहितः "शमो दमस्तपस्सत्य"मित्यादिः न कल्कः, प्रसह्य वित्ताहरणं - उञ्छशिलादिवृत्तिः न कल्कः । ननु कथं तेषां कल्कता प्राप्तिः, यतः अयं निषेध इत्यत आह । तान्येव तप-आदीनि, भावोपहतानि यदा निषिद्धफलाभिप्रायेण अनुष्ठितानि तदा कल्कः - पापं नयन्तीत्यर्थः । पापजनकत्वादेव तेषामधर्मत्वम् । अन्यथा वेदविहितस्य अग्निष्टोमस्य धर्मलक्षणलक्षितस्य

"यं कामं कामयते तमेतेनाभ्यश्नुते" तै. सं 7.1, "सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः" इत्यादिश्रुतिभिः कामितसर्वफलसाधनत्वेनाप्यनुष्ठेयत्वमुक्तम्। सर्वफलान्तर्गतत्वात्। कदाचित् शत्रुमरणकामेनाप्यनुष्ठेयत्वप्रसक्तौ तदा श्येनयागवत् निषिद्धफलसाधनत्वेऽपि धर्मत्वापत्तिरित्याशङ्क्य स्वर्गसाधनभूतस्य शत्रुमरणसाधनभूतस्य च कर्मणः एकत्वेऽपि निषिद्धफलसाधनत्वावस्थायां न धर्मत्वम्। अन्यथा दंभादिकृतानामपि धर्मत्वापत्तिरिति दोषः प्रदर्शितः। अनेन कर्मणः एकत्वेऽपि प्रयोगभेदेन कदाचित् धर्मत्वं कदाचित् अधर्मत्वमपि संभवतीत्यर्थः। यद्यपि अग्निष्टोमादीनां धर्मत्वात् तत्र अग्नीषोमीयं पशुमालभेतेति, विधिसामर्थ्याच्च, ऋत्वङ्गभूतपशुहिंसायाः हिंसात्वं नास्तीति निर्णीतम्। तथापि तस्यैव अग्निष्टोमस्य निषिद्धफलसाधनत्वेन अनुष्ठितत्वे तस्याऽधर्मत्वेन तदङ्गभूत-अग्नीषोमीय-पशुहिंसायाः हिंसात्वमिति हिंसाजन्यदोषो भविष्यति। अतः धर्मलक्षणलक्षितस्य अग्निष्टोमादियागस्य वैधफलसाधनत्वेन अनुष्ठितत्वेऽपि दम्भादिकृतत्वेन भावभेदेन, यथा अधर्मत्वमङ्गीकृतं तथा वैधफलसाधनत्वेन भावशुद्धया अनुष्ठितानामपि कर्मणां अयथानुष्ठानेन विगुणत्वापत्तिः प्रत्यवायजनकत्वापत्तिश्च। न च यस्य वस्तुनः य एव स्वभावः सः देशान्तरे कालान्तरेऽपि तत्स्वभावं न परित्यजति। एवमेव एकः क्रतुः यदा धर्म इति निर्णीतः स क्रतुः तद्गतधर्मत्वं प्रयोगान्तरेऽपि न परित्यजतीति वाच्यम्।

यद्यपि भोजनक्रिया भोजनक्रियात्वेन रूपेण एकैव तथापि आरोग्यावस्थायां सा पुष्टिं ददाति। आतुरावस्थायां मृत्युं ददाति। अत एवोक्तं भट्टपादैः वार्तिकग्रन्थे– "स्वस्थातुराणां भोजनक्रियैव" इति श्रुतिरप्येवमेव वदति। "अन्नं मृत्युं तमु जीवातुमाहुः" इति। एवमेव आयुर्वेदशास्त्रे वाग्भटे देशभेदेन आरोग्यप्रदाः "मरुवासिष्वतिसात्म्यं दधि, पीलु, शमीकराः" "कालभेदेन दोषप्रदं-घृतदुग्धं हेमन्ते मन्दाग्निकफोलरं भवेत्।" संस्कारभेदेन गुणभेदः। संस्कारेण लघुभ्यः सक्तुभ्यस्सिद्धपिण्डिका गुरवः, संयोगभेदेन, गुणभेदः भल्लातकसहतिलैः तत्कार्यमपि कुष्ठमपहरति, पश्यन्तु श्लोकवार्तिकम्। तथाहि—

अत्र प्रसङ्गानुप्रसङ्गेन धर्माऽधर्मलक्षणपरिष्कारमार्गे बहून्प्रकारान्प्रदर्श्य तन्निरसनपूर्वकं अन्ततो गत्वा "धर्माऽधर्मार्थिभिर्नित्यं मृग्यौ विधिनिषेधकौ ।" इति । अयं धर्मः अयमधर्म इति निर्णये विधिनिषेधशास्त्रे एव शरणमित्युक्तम् । एवंस्थिते सत्येव केचिदेवमभिप्रयन्ति । यस्य कर्मणः यादृशी फलोत्पादिका शक्तिः विधिना वा निषेधेन वा या बोधिता सा शक्तिः क्वचिन्निषिद्धस्य विहितत्वेऽपि क्वचिद्विहितस्य निषिद्धत्वेऽपि नापवर्तितुमर्हति । यथा "न हिंस्यात्सर्वभूतानी"ति हिंसाया निषिद्धत्वे सति क्वचित् "अग्नीषोमीयं पशुमालभेत" इत्यग्नीषोमीयपशुहिंसाया विहितत्वेऽपि तस्याः प्रथमतः न हिंस्यादिति शास्त्रानुसारतः ज्ञायमानं प्रत्यवायनिमित्तत्वं नापगच्छतीत्याशङ्काया उपरि एवं समाधानमुक्तम्-

"एवं ये निपुणं प्राहुस्तैरप्येतत्परीक्ष्यताम् ।
सुरापानादिभिश्शूद्रं किं याति नरकं कृतैः ।।

वैश्यस्तोमेन वा किं स्यात् विप्रराजन्ययोः फलम् ।
पञ्चम्यामिष्टिकरणान्मध्याह्ने चाग्निहोत्रतः ।।

तस्माद्यद्यादृशं कर्म यत्फलोत्पत्तिशक्तिकम् ।
शास्त्रेण गम्यते तस्य तादृशस्यैव तत्फलम् ।।" इति अयमर्थः

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।
यथैवैका तथा सर्वा न पेया ब्रह्मवादिभिः ।।

इत्यनया स्मृत्या त्रैवर्णिकानामेका सुरा निषिद्धा ब्राह्मणानां तु त्रिविधापि सुरा निषिद्धा न तु शूद्रस्य । तथापि सुरापानस्य अन्येषां निषिद्धत्वात् तेन तेषां प्रत्यवायजनकत्वमस्तीति शूद्रकृतसुरापानेऽपि प्रत्यवायजननद्वारा तस्य नरकप्राप्तिरस्तीति वक्तुं न शक्यते खलु । तथा वैश्यकर्तृकवैश्यस्तोमे ब्राह्मणराजन्यकर्तृकत्वेन अनुष्ठिते सति तयोः फलं नास्ति । तथा पौर्णमास्यमवास्ययोः विहिता इष्टिः । तस्याः पञ्चम्यां करणेन "सायं जुहोति प्रातर्जुहोती"ति सायंप्रातःकालयोः विहितमग्निहोत्रं मध्याह्ने कृतं स्यात्,

क्रियायास्समानत्वेऽपि तयोर्विहितातिरिक्तकालकरणेन तयोः फलं नास्तीत्युक्तम् । अत एव पौर्णमास्यमावास्यादिकालातिक्रमे प्रायश्चित्ततया "अग्नये पथि कृते पुरोडाशमष्टाकपालं निर्वपेत्" इति पथिकृदिष्टिर्विहिता । "प्रमाणभेदेन गुणभेदः ।"

"तिलशो निषेव्यमाणं विषमपि सञ्जायते अमृतसमम् ।"

अतः एक एव क्रतुः देशभेदेन कालभेदेन भावभेदेन धर्मोऽप्यधर्मो भवति । तेन शास्त्रविहितइतिकर्तव्यतात्वमुल्लङ्घ्य अन्यथाकरणरूपपरिवर्तनं न कार्यम् । न द्वितीयः । वेदशास्त्रगोचरीभूतः धर्मः अस्मदीयमतानुसारेण निर्णीतश्चेत् सोऽपि अधर्मो भवति । धर्मस्तावत्समाजेन निर्णेतुं न केवलं बुद्धिगोचरः । लोके यावद्धीशालिनामपि प्रमाणैरेव प्रमेयं गृह्यते । न तु केवलं बुद्धया । बुद्धेः अस्वतन्त्रत्वात् चक्षुरादिइन्द्रियैर्विना । केवलं बुद्धया रूपादिकमेव न गृह्यते । किमुत अतीन्द्रियो धर्मः न गृह्यत इति तदेवोक्तं श्लोकवार्तिके—

"यथा च मनसस्सार्थं रूपादौ चक्षुरादिना ।
प्रवृत्तिस्सुखदुःखादौ केवलस्यैव गम्यते ॥"

इति इन्द्रियाद्यनपेक्ष्य केवलमनोगोचरं सुखं दुःखं चेत्येतदुभयमेव । अपि च शास्त्रज्ञानरहितजनसामान्यस्य व्यवहारोऽपि धर्माऽधर्मपरिज्ञानार्थं अन्ततो गत्वा शास्त्रमेव कारणमिति वक्तव्यम् । अत एव कामशास्त्रे—

"सर्वत्र हि लोके केचिदेव शास्त्रज्ञाः । सर्वजनविषयश्च प्रयोगः । प्रयोगस्य दूरस्थमपि शास्त्रमेव हेतुः । अस्ति व्याकरणमिति अवैयाकरणा अपि याज्ञिकाः ऊहं क्रतुषु प्रयुञ्जते । अस्ति ज्योतिषमिति पुण्याहेषु कर्म कुर्वन्ति । तथाऽस्ति राजेति दूरस्था अपि जनपदाः न मर्यादामतिवर्तन्ते । तद्वत् लोके धर्मपदस्य प्रसिद्धत्वेऽपि धर्मपदार्थस्तावत् शास्त्रैकगोचर इति अनभिज्ञा अपि शास्त्रमेव तस्य मूलमिति उररीकुर्वन्ति ।

ननु द्रव्यक्रियागुणादीनां धर्मत्वमुच्यते खलु । तेषामैन्द्रियकत्वेन शास्त्रैकगम्यत्वं कथमिति चेदुच्यते । यद्यपि द्रव्यक्रियागुणादीनां धर्मत्वं

स्थाप्यते, तथापि तेषां द्रव्यत्वरूपेण धर्मत्वं नास्ति। किन्तु श्रेयस्साधनतात्वेन रूपेण तस्य श्रेयस्साधनतात्वस्य वेदैकगम्यत्वात् द्रव्यक्रियागुणादीनां प्रत्यक्षत्वेऽपि तेषां धर्मत्वं प्रत्यक्षं न भवति। तदेवोक्तं वार्तिककारैः —

"द्रव्यक्रियागुणादीनां न तादूप्येण धर्मता।
तेषामैन्द्रियकत्वेऽपि धर्मत्वं स्थापयिष्यते॥
श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रतीयते।
तादूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः॥"

इति बहु प्रपञ्चितम्। अतः धर्मः अतीन्द्रियः शास्त्रैकगोचर इति च वक्तव्यम्।

किञ्च सर्वादरणीयेषु भोज्यवस्तुष्वपि वातपित्तादिशारीरदोषैः केषांचित् अरुचिः यथा भवति तथैव मानसानां सत्त्वरजस्तमोगुणानां तारतम्येन धर्मे अधर्मत्वबुद्ध्या अरुचिर्भवति। अधर्मे धर्मत्वभ्रान्त्या रुचिर्भवति। सत्त्वरजस्तमोगुणानां लक्षणानि देवीभागवते एवमुक्तानि—

"यदा सत्त्वं प्रवृद्धं वै मतिर्धर्मे स्थिता तदा।
न चिन्तयति बाह्यार्थं रजस्तमस्समुद्भवम्॥

सात्त्विकेष्वेव भोगेषु कामं वै कुरुते सदा।
यदा रजः प्रवृद्धं वै त्यक्त्वा धर्मान् सनातनान्॥

अन्यथा कुरुते धर्मान् श्रद्धां प्राप्य तु राजसीम्।
यदा तमो विवृद्धं स्यादुत्कटं सम्बभूव ह॥

तदा वेदे न विश्वासः धर्मशास्त्रे तथैव च।
द्रोहं सर्वत्र कुरुते न शान्तिमधिगच्छति॥

वर्तते कामचारेण भावेषु विततेषु च।
सत्त्वं प्रकाशयितव्यं नियन्तव्यं रजस्सदा॥

संहर्तव्यं तमः कामं जनेन शुभमिच्छता॥" इति॥

एतल्लक्षणैः सत्त्वादिगुणैः धर्माधर्मयोः ग्रहणे भेदः दरीदृश्यत इति सार्वजनीनम् । किञ्च यावत्प्राणिनां मतभेदस्य सत्त्वात् तत्तन्मतानुसारेण धर्मनिर्णये अव्यवस्थापत्तिः । अतः श्रुतिस्मृत्यादिनिर्णीतधर्मानुसारेण अस्मदीया प्रवृत्तिः भवितुमर्हति । यदि अस्मदीयप्रवृत्यनुसारेण धर्मनिर्णयः स्यात् कस्यचित्पुरुषस्य धर्मत्वेनाभिप्रेतं तदैवान्यस्य अधर्मत्वेन भवितुमर्हति एवमनवस्था सुदूरं गता । न तृतीयः । युगसाधारण्येन मनूपदिष्टाः धर्मा एव युगभेदेन पराशरादिभिः व्यवस्थिताः । अत एव व्यवस्थया संकोचः सिद्ध एव । तथा हि— "तत्तद्युगादिषु विद्यमानानां जनानां शक्तिसामर्थ्यादिकमालोच्यैव तैस्तैर्मुनिभिः धर्माः व्यवस्थिताः । उक्तं च पराशरस्मृतौ—

"कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः ।
श्रुतिस्मृतिसदाचारनिर्णेतारश्च सर्वदा ॥"

ननु—

"अन्ये कृतयुगे धर्माः त्रेतायां द्वापरे युगे ।
अन्ये कलियुगे नृणां युगरूपानुसारतः ॥"

इत्यादि पराशरस्मृतिवचनेनैव तत्तद्युगादिषु धर्माणामत्यन्तं तैरेव परिवर्तनं सम्पादितम् इति चेन्न । युगभेदेन धर्मस्वरूपभेदः नोक्तः । तथा सति धर्मप्रमाणभूतानां वेदानामपि भिन्नत्वं कथितं स्यात् । अस्मिन् युगे अयं वेद इति कुत्रापि नोच्यते । किन्तु धर्माचरणप्रकारभेद एवोक्तः ।

"यथा अभिगम्यकृते, दानं त्रेतास्वाहूय दीयते ।
द्वापरे याचमानाय सेवया दीयते कलौ ॥
अभिगम्योत्तमं दानं आहूयैव तु मध्यमम् ।
अधमं याचमानाय सेवादानं तु निष्फलम् ॥"

अत्र दानफलभेदेन दातृबुद्धिभेदेन दानलक्षणं न भिद्यते । स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं दानमिति लक्षणस्य सर्वयुगेष्वप्यविशिष्टत्वात् । एवमेव श्रौतस्मार्तादिकर्मरूपधर्मोऽपि न

भिद्यत एव । तदेवोक्तं पराशरमाधवीये "नहि नानाविधेषु मतान्तरेषु धर्म भिद्यमानं क्वचिदुपलभामहे ।"

"कृते तु मानवाः धर्माः त्रेतायां गौतमाः स्मृताः ।
द्वापरे शंखलिखिताः कलौ पाराशर स्स्मृताः" ॥

इति वचनानुसारेण धर्मः परिवर्तत इति न भ्रमितव्यम् ।

किन्तु कृतादिषु मानवादिधर्माणां प्रचुरप्रवृत्तिः कलौ तु पाराशराणां इत्यत्र तात्पर्यम् ।

ननु यथा कलौ पाराशरा स्मृताः इति वचनेन कलौ पराशरस्मृतेरेव प्रामण्यं तथैव इदानीन्तनकालानुसारेण अस्माभिः धर्मपरिवर्तने को दोषः इति चेन्न ।

प्रतिकल्पेषु कलौ पराशरस्मृतेः विद्यमानत्वात् । तथैवोक्तं माधवीये सर्वेष्वपि कल्पेषु पराशरस्मृतेः कलियुगधर्मपक्षपातित्वात् । प्रायश्चित्तेष्वपि कलियुगविषयेषु पराशरः प्राधान्येन आदरणीय इति । अतः तदुक्तमेव धर्म प्रति प्रमाणम् न त्वन्यदुक्तमिति । मी॰ तं वा. के॰ शिष्टाकोपाधिकरणे बौद्धस्मृतेः प्रामाण्यनिराकरणप्रसङ्गे उक्तम् ।

"प्रतिकञ्चुकमात्रेण पूर्वशास्त्रार्थगोचरम् ।
यदन्यत्क्रियते तस्य धर्मं प्रत्यप्रमाणता ॥" इति ।

पूर्वं प्रामाण्यवादिना स्मृतिकर्त्रा यादृशार्थगोचरीभूता स्मृतिः रचिता, तादृशार्थसरूपविषयीभूता स्मृतिरन्या अप्रामाण्यवादिना कृतापि तस्याः धर्मं प्रति प्रमाणता नास्ति । तत्स्मृतेः धर्मविद्यास्थानानां मध्ये अपरिगणितत्वात् इत्यर्थः ।

तथा च प्रायश्चित्तादिदानकाले यो वाक्यमात्मीयमन्यकविकृतं वा श्लोकं सूत्रं वोच्चार्य मानवादिप्रायश्चित्तं दद्यात् न कश्चिदपि धर्मार्थं प्रतिपद्येत, इति । अनेन प्रामाण्यवादिनामपि मध्ये अस्मदादिभिः मन्वादि-स्मृति सदृशी स्मृतिः यदि क्रियेत, तस्या अपि प्रामाण्यं नास्तीत्युक्तम् । नन्वेवं सति

मन्वादिग्रन्थानामप्यप्रामाण्यं स्यादिति चेत् उच्यते—

"वेदेनैवाभ्यनुज्ञाता येषामेव प्रवक्तृता ।
नित्यानामभिधेयानां मन्वन्तरयुगादिषु ॥
तेषां विपरिवर्तेषु कुर्वतां धर्मसंहिताः ।
वचनानि प्रमाणानि नान्येषामिति निश्चयः ॥"

प्रवाहनित्यता येषां मन्वादीनां विद्यते तेषामेव प्रवक्तृत्वाधिकारः वेदेनैव अभ्यनुज्ञातः । युगेषु विपरिवर्तेषु सत्सु तदानींतनजनसामर्थ्यमालोच्य धर्मसंहिताः कुर्वतां तेषामेव वचनानि प्रमाणानि नान्येषामिति स्पष्टमुक्तम् । यथा—

"कृतेषु मानवा धर्माः त्रेतायां गौतमास्स्मृताः ।
द्वापरे शंखलिखिताः कलौ पाराशरास्स्मृताः ॥"

इति तत्तद्युगानुसारेण तत्तस्मृतिः प्रमाणमिति व्यवस्था कृता । वेदेषु तेषां नामानि यतः श्रूयन्ते अतः तत्तत्कर्तृकस्मृतीनां प्रामाण्यमिति । तथा च "मनोर् ऋचस्सामिधेन्यो भवन्ति", इत्यस्य विधेर्वाक्यशेषः श्रूयते ।

"यद्वै किं च मनुरवदत्तद्भेषजं भेषजमेवास्मै करोति" इति प्रायश्चित्ताद्युपदेशवचनं पापव्याधेर्भेषजम् । इदमुपलक्षणं पराशरगौतमादीनामपि वचनानि पापव्याधेर्भेषजानीति वक्तव्यानि । तेषां पराशरव्यासादीनामपि नामानि तत्तत्प्रकरणेषु, "स होवाच व्यासः पाराशर्यः" गौतमकुमारमिति, विश्वामित्रजमदग्नी वासिष्ठेनास्पर्धेताम्" इत्यादीनि श्रूयन्ते खलु । नन्वनादेर्वेदस्य आदिमन्मन्वादिपुरुषविशेषाभिधायित्वायोगात् श्रुतिसामान्यमात्रेण, मन्यते = ज्ञायते, तेनेति व्युत्पत्त्या मनुशब्देन वेदाभिधानान्नानेन वाक्यशेषेण मनोः प्रवक्तृता अनुज्ञायत इत्याशङ्क्यायामेवमाह— "न वै तच्छ्रुतिसामान्यमात्रं नित्योऽपि संभवात् । "यज्ञे अध्वर्युरिव ह्यस्ति मनुर्मन्वन्तरे सदा" इति । मन्यते ज्ञायत इति व्युत्पत्त्या वेदपरत्वेन प्रयुक्तस्य मनुशब्दस्य व्यक्तिपरत्वेनाभिधानं श्रुतिसामान्यमात्रमिति यदुक्तं, तन्न । यथा लोके प्रति यज्ञं अध्वर्युत्वेन वृत्तीतः कश्चन पुरुषः अनित्योऽपि

अध्वर्युपदस्य नित्यत्वात् तत्पदमाश्रियमाणः आध्वर्यवं निर्वहमाणः प्रति यज्ञमस्तीति अध्वर्युरिति प्रवाहनित्यतया व्यपदिश्यते । एवमेव प्रवाहनित्याः मनुपराशरादयस्सन्तीत्युररीकर्तव्याः । एवं स्थिते मनोः प्रवाहनित्यत्वेऽपि तत्स्मृतेरनित्यत्वात् न वेदेन = वेदनिर्दिष्टत्वेन रूपेण प्रामाण्यानुज्ञानं संभवतीत्याशङ्का उदेतीति तां मनसि निधाय समाधानमेवमुक्तम् —

"प्रतिमन्वन्तरं चैव स्मृतिरन्या विधीयते" । इति । अनेन यथा मनोः प्रवाहनित्यत्वमुक्तम् तथैव प्रति मन्वन्तरं मनुस्मृतिरन्या विधीयत इति मनुस्मृतीनामपि प्रवाहनित्यत्वमुक्तम् । ननु कल्पान्तरे मनूनामभावात् तद्वाक्यप्रामाण्यपरत्वे वेदस्य अनित्यत्वं स्यादित्याशङ्कायामाह—

"स्थिताश्च मनवो नित्यं कल्पे कल्पे चतुर्दश ।
तेन तद्वाक्यचेष्टानां सर्वदैवास्ति संभवः ॥"

तदुक्तिज्ञापनाद्वेदो नाऽनित्योऽतो भविष्यति ।

"प्रतियज्ञं भवन्त्यन्ये सर्वदा षोडशर्त्विजः ।
आदिमत्त्वं च वेदस्य न तच्चरितबन्धनात् ॥"

इति प्रतिकल्पं मनूनां सत्त्वात् तेषां नित्यत्वेन तदुक्तिज्ञापनमात्रात् वेदोऽनित्यो न भविष्यति । तत्रायं दृष्टान्तः । यथा प्रतियज्ञं षोडशित्वजः सन्त्येव । अतः तच्चरितबन्धनात् वेदस्य आदिमत्त्व नोच्यते । अन्योऽपि दृष्टान्त उक्तः —

"यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भाति युगादिषु ॥"

इति । प्रति वत्सरं तत्तदृतौ यानि यानि लिङ्गानि दृश्यन्ते पुनः तत्तदृतौ तानि तान्येव दृश्यन्त इति यथा तथैव प्रतिकल्पं मन्वादयः । किञ्च मन्वादीनां नित्यत्वेऽपि तत्कृतस्मृत्यादिधर्मशास्त्राणां कृत्रिमत्वात् अकृत्रिमवेदेन साकम्—

"पुराण-न्याय- मीमांसा-धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य चतुर्दश ।।"

इति पुराण-धर्मशास्त्रादीनां कथं विद्यास्थानत्वमित्याशङ्क्य उक्तम् —

"इतिहासपुराणञ्च कृत्रिमत्वेन निश्चिते ।
तथाप्यकृत्रिमे वेदे तथात्वेन सम्मतम् ।।"

इति वेदेनैव तेषां विद्यास्थानत्वम् उपपादितम् । तथा हि उपनिषत्सूक्तम्– "ऋग्वेदं भगवोऽध्येमि, इतिहासं पुराणञ्च पञ्चममिति ।" "यद्ब्राह्मणानीतिहासान्पुराणानि" इति तै॰ ब्रा॰ 1 "ऋचो यजूँषि सामानि अथर्वाङ्गिरसश्च ये सर्वास्ताः इतिहासपुराणञ्च । इति तै॰ ब्रा॰ 3-10 तेन प्रतिकल्पं मन्वन्तरयुगनियतनित्यऋषिनामाभिधेयकृत्रिमविद्यास्थानकाराः ये वेदेऽपि मन्त्रार्थवादेषु श्रूयन्ते तत्प्रणीतान्येव विद्यास्थानानि धर्माङ्गत्वेन सम्मतानीति, पुराणन्यायमीमांसाचतुर्दशेप्युक्तम् । अथ —

"आयुर्वेदो धनुर्वेदः गान्धर्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादशैव तु ।।"

इत्यनया स्मृत्या पूर्वैस्सह संख्यापूरणेन ऋत्वर्थ-आज्यावेक्षणाद्यर्थं चिकित्सादि, दिग्विजयार्थं शस्त्रविद्या, गानौपयिकषड्जादि, अष्टादशविद्यानां धर्मप्रमाणत्वं, स्थापितम्, मीमांसान्यायपुटायाम् । प्रकृतमनुसरामः ।

तत्सिद्धम् पराशरादिभिः तत्तद्युगभेदेन धर्मव्यवस्थैव कृता । न परिवर्तनम् । तथा व्यवस्थया संकोचस्सिद्ध एव । अतः तैः परिवर्तनं कृतमिति भ्रान्त्या अस्माभिः शास्त्रानुक्तविधया स्वेच्छया आचरणरूपपरिवर्तनं न कर्तव्यम् । तेन प्रत्यवायो भविष्यति । कर्मणः वैगुण्यमपि भवति । अत एवोक्तं ताण्ड्यब्राह्मणे "अथैष ज्योतिः" 16-8-1 इत्यादिना क्रतुवैगुण्यपरिहारार्थं सहस्रदक्षिणाकः ज्योतिरग्निष्टोमः विहितः । अयं क्रतुः अग्निष्टोमभेदनिरूपणावसरे द्वितीयाध्याये निरूपितः तत्रैव द्रष्टतदेवोक्तम् । "देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन्ते शंयुं बार्ह-

स्पत्यमब्रुवन्। इमं नो यज्ञं स्वगाकुर्विति सोऽब्रवीद्वरं वृणै यदेवाब्राह्मणोक्तोऽश्रद्धधानो यजातै, सा मे यज्ञस्याशीरस"दिति। तस्मात् यदब्राह्मणोक्तोऽश्रद्धधानो यजते शंयुमेव तस्य बार्हस्पत्यं यज्ञस्याशीर्गच्छति" एतन्ममेत्यब्रवीत्। किं मे प्रजाया इति योऽपगुरातै शतेन यातयात् यो निहनत्सहस्रेण यातयात्; यो लोहितं करवत् यावतः प्रस्कद्यपाँसून्संगृह्णात् तावतस्संवत्सरान्पितृलोकं न प्रजानादिति। तस्मात् ब्राह्मणाय नापगुरेत, न निहन्यात्, न लोहितं कुर्यात्। "एतावता हैनसा भवति।" तै. सं. 2-6-10.

तस्य अयमर्थः यस्यै देवतायै यद्धविर्विहितं तस्य हविषः सांकर्यमन्तरेण तस्य तस्य देवस्य स्वगतं कुर्विति बृहस्पतिपुत्रं शंयु नामानं प्रति देवा अब्रुवन्। तदा असौ शंयुः चिन्तितवान्। "एतत्काम एतेन यज्ञेन यजेत", अयं यागः एवंप्रकारेण कुर्यात्। इतीदृशेन ब्राह्मणेन अनुक्तः यः कश्चित् स्वेच्छयैव यजेत। यश्चान्यः श्रद्धारहितो यजेत। तयोरुभयोर्यज्ञफलं ममास्त्विति वरः। तत आरभ्य तत्फलद्वयं शंयुमेव प्राप्नोति। पुनरपि शंयुरेवमुवाच। "तदेतदुभयं मम सम्पन्नं" मदीयायाः पुत्रपौत्रादिरूपायाः, प्रजायाः किं दास्यत इति। ततो देवाः अपगोरणादिकर्तुः यातना, त्वत्पुत्राधीना भवत्विति वरं दत्तवन्तः। अपगोरणः ताडनोद्योगः इति वेदभाष्यम्। तदुद्योगं यः ब्राह्मणविषये करोति तं शतनिष्कदण्डेन यातयात्, क्लेशयेत्। यो निहनत्, ताडयेत्, तं सहस्रनिष्कदण्डेन क्लेशयेत्। यो ब्राह्मणशरीरे लोहितं ग्राहयेत्; लोहितं भूमौ पतित्वा यावतः परमाणून् व्याप्नोति तावतस्संवत्सरान् अयं पितृलोकं न प्राप्नोति। किन्तु यमयातनामनुभवति। तत्सर्वं त्वत्प्रजाधीनमिति वरः। यस्मादुक्तरीत्या ब्राह्मणाधिक्षेपादौ प्रत्यवायोऽस्ति तस्मान्न कुर्यात्। इति उभयविधनिषेध उक्तः। तस्मात् विधिवाक्यानुक्तप्रकारेण यागं न कुर्यात्। ब्राह्मणाधिक्षेपादिकं न कुर्यात्। करणे च एतावता पूर्वोक्तेन पापेन युक्तो भवतीत्यर्थः। अनेन अयथानुष्ठानं न कर्तव्यमिति। अस्मिन्नेव प्रसङ्गे अधर्म-अकार्ययोरपि भेदः उच्यते। यन्निषिद्धं तन्न कुर्यादिति। तदनेकविधम्। स्वरूपतः निषिद्धं, तत्तत्कर्त्वङ्गत्वेन निषिद्धं, देशकालाद्युपाधि-

माश्रित्य निषिद्धं चेति यथाक्रमं विभियते । तत्र आद्यः, ब्राह्मणो न हन्तव्यः, न सुरां पिबेत् । न कलञ्जं भक्षयेत्, न परदारान् गच्छेत् । न हिंस्यात्सर्वा भूतानि इत्यादि स्वरूपतः निषिध्यमानानामनर्थहेतुत्वमुक्तम् । प्रत्यवायजनकत्वात् । केषाञ्चित् कर्मणां स्वरूपतः अनिषिद्धत्वेऽपि निषिध्यमानफलसाधनत्वेन परम्परया अनर्थहेतुत्वमुक्तम् । यथा श्येनेनाभिचरन् यजेत; इति श्येनयागस्य विहितत्वेऽपि परम्परया न हिंस्यादिति सामान्यशास्त्रेण निषिध्यमानहिंसा साधनत्वाच्च अनर्थहेतुत्वमिति ।

तदेवोक्तं, "चोदनालक्षणोऽर्थो धर्मः" इत्यत्र धर्मपदार्थनिर्वचनप्रसङ्गे सूत्रघटक-अर्थपदसार्थक्याय मी. शा. भाष्ये को अर्थः । "यः निःश्रेयसाय ज्योतिष्टोमादिः ।" अत्र अर्थशब्दः लक्षणया स्वसाधनपरः । अर्थात्मकस्वर्गसाधनकं किमित्यपेक्षायां यो नि.श्रेयसाय ज्योतिष्टोमादिः, स अर्थपदार्थः । को अनर्थ इत्यत्र अनर्थपदं फलस्वरूपपरमित्युक्तम् । अनर्थसाधनीभूतहिंसाफलसाधनत्वेन श्येनयागस्य, श्येनेनेति विहितत्वेन साक्षात्प्रत्यवायाऽजनकत्वेऽपि, परम्परया अनर्थसाधनत्वम् उक्तम् । अत एव भाट्टरहस्ये, वेदविहितत्वे सति बलवदनिष्टाननुबन्धित्वधर्मलक्षणमिति परिष्कारः कृतः । तथा च श्येनादीनां धर्मलक्षणलक्ष्यत्वासंभवात् अधर्मत्वमुक्तं भवति ।

द्वितीयो यथा—

अन्यत्र-पुरुषार्थतया, अग्निहोत्रं जुहोति । इत्यादिवाक्यैः विहितदानहोमादीनां क्रत्वङ्गत्वेन दीक्षितो न ददाति, न जुहोति इति यज्ञारंभात् परं यज्ञसमाप्तेः प्राक् इतरकाल इव शास्त्रतः प्राप्तानां निषिद्धत्वेऽपि तत्करणेन नानर्थः । किन्तु "क्रतोर्वैगुण्यमात्रम्" । पुरुषार्थत्वेन रागतः प्राप्तस्यापि क्रत्वर्थत्वेन निषेधे क्रतौ वैगुण्यं न तु प्रत्यवायजनकम् । यथा क्रतुमध्ये प्राप्तस्य स्वस्त्ययनगमनादेः आदिपदेन भोजनताम्बूलचर्वणादिकं ग्राह्यम् । अन्यत्र रागतः प्राप्तमाश्रित्य कालनियममात्रम् । तस्माद्विरह्नो मनुष्येभ्य उपह्रियते ।"प्रातश्च सायं च" इति । "सायं प्रातरेव भोक्तव्यं,

नान्तरा भोजनम्"· इति श्रुतिस्मृत्यादिभिः विहितम् । तथापि क्रत्वङ्गत्वेन निषेधे सति तदतिक्रमणात् प्रत्यवाय. न भवति । किन्तु क्रतोर्वैगुण्यमात्रम् । एवमेव अन्यत्र रागतः प्राप्तभोजनादेः कालनियमस्य विहितत्वेऽपि, प्रदोषनिशीथयोः न कुर्वीतेति निषेधातिक्रमणात् प्रत्यवायः। एवमेव दिवा विहितस्य श्राद्धस्य, "रात्रौ श्राद्धं न कुर्वीते"ति निषेधातिक्रमणे तस्य वैगुण्यं भवति । एवमेव युगभेदेन निषिद्धाः, देवराच्च सुतोत्पत्तिः सन्यासं, पलपैतृकम्, अश्वालंभो, गवालम्भश्च कलौ पञ्च विवर्जयेत् । तन्निषेधातिक्रमणे च प्रत्यवायो भविष्यति । सार्वकालिकनिषिद्धा अपि, "न कलञ्जं भक्षयेत्" इत्यादयः रागतः यदि क्रतुमध्ये प्रसक्ताः स्युः तदानीं तेभ्यः क्रतोर्वैगुण्यमपि भवति, प्रत्यवायोऽपि भविष्यति । एतावता यानि स्वरूपतः निषिद्धानि तानि अधर्माणीति अनर्थसाधनानि इति च, यानि क्रतुमध्ये इदं न कार्यं, अस्मिन् प्रदोषादिसमये भोजनं न कार्यं इत्यादिरूपेण निषिद्धानि तानि अकार्याणीति तेषु कानिचित् वैगुण्यजनकानि कानिचित् प्रत्यवायजनकानि चेति । यानि अन्यत्रापि निषिद्धानि क्रतुमध्येऽपि निषिद्धानि, तानि क्रतोः वैगुण्यापादकानि स्वस्य प्रत्यवायजनकानि चेति । यद्यपि अधर्मादपि प्रत्यवायो भविष्यति अकार्यादपि प्रत्यवायो भविष्यति । तथापि प्रत्यवायत्वाविशेषेऽपि प्रत्यवाये तारतम्यं विद्यत इत्यूह्यम् । एवम् अधर्म-अकार्ययोः भेद उक्तः । अत्र बहुवक्तव्यस्य सत्त्वेऽपि ग्रन्थविस्तरभयान्न प्रपञ्च्यते । "परं प्रकृतमनुसरामः' । नित्यकाम्यविचारः प्रस्तुतः नित्यकर्मसु यथाशक्तिन्याये योजनीयेऽपि न काम्यकर्मसु तन्न्यायस्य नावकाशः । अकरणे प्रत्यवायाऽभावात्, सर्वशक्तियुक्तस्यैवाधिकार इति मीमांसासिद्धान्ताच्च । यद्यपि काम्यकर्माण्यपि लिङ्प्रत्ययघटितवाक्यैः कामनायां सत्यां कर्तव्यत्वेन विहितान्येव । तथापि साङ्गप्रधानानुष्ठानशक्तियुक्तेनैव तानि कर्तव्यानि । यदि तथा कर्तुमशक्तस्सन् मुख्याधिकारिलक्षणानि, ऋत्विग्यजमानानां विहितनियमानपि परित्यज्य, मुख्यद्रव्याभावे अन्यत्र तस्य, यः प्रतिनिधिरुक्तः तेन, तदभावे येन केनापि द्रव्येण, पुष्करपर्णमुपदध्यादित्यत्र, पलाशपर्णेन वा अन्येन वा उपधानं,

"पशुना यजेतेत्यत्र" एकत्वपुंस्त्वयोः विवक्षामन्तरा पशुद्वयेन वा, स्त्रीपशुना वा कर्मकर्तुमुद्युक्तश्चेत् तदानीं तस्य क्रतोर्वैगुण्यं भवति। स्वस्य प्रत्यवायोऽपि जनिष्यति। अत एवोक्तं मीमांसान्यायप्रकाशे "पशुना यजेतेत्यत्र" एकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वमित्यत्र प्रभाव्याख्यायाम्। अतः तत्र यागसाधनीभूतः पशुरेक एव पुमानेव चालभ्यते। अजायाः स्त्रिय आलम्भने द्वयोः पुंरूप-अजयोः बहूनां वा अजानामालम्भने त्वविधिरेवेति।

तत्र नापूर्वोत्पत्तिः प्रत्युत अनिष्टमेवापद्येतेति भावः इत्युक्तम्। वस्तुतस्तु नित्यकर्मण्यपि अशक्तिकृताङ्गत्यागाभ्युपगमः यान्युपादेयान्यङ्गानि तद्विषयः। न तद्विषयः। यत् खलूपादेयमङ्गं यजमानस्य कर्तव्यतया चोद्यते, तद्विषय एव यथाशक्त्युपबन्धः, यत्त्वनुपादेयं कालवत् न तत्रैवमुपबन्धः, तदपेक्षस्तु विधिः तद्वन्तमधिकृत्यैव प्रवर्तते शा. दी. 33-91 अनेन काम्यकर्मसु उपादेयानामनुपादेयानां च अशक्ततया त्यागः न संभवतीत्युक्तमेव। अन्यत्सर्वं षष्ठाध्याये विस्तृतम्। तत्रैव द्रष्टव्यम्। किञ्च व्याकरणाधिकरणे शा. दी. यां. 1-3-9 दृष्टार्थेऽपि शब्दप्रयोगे साधुनियमः भोजनाश्रितदिङ्नियम इव शास्त्रेण क्रियत इति। सत्यानृतवदनयोश्च अविगीतमेव शास्त्रार्थत्वम्। तच्च शब्द-अर्थभेदेन द्विविधम्। तत्र यथेव अर्थसत्यं यथावस्थितार्थकथनं धर्मार्थं तथा शब्दसत्यमपि — "यथावस्थितअविप्लुतशब्दोच्चारणम्।" यथा अर्थानृतं, अन्यथा अवस्थितस्य अन्यथा वचनं प्रत्यवायाय तथा शब्दानृतमपि अन्यरूपेण वाचके वक्तव्ये अन्यरूपोच्चारणं प्रत्यवायाय भविष्यतीति।

तेनैव न्यायेन शास्त्रेण अन्यथाकर्तव्यतया विहितमुल्लंघ्य स्वेच्छया अन्यथा आचरणं प्रत्यवायाय भवति। तस्य क्रतोर्वैगुण्यमपि भवति। तेन अन्यथा अभिप्रेतं फलमन्यथा जनिष्यति।

शास्त्रविधिमुल्लंघ्य अयथानुष्ठाने विपरीतमपि फलं भविष्यति। तथा हि— श्रीविद्यारण्यकृत-शङ्करविजये 2-17।

"यागोऽपि नाकफलदो विधिना कृतश्चेत्
प्रायस्समग्रकरणं भुवि दुर्लभं तत्।
वृष्ट्यादिवन्न हि फलं यदि कर्मणि स्यात्
दिष्ट्या यथोक्तविरहे फलदुर्विदग्धम्॥"

इत्युक्तम्। व्याख्या एवं दृश्यते। यागोऽपीति। यागः विधिना यथाविधि कृतश्चेत् स्वर्गफलदः। न च तथा कर्तुं शक्यत इत्याह। प्रायः समग्रकरणं भुवि दुर्लभम्। तद्विना तु फलं नैव लभ्यते। हि—यस्मात् आदिपदेन चित्रादियागफलं पश्वादिकं गृह्यते। वृष्ट्यादिवत् कर्मणि फलं यदि न स्यात्, तर्हि दैववशात् यथोक्तविरहे फलदुर्विदग्धम् फलदुर्विधत्वमिति पाठान्तरं भवति। तत्कारीर्यादियागफलभूता वृष्टिः तथा च न पारलौकिकसुखप्राप्त्याशापीत्यर्थः। वेदेऽप्येवमुक्तम्। दीक्षितवादं विधित्सुः एवं प्रस्तौति। "प्रजापतिरकामयत", "प्रजास्सृजेयेति स तपोऽतप्यत", "स सर्पानसृजत", सोऽकामयत, प्रजास्सृजेयेति स द्वितीयमतप्यत सवयागुप्यसृजत, सोऽकामयत प्रजास्सृजेयेति स तृतीयमतप्यत स एतं दीक्षितवादमपश्यत् तमवदत् ततो वै स प्रजा असृजत" 3-1-1 तै. सं.। पुरा प्रजापतिः प्रजासृष्टिं कामयमानः नियमविशेषरूपं तपः अनुष्ठितवान्। अत्र तपश्शब्देन अग्निष्टोमः उच्यते। अन्यत्र सप्तमकाण्डे, "अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत" इत्युक्तत्वात्। अनुष्ठितेन तेन अग्निष्टोमेन सर्पसृष्टिरभवत्। पुनः प्रजासृष्टिं कामयमानः द्वितीयवारं अग्निष्टोमं अनुष्ठितवान्। तेन अग्निष्टोमेन पक्षिणां सृष्टिरभवत्। न तु उत्तमानां मनुष्यादीनाम्। ततः एवं विचारस्समजायत। अग्निष्टोमेन अन्यथा स्रष्टव्यमन्यथा सृष्टिरभवत् कुत इति। दीक्षितवादवचनात् क्रतोः वैकल्यं समजायत इति। "स एतं दीक्षितवादमपश्यत्" इत्युक्तं दीक्षितेन अग्निष्टोमदीक्षाकाले "उषः काले बुध्वा उपोदयेयन्मेत्रत्वित्यादि प्रायश्चित्त-

जपः" इति सूत्रानुसारेण उष.काले वक्तव्यो मन्त्रसंघः दीक्षितवादः तद्वचनं शास्त्रेण निश्चितवान् । ततः प्रजासृष्टिं कामयमानः तृतीयवारमग्निष्टोमं अनुष्ठितवान् । तदनुष्ठानकाले दीक्षितवादमवदत् । तेन क्रतोः साद्गुण्यं सञ्जातम् ।" ततो वै स प्रजा असृजत" । मन्त्रजपसहितकर्मानुष्ठानेन स प्रजापतिः प्रजाः सृष्टवान् । अनेन किमुक्तमिति चेत् अयथानुष्ठानेन कामितमनुष्यसृष्टिं विहाय सर्पपक्ष्यादिसृष्टिरभवत् इति सुस्पष्टं प्रतीयते ।

एवमेव अन्यदपि उदाहरणं दीयते । तै॰ सं 6-5-6 "अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् । तस्या उच्छेषणमददुत्सत्प्राश्नात्सरितो धत्त तस्यै चत्वार आदित्या अजायन्त ।" इति ।

कदाचित् "अदितिः पुत्रकामनया साध्यसंज्ञकदेवेभ्यः ब्रह्मौदनं पक्त्वा अददात् । ततः ते देवाः भुक्तशेषं तस्यै अदित्यै अददुः । सा अदितिः तैः दीयमानं तदुच्छेषणं भक्षयित्वा गर्भधारणं कृतवती । तस्मात् गर्भात् चत्वारः आदित्याः अजायन्त । तावता असन्तुष्टा सा अदितिः पूर्ववत् साध्येभ्यो देवेभ्यो ब्रह्मौदनं पक्त्वा एवममन्यत । तदुच्छेषणभक्षणादेव तेजस्विनः पुत्राः समजायन्त । तत्समर्पणात्प्रागेव तद्धविः यदि भक्षयेत् इतोऽप्यधिकतेजस्विनः जायेरन् इति । तदेवोक्तम् ।

सा द्वितीयमपचत्साऽमन्यत" उच्छेषणान्म इमेऽज्ञत यदग्रे प्राशिष्यामीतोमेवसीयाँ सो जनिष्यन्त इति" । "साग्रे प्राश्नात्सारितो धत्त तस्यै व्यृर्धमाण्डमजायत इति ।" यथा अमन्यत तथा देवेभ्यो हविर्दानात्प्रागेव तद्धविर्भक्षितवती । तेन भक्षणेनापि यद्यपि गर्भं धृतवती । तथापि तद्गर्भं शिशुशून्यमभवत् । शास्त्रे तावत् देवेभ्यः हविर्दत्वा हविश्शेषं भक्षयेयुरिति विहितम् । अन्यथा "यन्न प्राश्नीयात्, अहविस्स्यात्" इति हूयमानं हविः हविरेव न भवतीति निन्दितम् । अतः हविर्दानानन्तरं भक्षयितव्ये सति शास्त्रमुल्लङ्घ्य यतः हविर्दानात्प्रागेव भक्षितम् । अतः गर्भः शिशुशून्योऽभवत् इत्यनेन अयथानुष्ठानं विपरीतफलजनकं भविष्यतीति सुस्पष्टम् । एवमेव अन्यदपि उदाह्रियते ।

"यो वै धर्मस्य प्रियां तनुवमाक्रामति, दुश्चर्मा वै स भवति। एष ह वा अस्य प्रियां तनुवमाक्रामति। यस्त्रिः परीत्य चतुर्थं पर्येति। एतां ह वा अस्योग्र देवो राजनि राचक्राम ततो वै स दुश्चर्माऽभवत्। तस्मात्त्रिः परीत्यन चतुर्थं परीयात्। तै. आ. 5-4-38.

अग्निष्टोमादि क्रतुषु "अग्निष्टोमे प्रवृणक्ति" इति प्रवर्ग्याख्यं कर्म विहितम्। तस्मिन्नवान्तरकर्मणि महावीरमिति किञ्चित् आज्यपात्रं कृष्णाजिनचर्मरूपधवित्राणि =व्यजनानि धृत्वा अध्वर्युः, प्रतिप्रस्थाता, आग्नीध्रश्च एते त्रयः ऋत्विजः प्रदक्षिणपूर्वकं धूपयन्ति। यदुक्तं सूत्रकारेण तेषामेकं प्रतिप्रस्थात्रे प्रयच्छति एकमाग्नीध्राय इति धवित्राणां मध्ये एकं अध्वर्युः स्वीकृत्य द्वितीयं प्रति प्रस्थात्रे प्रयच्छति। तृतीयं आग्नीध्राय प्रयच्छति। ततः "आग्नीध्रप्रथमास्त्रिः प्रदक्षिणमूर्ध्वं धून्वन्तः परियन्ति" इति सूत्रानुसारेण कुर्वन्ति।

तदेवोक्तम् वेदे "त्रिः परियन्ति, त्रिवृद्धि प्राणः" इति। एवं प्रथमतः महावीरस्य धूपनसहित-प्रदक्षिणत्रयं विधाय, ततः अनभिधून्वन्तः त्रिः प्रदक्षिणं कुर्युरिति सूत्रकारेण, "अध्वर्युप्रथमा अनभिधून्वन्तस्त्रिः परियन्ति", "तदिदं विधत्त" त्रिः पुनः परियन्ति, षट् सम्पद्यन्ते"। इति पूर्वोक्ताः प्रदक्षिणावृत्तयः तिस्रः एताश्च विपरीतावृत्तयः तिस्रः इत्येवं षट्-सम्पत्तिः उक्ता। अस्मिन् सन्दर्भे विहितप्रदक्षिणत्रयापेक्षया यदि चतुर्थ-प्रदक्षिणां कुर्यात् तदा फलाधिकं भविष्यतीति न मन्तव्यमिति चतुर्थ-प्रदक्षिणं निषेधति। "यो वै धर्मस्याप्रियां तनुवमाक्रामति इति।" यः धर्मस्य प्रियशरीराक्रमणं नाम यः पुमान् अपेक्षितं प्रदक्षिणत्रयं कृत्वा ततः चतुर्थं प्रदक्षिणं अनपेक्षितमपि कुर्यात् स एव प्रियशरीरमाक्रामतीति। तेन "त्वग्दोषं प्राप्नुयादिति" भाष्यम्। न चैतद्वार्तामात्रम्। किन्तु कश्चित् राजनि नामकः पुरुषः उग्रदेवः उग्राणामृत्विजां शास्त्रार्थमुल्लङ्घयतां स्वामी सन् कदाचित् एतां प्रियतनुवमाचक्राम। ततः अपराधात् कुष्ठरोगवानभूत्। अतः स्वदेहरक्षणार्थं विहितप्रदक्षिणत्रयमुल्लङ्घ्य चतुर्थावृत्तिं न कुर्यात्

इत्युक्तम्। अनेनापि अयथानुष्ठानेन विपरीतफलं भविष्यतीति सुस्पष्टम्।

ननु अयथाशास्त्रानुष्ठानेन विपरीतफलं भविष्यतीति उदाहृताः वेदभागाः अर्थवादाः खलु। तेषां तावत् स्वार्थे तात्पर्यं नास्तीति तद्बोधने असमर्था इति चेत् उच्यते—अर्थवादानां केषांचित् स्वार्थविवक्षामन्तरा मीमांसा वेदान्तशास्त्र धर्मशास्त्रादिषु तत्तत्सिद्धान्ताः अनुपपन्ना भवेयुरिति तत्र तत्र स्वार्थे विवक्षापि उररीकरणीयेति वक्तव्यावसरोऽस्ति।

यद्यपि अर्थवादा एव तथापि तावन्मात्रेण ते न निराकरणीयाः। वेदः विधिमन्त्रादिभेदेन पञ्चधा विभक्तः। तत्र अध्ययनविध्युपात्तत्वेन यथा विध्यादीनां धर्मं प्रति प्रामाण्यं तथा अर्थवादानामपि प्रामाण्यम् अस्ति न वेति मीमांसाशास्त्रे द्वितीयपादे बहु विचारः कृतः। तथा हि— मी. तं. वा. 1-2-1 अधिकरणे "अतश्च यावन्त्येव साध्यसाधनइतिकर्तव्यतावाचित्वेन विधिप्रतिषेधान्तर्गतानि तेषां भवतु प्रामाण्यम्। यानि तु अतिरिक्तार्थानि अर्थवाद-मन्त्र-नामधेय-अनुपातीनि. सोऽरोदीत्, इषे त्वा, उद्भिदा, इत्येवमादीनि, तानि धर्माधर्मयोः अप्रमाणम्। "अतदर्थत्वात्" इति। ननु विध्येकवाक्यत्वात् प्रयोजनवदर्थकल्पनेन भवतु प्रामाण्यम् इति चेत्। मैवं भिन्नैरपि हि तैः किञ्चित् प्रतिपादयितुं शक्यमेवेति अतः अन्यथानुपपत्त्यभावात् न एकवाक्यता कल्पनीया। अन्योन्याश्रयदोषात्। तस्मात् पृथगवस्थितानां दृष्टत्वात् आनर्थक्यमेव उपपन्नतरम् इति पूर्वपक्षे प्राप्ते —

यत् अर्थवादानां भावनांशत्रय अनन्तपातित्वात् अग्राह्यमिति तत्र अभिधीयते। सत्यमतिरिक्तं न गृह्यते। अस्तित्वन्तर्गतिः, कथम् लिङादिघटितवाक्यैः द्वे भावने प्रतिपाद्येते। एका शाब्दीभावना, अपरा आर्थीभावना। शाब्दीभावनायाः किं केन कथमिति साकाङ्क्षात्रयं विद्यते। तत्र किमिति आकाङ्क्षायां आर्थीभावना, भाव्यत्वेनान्वेति। केनेत्यत्र विधिविज्ञानेनेति सम्बध्यते। कथमिति प्राशस्त्यज्ञानानुगृहीतेनेति

प्राशस्त्यज्ञानस्य अन्वयमन्तरा प्रवर्तनाबोधक-केवलविधिप्रत्ययश्रवणमात्रेण केऽपि पुरुषाः न प्रवर्तन्ते । अत एवोक्तं तं. वा. "बुद्धिपूर्वकारिणो हि पुरुषाः यावत्प्रशस्तोऽयमिति न बुध्यन्ते तावत् न प्रवर्तन्त" इति । अतः पुरुषस्य विधेयगतयागादिषु प्राशस्त्यज्ञानमन्तरा प्रवृत्तिर्नोदेति । प्रवृत्त्यभावे प्रवर्तनायाः प्रवर्तनात्वं न सिध्यति । अतः तदन्यथानुपपत्त्या विधेयगतप्राशस्त्यं अर्थवादवाक्यैः लक्षणया बोध्यते । अत्र विधेः प्रवर्तकत्वसिध्यर्थं प्राशस्त्यापेक्षा वर्तते । अर्थवादवाक्यानां स्वाध्यायाध्ययनविध्यन्यथानुपपत्त्या केवलमुख्यार्थप्रतिपादनेन प्रयोजनाभावात् लक्षणया प्राशस्त्यरूपोऽर्थः बोध्यते । अनयोः विध्यर्थवादयोः परस्पराकाङ्क्षावशेन एकवाक्यता सिध्यति । एवमेव निषेधवाक्यगत शब्दभावनायां निषेधवाक्यशेषभूत-अर्थवादज्ञापित-निन्दाज्ञानं इतिकर्तव्यतात्वेन अन्वेति । एवञ्च विधिप्रतिषेधान्तर्गतत्वमस्ति । किञ्च विधेयस्य स्तुत्यपेक्षा विद्यते । अर्थवादानां अध्ययनविधिपरिगृहीतत्वेन पदपदार्थाभिधाने कस्यापि पुरुषार्थस्य अभावात् पुरुषार्थापेक्षा विद्यते । परस्परापेक्षावशात् उभयोरेकवाक्यता विद्यत इति एकवाक्यतावशेन विधिवत् धर्मं प्रति अर्थवादानां प्रामाण्यं सिद्धान्तितम् । एवं विध्यर्थवादयोः परस्परान्वयनियमोऽपि वर्तत इत्यत्र वार्तिकं-"साध्यसाधनेतिकर्तव्यतयोऽस्तु अप्रवृत्तपुरुषनियोगात् शास्त्रमेव प्राशस्त्यप्रतिपादनाय आकांक्ष्यते । तथा च साकांक्षो विधिरास्ते इत्यर्थः । तथा "वायुर्वै क्षेपिष्ठा देवता" इत्येवमादयोऽपि साकाङ्क्षमेवेति । यः तेन लक्ष्यमाणः साधनानुरूप-साध्योत्पत्तिद्वारेण क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति प्राशस्त्यरूपोऽर्थः सः अनन्तरप्रवृत्तविध्युद्देशाकाङ्क्षितत्वात् पुरुषार्थे द्वारतां शक्नोति प्रतिपत्तुमिति परिगृह्यते । सोऽयं नष्टाश्वदग्धरथवत् सम्प्रयोगः । एवञ्च न प्ररोचना अन्यकृता कर्माङ्गम् । न च अर्थवादपदैः प्रयोजनान्तरं साधनीयमिति आम्नानसामर्थ्यात् उभयोर्नियममिति ।" अनेन अर्थवादज्ञापितप्राशस्त्यज्ञानमेव इतिकर्तव्यतात्वेन अन्वयितव्यमिति नियमः । अनेन नियमेन उभयोरेकवाक्यता । एकवाक्यतया अर्थवादानां धर्मं प्रति प्रामाण्यं सिद्धम् । एवं

प्रमाणरूप–अर्थवादानां लक्षणया ज्ञापितप्राशस्त्यस्यैव शब्दभावनायामिति-कर्तव्यतात्वेन अन्वय इत्युक्तम् । अत्र लक्षणा न मुख्यार्थान्वयानुपपत्त्या । किन्तु तात्पर्यानुपपत्त्या । अत्र लक्ष्यभूत-प्राशस्त्यरूपार्थस्य आलम्बनभूतो यो मुख्यार्थः""प्रजापतिरात्मनो वपामुदख्खिदत् सो रोदीद्यदरोदीत्" इत्या-द्यर्थवादप्रतिपादितः तस्य विरोधो दृश्यते । कथं तेन स्तुतिनिन्दे लक्ष्येते इति चेदुच्यते—यत्र मुख्यार्थस्य विरोधः तत्र गुणवाद इत्यादिरूपेण अर्थवादः विभक्तः । तत्र आदौ अर्थवादलक्षणं निरूप्यते ।

अर्थवादलक्षणम्

प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः । इममेवार्थं भाष्यकारः शबरस्वामी प्रत्यपादयत् । "अर्थवादः कश्चिद्वेदभागः । यः प्ररोचयन् विधिं स्तौति यथा "वायुर्वै क्षेपिष्ठा देवते"ति । वाक्यशेषो हि स भवति विधा-तव्यस्य 1-4-1-1 भाष्यकारैः "येन विधीयते तस्य वाक्यविशेषः अर्थवादः" इत्युक्तम् ।

कुमारिलभट्टपादैः एवमुक्तम् । "विधीयमानस्य वाक्यशेषत्वेन स्तावकः अर्थवादो भवतीति । अर्थस्य प्रयोजनस्य वादः वादनम् विध्यर्थ-प्रशंसापरं वचनमित्यर्थः । अर्थवादो हि स्तुत्यादिद्वारा विध्यर्थं शीघ्रं प्रवृत्तये प्रशंसति । निषिद्धार्थं शीघ्रं निवृत्तये निन्दति च । स चाऽयमर्थवादः लोके वेदे च समानः । अर्थस्य लक्षणया स्तुत्यर्थस्य निन्दार्थस्य वा वादः । वद करणे घञ् प्रशंसनीयगुणवाचके निन्दनीयदोषवाक्ये च शब्दविशेषे भावे घञ् । तत्कथने—

एवंप्रायिकमर्थवादलक्षणं निरूपितम् । इतः परमर्थवादभेदाः निरूप्यन्ते । स चार्थवादः त्रिविधः । 1) गुणवादः 2) अनुवादार्थवादः 3) भूतार्थवादः इति ।

उक्तं हि—

विरोधे गुणवादस्स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ।।

गुणवादः- यत्र विरुद्धार्थप्रतिपादनेन स्तुतिं करोति सोऽर्थवादः गुणवादार्थवादः यथाः- "आदित्यो यूपः" "यजमानः प्रस्तरः" इत्यादि । यूपस्य आदित्याभिन्नत्वञ्च लोकविरुद्धम्। अतः आदित्यगतोज्ज्वलत्वरूपगुणसादृश्यं स्वीकृत्य यथा आदित्यः (उज्वलत्वेन) तेजोंऽशेन सर्वप्रकाशकः । एवमेव यूपः अतीव तेजस्वी इति उज्वलत्वरूपगुणेन यूपः प्रशस्यते । यजमानः प्रस्तरः इत्यत्रापि यजमानस्य तत्तत्कर्माणि यावत्प्राधान्यं विद्यते तावत्प्राधान्यं प्रस्तरस्यापि विद्यते इति कृत्वा तत्कार्यकार्यत्वरूपगुणवत्त्वेन प्रस्तरः प्रशस्यते । अतोऽयं गुणवादार्थवादः ।

अनुवादार्थवादः- प्रमाणान्तरप्राप्तस्य कथ्यमानत्वेन रूपेण यः अर्थवादः स्तुतिं करोति सः अनुवादार्थवादः । यथा "अग्निर्हिमस्य भेषजम्" इति । लोके हिमस्य-शीतलस्य उपशामकत्वमग्नौ विद्यत इति प्रसिद्धमेव । तथा अधिगतार्थबोधकत्वरूपेणार्थवादेन स्तुतिः क्रियत इति अयमर्थः अनुवादार्थवादः ।

भूतार्थवादः- यत्र प्रमाणान्तरविरोधो नास्ति प्रमाणान्तरकथितबोधकत्वमपि नास्ति सः भूतार्थवादः । यथा इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादि । अनेन उपाख्यानेन बोधितोंऽशः प्रमाणान्तरविरुद्धोऽपि न भवति। प्रमाणान्तरबोधितोऽपि न भवति । अतोऽयमर्थवादः भूतार्थवादः इत्युच्यते । एवं भाष्यकारैः भगवद्भिः शबरस्वामिपूज्यपादैः अर्थवादाधिकरणे त्रैविध्यं निरूपितम् । शास्त्रदीपिकाकारैः पार्थसारथिमिश्रमहोदयैः अर्थवादानां त्रैविध्यं प्रकारान्तरेण न्यरूपि ।

यथा हेतुवन्निगदाधिकरणे 1-2-3 एवमुपपादितम् । आनर्थक्यप्रतियोगिनः अर्थवादाः "वायुर्वै क्षेपिष्ठा" इत्यादयः । विधिप्रतियोगिनश्च अर्थवादाः "औदुम्बरो यूपो भवतीत्यादयः" विचारिताः । इदानीं हेतुप्रतियोगिनः "शूर्पेण जुहोति, तेनैव ह्यन्नं क्रियते" इत्यादयः विचार्यन्त इति । अनेन आनर्थक्यप्रतियोगिनः, विधिप्रतियोगिनः, हेतुप्रतियोगिनश्च अर्थवादा इति प्रकारान्तरेण अर्थवादत्रैविध्यं प्रत्यपादि ।

शास्त्रदीपिकाव्याख्याने मयूखमालिकायां सोमनाथः एवं वदति। आनर्थक्यं- प्रतियोगि- सिद्धान्तन्यायनिवर्त्यं येषां ते तथोक्ताः आनर्थक्य प्रतियोगिनः एवमग्रेऽपि प्रथमाधिकरणे सर्वे अर्थवादाः आनर्थक्यप्रतियोगित्वेन विचारिताः। द्वितीये तेषां मध्ये केचित् विधिप्रतियोगित्वेन विचारिताः। इदानीं तेषां मध्ये केचन हेतुप्रतियोगित्वेन विचार्यन्त इत्यर्थः इति। एवमन्वन्तरभेदेन बहवः बहुषु स्थलेषु निरूपिताः। तेषां पौनरुक्त्यशङ्कापि नास्ति। तत्तदधिकरणानां न्यायभेदविषयत्वात्। तदेवोक्तं वार्तिककारैः, न्यायविषयत्वेन त्वधिकरणानां, तद्भेद एव पौनरुक्त्ये हेतुः। केचिदर्थवादाः तत्सिद्ध्यादिसूत्रेषु, केचिन्निवीताद्यधिकरणेषु केचित् परकृतिपुराकल्पद्वारेण षष्ठे, केचित् जतिलगवीधुकादिविधिसरूपाः दशमे। एतान् सर्वानपि मिलित्वा श्रीभट्टशङ्करकृत-मीमांसाबालप्रकाशे अष्टात्रिंशदर्थवादान्, निरूपयामासुः। प्रकृतं तावत् यत्र मुख्यार्थस्वीकारे विरोधः तत्र गौणार्थः स्वीकरणीय इति। मुख्यार्थेन वा गौणार्थेन वा अर्थवादानां स्तुतिनिन्दे लक्षणीये इत्यत्र न कोऽपि संशयः। अत एवोक्तं भाष्यकारैः अर्थवादाधिकरणे 125 पु. "इह अन्वाख्याने वर्तमाने द्वयं निष्पद्यते। यच्च वृत्तान्तज्ञानं, यच्च कस्मिंश्चित् प्ररोचना द्वेषो वा, तत्र वृत्तान्तान्वाख्यानं न प्रवर्तकं न निवर्तकं चेति। प्रयोजनाभावात् अनर्थकमित्यविवक्षितम्। प्ररोचनया तु प्रवर्तते द्वेषान्निवर्तते इति तयोर्विवक्षा। वृत्तान्तान्वाख्यानेऽपि विधीयमाने आदिमत्ता दोषः प्रसज्येतेति वार्तिककारैरप्येवमुक्तम्। "रोदनवाक्योपन्यासे"एवं येन केनचिदालम्बनेन निन्दाविज्ञानोत्पत्तिः प्रतिषेधोपकारिणीति मुख्यार्थभावेप्यदोषः एवं वपोत्खननादिवाक्ययोजना स्वात्मवपोत्कर्तनेनापि हि विशिष्टप्रयोजनार्थं कर्माणि क्रियन्ते। किमुत बाह्यधनत्यागेनेति लोके यथा "नेत्रमप्युद्धृत्याऽयं ददाती"ति त्यागिनं स्तुवन्तीति। वृत्तान्तपर्यवसायी च वेदः। तत्र प्रामाण्यमप्रतिपद्यमानः स्तुतौ सत्यत्वात् नान्यत्रान्वेषणमर्हतीति निष्प्रयोजन उपाख्यानसत्यतया नार्थः"। तस्मात् उपाख्यानाऽसत्यत्वमतन्त्रम् इत्युक्तम् तं. वा. 124, 125 पु.

ननु स्तुति-निन्दाप्रतिपादनार्थं खलु गुणवादस्वीकारः। तत्

"वेतसशाखया चावकाभिश्चाग्निं विकर्षति" इति विधिवाक्यशेषतया श्रूयते। "आपो वै शान्ता इति। अत्र आपः, शान्ता इति स्तूयमानास्सत्यः, तज्जन्यत्वसम्बन्धेन वेतसशाखा अवकाश्च स्तूयन्ते। एवं "यजमानः प्रस्तरः" "आदित्यो यूपः" इत्यादिष्वपि यजमानगततत्सिद्धिरूपं यजमानगतकार्यसाधकत्व-गुणसदृश-गुणमादाय प्रस्तरः स्तूयते। एवम् "आदित्यो यूपः" इत्यत्र आदित्यगत-उज्ज्वलत्वगुणसदृश-गुणमादाय यूपः स्तूयते। अतः तत्र उपपन्नं भवतु। ननु रोदनवपोत्कर्तनादिवाक्येषु निन्दास्तुतिविषयकविज्ञानोत्पादनार्थम् एवमग्निः रुदितवान्, प्रजापतिः वपोत्कर्तनं कृतवानिति वक्तव्ये आलम्बनतासिद्धयर्थं रुद्रप्रजापत्यादिशब्दानां अश्रुणश्च शौक्ल्यात् यदि नामैतत्कठिनं भवेत् ततः रजतसदृशं भवेत् इत्युत्प्रेक्ष्य तत्प्रभवनिन्दा। एवं महाभूतानि प्रजाः पान्तीति प्रजापतिरित्यादिरूपेण गौणार्थस्वीकारे यद्यपि आलम्बनता सिद्धयति। स्तुतित्वं हीयेतेति चेत् स्तुतित्वात्यागेनैव स्वार्थविवक्षायां न दोषोऽस्तीत्युक्तम्। वार्तिककारैः। 126 पु. "एतस्मिंस्तु प्रक्रमे सत्यं सालम्बनता। किन्तु स्तुतित्वमेव हीयते। अतः स्तुतित्वात्यागेनैव हि स्वार्थसत्यतां वर्णयामः, इति अनेनेदं बोध्यम्। यत्र स्वार्थविवक्षायां स्तुतिनिन्दे हीयेते। तत्र तद्विवक्षा न कर्तव्या क्वचित्तद्विवक्षा मन्तरापि स्तुतिनिन्दयोरालम्बनतासिद्धयर्थं प्रत्यक्षविरोधो दृश्यते। तत्र गौणार्थः स्वीकर्तव्यः। यत्र आलम्बनतासिद्धयर्थं गौणार्थस्वीकारे स्तुतिनिन्दे हीयेते तत्र स्तुतित्वात्यागेन स्वार्थविवक्षा कर्तव्या। अस्मिन् विषये अस्य शास्त्रस्य इदं परमं तात्पर्यम्। अर्थवादानां सर्वेषां स्वार्थविवक्षा न कर्तव्येति नाग्राहः। किन्तु स्तुतिनिन्दे निष्पादनीये।

यतः स्तुतिनिन्दात्व-अपरित्यागेन स्वार्थविवक्षामंगीकुर्वन्ति मीमांसकाः। अतः रात्रिसत्राधिकरणे विधिवाक्ये फलपदस्य अश्रुतत्वेऽपि आर्थवादिकं फलमङ्गीकृतम्। चातुर्मास्यप्रकरणे वैश्वदेवयागस्य नामधेयत्वं, यद्विश्वेदेवास्समजायन्त, तद्वैश्वदेवस्य वैश्वदेवत्व-मित्यर्थवादस्य स्वार्थे विवक्षामङ्गीकृत्य, श्येनेनाभिचरन् यजेतेत्यत्र श्येनशब्दस्य "यथा वै श्येनो निपत्यादत्ते" इत्यर्थवादवशेनैव नामधेयत्वं सिद्धान्तितम्। एवमेव बहुषु

स्थलेषु अर्थवादानां स्वार्थे विवक्षा मीमांसकैरेव अङ्गीकृता। अर्थवादैरेव बहवो विधयः अनुमीयन्त इत्यत्रापि मीमांसका एव प्रमाणम्। तथाहि अग्निष्टोमे दीक्षितस्य दक्षिणनयनाञ्जनं प्रथमतः कर्तव्यमिति विहितम्। तत्र एवं श्रूयते।" दक्षिणं पूर्वमङ्गे सव्यहित्पूर्वं मनुष्या आञ्जते" इति। इतःपूर्वं मनुष्याणां सव्यनयनाञ्जनप्राथम्यं न प्राप्तम्। अत्र सिद्धवन्निर्देशान्यथानुपपत्त्या मानुषीभिः सव्यनयनाञ्जनं प्रथमं कर्तव्यमिति विधिरनुमीयते।

आदित्यग्रहस्य द्विदेवत्येभ्यः ग्रहणं सार्थवादकं श्रूयते। "देवा वै यज्ञाद्रुद्रम तरायन् स आदित्यानन्वाक्रमत तद्विदेवत्यान्प्रापद्यन्त तान्न प्रतिप्रायच्छन् तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति। तस्माद्विदेवत्येभ्य आदित्यो निर्गृह्यत इति। देवाः यज्ञं कुर्वन्तः तस्मिन् यज्ञे रुद्रं विस्मृतवन्तः तानादित्याननुप्राप्य स रुद्रः अबाधत। तेन बाधिता आदित्याः द्विदेवत्यग्रहान् शरणं प्रपन्नाः। ते च द्विदेवत्यग्रहाः तानादित्यान् रुद्राय न प्रत्यर्पयन्। तस्मादद्यत्वेऽपि अन्यस्य वध्यं तद्भयाच्छरणागतं तस्मै हन्तुकामाय न प्रयच्छन्ति। तस्मादादित्यग्रहदेवतानामातिथेयानां द्विदेवत्यग्रहेषु सन्निधानाद्विदेवत्यग्रहेभ्यः आदित्यग्रहस्य ग्रहणं कर्तव्यमिति तदर्थः। तत्र तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति इति सिद्धवन्निर्देशान्यथानुपपत्त्या शरणागतः न प्रत्यर्पणीया इति विधिरनुमीयते।

"अविज्ञातो वा एष गृह्यते यदाग्रयणस्थाल्या गृह्णाति। "वायव्येन जुहोति इति विधिवाक्यशेषत्वेन श्रूयते। "तस्माद्गर्भेणाविज्ञातेन ब्रह्महा"इति आग्रयणाख्यो ग्रहः स्थाल्या ग्रहणसमये"ये देवा दिवी"ति मन्त्रेण ऐन्द्रवायवादिमन्त्रवद्देवताविशेषविज्ञानाभावात् अविज्ञातो गृह्यते। अतः स्थाल्या गृहीतस्य अविज्ञातत्वात् न स्थाल्यैव होतव्यम्। किन्तु स्थालीगतं सोमं वायव्येनोर्ध्वपवित्रेण पुनर्गृहीत्वा तेन जुहुयात्। तथा वाममद्यसवितरित्यादिषु पुनर्ग्रहणार्थं मन्त्रेषु होमार्थमन्त्रेषु च सवित्रादिदेवताविशेषविज्ञानसद्भावात् अज्ञातत्वदोषः परिहृतो भवति। अविज्ञातत्वस्य च

दोषत्वं तस्माद्गर्भेणेति वाक्यशेषेण प्रतिपाद्यते । गर्भिणीवधे स्त्रीपुंसाभावेन विशिष्य अज्ञानात् ब्रह्महा भवतीति गर्भस्य अविज्ञातत्वेन ब्रह्महत्याभिधानात् अत्र च अविज्ञातगर्भवधे सिद्धवद्ब्रह्महत्यानिर्देशान्यथानुपपत्त्या तत्र ब्रह्महत्यातुल्यप्रायश्चित्तविधिः "हत्वा गर्भमविज्ञातमेतदेवाचरेत्" इति स्मृतिमूलभूतः अनुमीयते । अत एव च एतानर्थवादानुदाहृत्य कल्पसूत्राधिकरणे श्री पार्थसारथिमिश्रा एवंविधं स्मृतीनां मूलम् । अत एव च एषु स्मार्तत्वप्रसिद्धिरिति लिलिखुः । एवमेव वेदान्तशास्त्रे बहूनामर्थवादानां स्वार्थे विवक्षामङ्गीचक्रुः । एवमेव धर्मशास्त्रेपि मन्वादिस्मृतिषु, गौतम-आपस्तम्बादिधर्मसूत्रेषु च बहुषु स्थलेषु अर्थवादानुदाहृत्य तत्तद्विधीन् निरणैषुः । ग्रन्थविस्तरभयान्न प्रपञ्च्यते ।

एवं च अयथानुष्ठानात् विपरीतं फलं भविष्यतीत्यत्र उदाहृतानाख्यायिकान् एते अर्थवादाः खलु इति अस्वारस्येन न निराकरणीयाः । केषांचिदर्थवादानां स्वार्थविवक्षया मीमांसकैरंगीकृतत्वाच्च । तेन परमप्रकृतमनुसरामः । नित्य-काम्यकर्मविषयप्रसक्तानुप्रसक्त-विचारसहितं निरूप्य इदानीं प्रेक्षावतामवधानाय पूर्वोक्तमपि पुनः स्मार्यते । वस्तुतस्तु श्रुतिस्मृतिविहितेषु सर्वेष्वपि कर्मसु काम्यकर्मविषये कामनौत्कट्येऽपि अध्ययनविधिसिद्धविद्या आधानविधि सिद्धमग्निमत्त्वं सामर्थ्यञ्चेति त्रयमश्रुतमप्यधिकारिविशेषणमिति पूर्वत्रोक्तम् । अतः उक्तविशेषणत्रयमध्ये एकस्य द्वयोस्त्रयाणां वा विरहे अधिकाराभावेन काम्यकर्मविधेः प्राप्त्यभावात् न विध्युल्लंघनकृतो दोषः । किन्तु नित्यकाम्ययोः बहुविधं भेदमज्ञात्वा नित्यकर्मवत् केषांचिदङ्गनां त्यागं केषांचिदनुक्तप्रतिनिधिना स्वेच्छया आचरणे च शास्त्रविध्युल्लङ्घनकृतो दोषः प्रसज्येत । तेन क्रतोर्वैगुण्यं स्वस्य प्रत्यवायस्य तेन अन्यथा अभिप्रेतं फलमन्यथा जननरूप-अनर्थपरंपरा स्यादिति सप्रमाणं निरूपितम् ।

नित्यविषये तु यावदङ्गानुष्ठानाऽसामर्थ्येऽपि प्रधानानुष्ठाने समर्थश्चेत् तत्प्राप्तिसत्त्वात् अशक्याङ्गत्यागः उपादेयानामेव नानुपादेयानामि-

त्यपि ज्ञात्वा अवश्यमनुष्ठानाय यतितव्यम् । अन्यथा तदकरणे प्रत्यवायः स्यादेवेति नित्य-काम्यकर्मभेदः सप्रमाणं बहुधा विचार्य न्यरूपि ।

एतदर्थमेव आदौ धर्मलक्षणस्वरूपविचारं कृत्वा यतोऽयं धर्मः श्रेयस्साधनत्वेन विहितं कर्मेवेति भट्टमीमांसकानां सिद्धान्तः । अतः तत्कर्म नित्यनैमित्तिककाम्यभेदेन त्रिविधमिति कर्मसमुदायं त्रेधा विभज्य तत्र सोमयागानां मध्ये अग्निष्टोमस्य नित्यत्वेऽपि तदतिरिक्तानां उक्थ्यादि-संस्थानां मीमांसकमते काम्यत्वेन अनित्यत्वमिति, केचित् तेषामपि नित्यत्वमित्यभिप्रयन्तीति तथावचने तेषामाशयः अन्य इति सिद्धान्तद्वयस्य परस्परविरोधो यथा न भवति तथोपपाद्य अग्निष्टोमादयः यावद्भेदभिन्नाः तैत्तरीय-ताण्ड्य-ब्राह्मणयोः विहिताः ते सर्वेऽप्यत्र पट्टिकारूपेण दर्शिताः । ततः वाजपेयः त्रिविध इति तेषां मध्ये द्वावाप्तवाजपेय-कुरुवाजपेयौ काम्याविति, यदि सर्वा अपि संस्थाः नित्या इति मतान्तराभिप्रायेण अवश्यमनुष्ठेया इति मन्येत । तदा संस्थावाजपेय एवानुष्ठेय इति । ततः काम्यकर्मसु कीदृशस्याधिकारः मुख्यद्रव्यस्यापचारे कीदृशः प्रतिनिधिः कर्तव्यः? प्रतिनिधिना क्रियमाणस्य कर्मणः कीदृशं फलमिति विचार्य मीमांसा- वेदान्तशास्त्र-धर्मशास्त्रादिष्वपि काम्यकर्मानुष्ठानावश्यकता नास्ति । तदकरणे प्रत्यवायोऽपि नास्ति इति सप्रमाणं निरूप्य काम्यकर्मणामपि तत्तत्कामनायां सत्यां कर्तव्यत्वेन विहितत्वात् यथाशास्त्रं तत्कर्म कर्तुं शक्तश्चेत् तथानुष्ठाने दोषो नास्तीति अन्यथा प्रत्यवायः वैगुण्यं च स्यादिति भीत्या तदननुष्ठानमेव वरं इति मीमांसाशास्त्रसिद्धान्त इति ।

एवं प्रायशः काम्यकर्मानुष्ठाने अस्माकं अधिकारो नास्तीति सुतरां वाजपेये इत्युक्तौ अयमाशय इत्यवगन्तव्यः । तत्सिद्धचर्थं एतद्विचाराङ्गतया इदानींतनकालपरिस्थितिः समीक्षणीया बहोः कालादारभ्य एतावदवधि शिष्टास्सर्वेऽपि धर्मशास्त्रोक्तान् सर्वानपि नियमान्प्राणाद्यधिकतरानिति मत्वा सुष्ठु पर्यपालयन् । इदानीं तु बहुषु शिष्टकुलेषु वेदाध्ययनं लुप्तप्रायमभवत् । केचनाधीतवन्तोऽपि नियमाध्ययनं न कुर्वन्ति । धर्मशास्त्रोक्त-प्रदोषकाल-स्वाध्याय-अनध्ययनादि नियमानुल्लङ्घ्य राजकीयपाठशालासु अप्राच्यभाषाशिक्षणेन मण्डिता इव वेदाध्ययनमपि चिकीर्षन्ति ।

परभाषाशिक्षामण्डितैरिव एतैरपि येन केनाप्युपायेन धनमार्जयितुं प्रयत्यते। अत एव पण्डितपुत्राः म्लेच्छदेशेष्वेवावर्तन्त। किञ्च बहवः धर्मशास्त्रेषु सहस्राधिकस्थलेषु रजस्वलोद्वाहनिषिद्धत्वेऽपि कामतः अकामतो वा कालस्य बलीयस्त्वेन तदपत्यस्य रजस्वलोद्वाहमेव कुर्वन्ति। बहवः लुप्तप्रायाः उपनयनादिसंस्काराः। करणेऽपि शास्त्रमतिलङ्घ्य दिवसचतुष्टयसाध्य-उपनयन-विवाहसंस्कारौ कतिचिद्घटिका-परिमितकाल एव समापयन्तीत्यत्र नातिपरोक्षं विदुषाम्। एवमकृतत्रायसंस्काराणामेव अपत्यं बहुषु स्थलेषु दृश्यते। एतत्सर्वं कालप्रभाव इत्यत्र न कोऽपि संशयः। वयं सर्वेऽपि कालाधीनाः। अस्माभिः कर्तव्यं किमपि नास्ति। दोषारोपणकरणे न मे तात्पर्यम्। इदानींतनकालपरिस्थितिसमीक्षैव मया कृता। एवंस्थिते इदानीमपि यद्यपि केचन शिष्टाचारवंशीयाः यथाशास्त्रं कृतोपनयनादिसंस्काराः कृतस्वाध्यायाधीतिनोऽप्यासन्। तथापि तेषां सोमयागादियष्टृत्वे शास्त्रविरोधाऽभावेऽपि तत्कृतयागेषु याजयितुं उपरितनविशेषणविशिष्टा ऋत्विजः दुर्लभा इति सर्वैरपि विदितप्रायमेव।

ननु पण्डित-अप्पय्यदीक्षितप्रभृतयः कलियुग एव वाजपेययागमन्वतिष्ठन् कुत इदानीं अस्माभिर्नानुष्ठेय इति चेन्मैवम्। तेषामस्माकं च बह्वन्तरं विद्यते। तेषां कर्मानुष्ठानाधिकारः अन्यः तत्कालापेक्षया इदानींतनकालोऽपि अतीव विपरीतः। यद्यपि काम्यकर्माणि न निषिद्धानि तथापि शास्त्रदृष्ट्या तेष्वस्माकमधिकारोऽस्ति न वेति हृदये हस्तं निधाय सम्यग्विमृश्यानुष्ठेयानीत्येव वचने तात्पर्यम्। यदि दुरितक्षयार्थमनुष्ठीयेत दुरितक्षयेषु बहुषु नित्यकर्मसु सत्सु तेषु मुख्यद्रव्याभावेऽपि सङ्कोचयितुमशक्यान्यनुपादेयान्यङ्गानीति सिद्धान्तस्य सत्त्वेऽपि काम्यकर्मसु तत्रापि वाजपेये सुराग्रहास्सन्ति न वा इति विवादग्रस्ते संशयाऽऽक्रान्ते "कश्च निस्संशयं कार्यं कुर्यात्प्राज्ञस्ससंशयम्" इति सुन्दरकाण्डोक्तोपदेशानुसारेण किमर्थं व्यर्थप्रयासस्समाश्रितः स्यात्। तत्सिद्धं काम्यकर्मसु सर्वाङ्गोपसंहाराऽसमर्थाः नित्यान्येव अनुष्ठीयेरन् इति। तत्राप्यसमर्थानां तृतीयाध्यायोक्तप्रकारेण स्मार्तकर्मानुष्ठानमेव वरमिति सप्रमाण-

मुपपाद्य अल्पज्ञेन मया महाह्रदे मीमांसाशास्त्रे अवगाह्य तत्रस्थान्मीमांसा-न्यायरत्नानुपादाय यथावसरं तन्न्यायान् योजयित्वा अयं ग्रन्थः व्यरचि । अत्रत्यान् भ्रमप्रमादादिकृतान्दोषानधरीकृत्य क्षीरनीरन्यायेन गुणानेव स्वीकुर्वन्त्विति विद्वन्मणीनां पुरतः सप्रश्रयं साजञ्जलिबन्धं निवेद्य उप-संह्रियत इति शम् ।

